
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

M-1984

M-1984

M-1984

शेष्यतावच्छेदकताविशिष्टप्रकारतासंबंधेन पदार्थोपस्थितेरभावात् घटपदवृत्तिज्ञानजन्यघटत्वप्रकार
कपदार्थोपस्थितौ घटस्य विशेष्यतयाभानात् प्रकारतासंबंधेन बोधे शाब्दप्रकारतासंबंधेन पदार्थोपस्थि
तेर्हेतुत्वे व्यतिरेकव्यभिचारादित्यर्थः इत्थं चात्मनिष्ठप्रत्यासत्त्या योग्यताज्ञानकारणतासिद्धौ घटो घटत्व
समवेतशाब्दबोधापत्तेर्नेति भावः घटो घटत्वमिति शाब्दबोधापत्तिमुपपादयन् व्यतिरेकव्यभिचारमुपदर्शयति
परामर्शकारणताविचारेति यथा समवायघटितस्वसामानाधिकरण्यस्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वेतदु
भयसंबंधेन धूमलिंगकपरामर्शविशिष्टानुमितिं प्रति धूमलिंगकपरामर्शः कारणं तादृशोभयसंबंधेनालो
कलिंगकपरामर्शविशिष्टानुमितिं प्रति धूमलिंगकपरामर्शः कारणमित्यरीत्या धूमलिंगकपरामर्शोत्तरमालोक
लिंगकपरामर्शयोः परस्परजन्यानुमितौ व्यभिचारो वारितस्तथा स्वजनकज्ञानीयवृत्तिनिष्ठप्रकारतानिरूपितविशेष्यता
वच्छेदकताविशिष्टप्रकारताभ्युपप्रकारतेतदुभयघटितस्वसामानाधिकरण्यस्वाव्यवहितोत्तरक्षणोत्पत्तिक
त्वोभयसंबंधेन पदजन्यपदार्थोपस्थितिविशिष्टशाब्दबुद्धित्वावच्छिन्नं प्रति स्वजनकज्ञानीयवृत्तिनिष्ठप्रकार
तानिरूपितविशेष्यतावच्छेदकताविशिष्टप्रकारतासंबंधेन पदजन्यपदार्थोपस्थितिः कारणमिति श्रुतप्र
कारतासंबंधेन घटरूपपदार्थे शाब्दत्वावच्छिन्नस्यापि स्वजनकज्ञानीयवृत्तिनियमवृत्तिवृत्तिनिष्ठप्रकार
तानिरूपितविशेष्यतावच्छेदकताविशिष्टप्रकारताऽथ च द्वाभ्यां प्रकारतेनेतदुभयघटितसामानाधिकरण्यसं

आलोक

टनि

द्रव्यमित्याकारकोपस्थितिविषयीभूते द्रव्यत्वेरनादृत्त्यप्रकारतासंबंधेन पदजन्यपदार्थोपस्थितेः प्रकारतासंबं
धेन शाब्दबोधं प्रति हेतुतास्वीकारस्य तादृशापत्तेर्वारणात् प्रमेयत्वावच्छिन्नविशेष्यकवृत्तिज्ञानीयप्रमेयत्वा
वच्छिन्नविषयकसंस्कारद्रव्यविषयकवृत्तिज्ञानातिरिक्तात्तादृशादिरूपाद्बोधकोद्बुद्धद्रव्यत्वावच्छिन्नविषय
कसंस्काराभ्यां जनितप्रमेय १ च द्रव्यत्वोभयावच्छिन्नविषयकप्रमेयो द्रव्यं चेत्याकारकसमूहालंबनोपस्थितिस्थले
संपादिताया शाब्दबोधापत्तिस्तत्स्यावारणात् तथाहि प्रमेयो द्रव्यं चेत्युपस्थितिः तज्जनाधीभूतं प्रमेयत्वावच्छि
न्नं प्रमेयपदवृत्त्यमित्याकारकं ज्ञानं तादृशशक्तिरूपवृत्तिनिष्ठप्रकारतानिरूपितविशेष्यता प्रमेये तदवच्छेदकता
प्रमेयत्वे प्रमेयो द्रव्यं चेत्युपस्थितिप्रकारतापि प्रमेयत्वे इति सामानाधिकरण्यसंबंधेन निरूक्तविशेष्यतावच्छेदक
ताविशिष्टप्रकारताप्रमेयत्वेऽएव तादृशप्रकारतासंबंधेन पदार्थोपस्थितिरपि प्रमेयत्वेएव वर्तते ननु द्रव्यत्वेऽपि
तत्र द्रव्य १ त्वे प्रकारतासंबंधेन शाब्दबोधापत्तेः पादयितुमशक्यत्वादित्यर्थः एवं च विषयनिष्ठप्रसाससत्तायोग्यता
ज्ञानस्यकारणतायाः निरुक्तत्वेन धर्मितावच्छेदकताप्रसाससत्ता घटो घट इत्यत्र शाब्दबोधापत्तिनिरस्तवक्ते
तिभावः अथ घटो घट इत्यत्र शाब्दबोधापत्तिमुद्धरन् समानप्रकारतासंबंधेन पदार्थोपस्थितिहेतुतां व्यभिचारमु
द्भावयन्नाशंकते न च पदार्थोपस्थितिः द्रव्यं घट इत्यत्र पदार्थोपि पदजन्यप्रतीतिविशेष्ये घटेपि प्रकारतासंबंधेन शा
ब्दबोधउत्पद्यते न च घटे प्रकारतासंबंधेन पदार्थोपस्थितिः) स्वजनकज्ञानीयवृत्तिनिष्ठप्रकारतानिरूपितवि

बंधेनोपस्थितिविशिष्टशाब्दत्वावच्छिन्नस्याभावात्तव्यतिरेकव्यभिचार इति अथवा ऽत्रनिष्टप्रसापरामर्शानुमि
त्योः कार्यकारणभावपर्वतत्वधर्मितावच्छेदकधूमलिंगकपरामर्शकाले द्रव्यत्वधर्मितावच्छेदकवह्निसाध्यकानुमि
त्यापत्तिरिति धर्मितावच्छेदकतासंबंधेनानुमितिं प्रति धर्मितावच्छेदकतासंबंधेन तल्लिंगकपरामर्शो हेतुरिति
विषयनिष्टप्रसाससत्ताविहहेतुहेतुमद्भावआवश्यकएवमपि वह्निव्याप्यधूमवान्पर्वतो वह्निव्याप्यालोकवद्द्रव्यमिति समू
हालंबनजन्यायां पर्वतो वह्निमान् वह्निमद्द्रव्यमित्याकारकानुमितौ व्यभिचारो दुर्वारः पर्वतत्वेऽप्यालोकलिंगकपराम
र्शस्य द्रव्यत्वे धूमलिंगकपरामर्शस्य च धर्मितावच्छेदकतासंबंधेनाभावात् अनुमितेश्च धर्मितावच्छेदकतासंबंधे
नोभयत्र संभवादिति सामानाधिकरण्यसंबंधेन तल्लिंगकपरामर्श धर्मितावच्छेदकताविशिष्टधर्मितावच्छेदकावच्छेदकता
संबंधेनानुमितिं प्रति धर्मितावच्छेदकतासंबंधेन तल्लिंगकपरामर्शो हेतुरिति कार्यकारणभाववल्लनोभाव इत्यर्थः च धूम
लिंगकपरामर्श धर्मितावच्छेदकताविशिष्टधर्मितासंबंधेनानुमितिः पर्वतत्वे तत्रैव धर्मितावच्छेदकतासंबंधेन धूमलि
गकपरामर्शोपि एवं सामानाधिकरण्यसंबंधेनालोकलिंगकपरामर्शधर्मितावच्छेदकताविशिष्टधर्मितावच्छेदकता
संबंधेनानुमितिर्द्रव्यत्वे वर्तते तत्रैव धर्मितावच्छेदकतासंबंधेनालोकलिंगकपरामर्शोपि वर्तत एवेति यथाव्यभि
चारणवारणं तथा सामानाधिकरण्यसंबंधेन स्वजनकज्ञानीयवृत्तिनिष्ठप्रकारतानिरूपितविशेष्यतावच्छेदकता

व्यु.टी.

विशिष्टप्रकारताविशिष्टप्रकारतासंबंधेन शाब्दबुद्धित्वावच्छिन्नं प्रति खननकरणीयवृत्तिनिष्ठप्रकारतानिरूपितवि
शेष्यतावच्छेदकताविशिष्टप्रकारतासंबंधेन हेतुरिति तु पर्यवसानभावकत्वेन न व्यभिचारणीयत्वात् पदार्थघ
टे तादृशप्रकारतासंबंधेन शाब्दबोधाभावादित्यर्थः एवं च घटत्वे व्यभिचारस्य॥ धर्मितावच्छेदकतया घटत्वाव
च्छिन्नप्रकारकाभेदसंसर्गकयोग्यताज्ञानस्य खननकरणीयवृत्तिनिष्ठप्रकारतानिरूपितविशेष्यतावच्छेदकता
विशिष्टप्रकारतासंबंधेन घटपदजन्यपदार्थोपस्थितेश्च सत्वात् घटो घट इत्यत्र शाब्दबोधापत्तिरिति भावः समा
धत्ते नहि तद्धर्मावच्छिन्नेति इत्थं घट इत्यत्र तद्धर्मावच्छिन्नाघटत्वावच्छिन्नाभेदसंसर्गावच्छिन्नाघटनिष्ठ
प्रकारतानिरूपितविशेष्यताद्वयेन तदवच्छेदकताद्वयत्वेन तादृशावच्छेदकतासंबंधेन घटत्वावच्छिन्नं प्रकारकाभे
दान्वयबोधोद्वयत्वेनायत्तेन न च तत्तद्धर्मभेदाभावादित्यर्थः नन्वेवमपि स घटो घट इति वाक्याभ्यां शाब्दबोधानु
पपत्तिस्तत्र घटत्वे घटत्वभेदाभावेन तद्धर्मावच्छिन्नाभेदसंसर्गावच्छिन्नाप्रकारतानिरूपितविशेष्यतावच्छेदकता
संबंधेन शाब्दबोधस्योपपादयितुमशक्यत्वादित्यत आह स घट इत्यादिवाक्यादिति निरवच्छिन्नत्वेन विशेषणीय
इति तथा च निरवच्छिन्नतद्धर्मनिष्ठावच्छेदकताकाभेदसंसर्गावच्छिन्नप्रकारतानिरूपितनिरवच्छिन्नविशेष्य
तावच्छेदकतासंबंधेन शाब्दबोधं प्रति धर्मधर्मिभेदो हेतुः एवं च यद्वा घट इत्यत्र घटत्वनिष्ठायां निरवच्छिन्ना

४२॥

२॥

वच्छेदकतानिरूपितकायां अभेदसंसंसर्गावच्छिन्नाघटनिष्ठप्रकारतानिरूपितायां द्रव्यनिष्ठविशेष्यता
तन्निरूपितायां द्रव्यत्वनिष्ठानिरवच्छिन्नावच्छेदकतासंबंधेन शाब्द॰ द्रव्यत्वावच्छिन्नं द्रव्यत्वेनायत्तेन तत्र द्रव्य
त्वे घटत्वभेदरूपहेतुरस्ति स घट इत्यत्र तु जातिमान् घट इत्यर्थः॥ अत्राभेदसंबंधेन घटः प्रकारः घटत्वनिष्ठ
प्रकारतावच्छेदकतानिरवच्छिन्ना अत्र च यत्र जातिमान् विशेष्यः विशेष्यतावच्छेदकताजातौ सा च जातित्वावच्छि
न्ना इति घटत्वनिष्ठनिरवच्छिन्नावच्छेदकतानिरूपकाभेदसंसर्गावच्छिन्नघटनिष्ठप्रकारतानिरूपितायां जाति
मन्निष्ठविशेष्यतातन्निरूपितायां जातिनिष्ठावच्छेदकता सा जातित्वावच्छिन्नेति सावच्छिन्नविशेष्यतावच्छेद
कतासंबंधेनेति न तत्र घटत्वादिरूपतद्धर्मभेदो हेतुः अपितु निरवच्छिन्नविशेष्यतावच्छेदकतासंबंधेन शा
ब्दबोध इति जातौ घटत्वादिरूपतद्धर्मभेदाभावेपि शाब्दबोध उपपद्यते एवं घटस्स इत्यत्र घटो जातिमानित्यर्थः
अत्र घटो विशेष्यः घटत्वनिष्ठविशेष्यतावच्छेदकता निरवच्छिन्ना अथ चाभेदसंसर्गेण जातिमान् प्रकारः जाति
निष्ठा प्रकारतावच्छेदकता जातित्वावच्छिन्ना इति निरवच्छिन्नतद्धर्मनिष्ठावच्छेदकतानिरूपकाभेदसंसर्गावच्छि
न्नप्रकारतानिरूपितनिरवच्छिन्नविशेष्यतावच्छेदकतासंबंधेन घटत्वे घटविशेष्यकजातिमत्प्रकारकाभेदसंस
र्गकशाब्दबोधाभावात् घटत्वे जातिभेदाभावेपि शाब्दबोध उपपद्यते नन्वेवमपि घटो नील घट इति वाक्याच्छाब्द
बोधानुपपत्तिः घटत्वे घटत्वभेदाभावादित्यत आह घटो नीलघट इत्यादीति विधेयकोटावधिकावगाहि शाब्द

व्यु०टी०।

बोधस्यानुमितिकारणमनुमानमित्यादौ बहुव्रीहिसमासस्य तत्कारणादिभिरंगीकृतत्वात् तथाहि अनुमानमित्यत्रानुपूर्वी
कमात्तदर्थानुमितेर्निरूपितत्वसंबंधेनैनस्युडर्थकारणत्वावच्छिन्ने कदेशे करणत्वेन्वयः सत्तेनैव विवक्षणान्वयः अनुमि
तिकारणमित्यत्र नानार्थयोरभेदान्वयादनुमितिपदलक्षितानुमितिसंबंधस्याभेदेन करणेऽन्वयस्तथाचा
नुमितिकारणमनुमितिसंबंध्यभिन्नं कारणमित्यर्थात् एवं घटो नीलो घट इत्याद्यन्वयबोधस्य विधेयतारावधिक
गाहित्वेन भाणिमा [illegible] स्वयं तस्तु तथाबोधो प्रामाणिकः अन्यथानुत्पत्यनन्त्या नीलघटो घट इति बोधस्यापि
स्वीकारापत्तिरिति भावः अन्यत्र दर्शितदिशा सोऽप्युपपादनीय इति अवच्छेदकताया तद्धर्मपर्याप्त्यादिविव
क्षयेत्यर्थः निरवच्छिन्नतद्धर्मपर्याप्तावच्छेदकताकाया अभेदसंसर्गावच्छिन्नप्रकारतानिरूपितविशेष्यतानि
रूपितनिरवच्छिन्नावच्छेदकत्वसंबंधेन शाब्दं प्रति तद्धर्मभेदः कारणं घटो नील इत्यत्रावच्छेदकतानवच्छिन्नघटत्व
पर्याप्तिं तु नीलत्वघटत्वोभयपर्याप्ताविति तद्घटितत्वसंबंधेन घटत्वेन शाब्दबोधाभावात् निरवच्छिन्नघटत्वपर्या
प्तावच्छेदकताकाभेदसंसर्गावच्छिन्नप्रकारतानिरूपितनिरवच्छिन्नविशेष्यतावच्छेदकतासंबंधेन शाब्दबोधं
प्रत्येव घटत्वादिरूपतद्धर्मभेदस्य कारणत्वात् अत्र नीलत्वघटत्वोभयपर्याप्तावच्छेदकताकभेदसंसर्गावच्छि
न्नप्रकारतानिरूपितविशेष्यतावच्छेदकतासंबंधेन शाब्दबोधात् तं प्रति च तद्धर्मभेदस्य कारणत्वाभावा

४३॥

द् घटो घट इत्यभेदाभावे शाब्दबोधोपपत्तय इति भावः नन्वेवमपि सत्त्ववत् इति वाक्याद्भेदान्वयबोधापत्तिर्जातिनि
ष्ठप्रकारतावच्छेदकत्व च विशेष्यतावच्छेदकत्वयोर्जातित्वावच्छिन्नत्वात् निरवच्छिन्नतद्धर्मनिष्ठावच्छेदकताक
अभेदसंसर्गावच्छिन्नप्रकारतानिरूपितनिरवच्छिन्नविशेष्यतावच्छेदकतासंबंधेन शाब्दबोधं प्रत्येव तद्धर्मभे
दस्य कारणत्वादित्यत आह सत्त्वेत्यादि वाक्यादिति सत्त्ववत्सत्त्ववाञ् जातिमान् जातिमानित्यर्थः जातित्वावच्छि
न्नेति यत्र जातिमान् धर्मी धर्मितावच्छेदकताजातौ सा जातित्वावच्छिन्ना एवं जातिमान् प्रकारतावच्छेदकताजातौ सा
जातित्वावच्छिन्ना तथा च जातित्वावच्छिन्नधर्मितावच्छेदकतायस्य अथवा तद्धर्मो जातित्वं तदवच्छिन्नप्रकारता
वच्छेदकतायस्येदृशयोः भेदान्वयबोधवारणायेत्यर्थः तद्धर्मावच्छिन्नेति तद्धर्मो जातित्वं तदवच्छिन्नजाति
निष्ठावच्छेदकतायस्याः एतादृशीया जातिमन्निष्ठा अभेदसंसर्गावच्छिन्नप्रकारतानिरूपिताधर्मिता जातिम
ति तदवच्छेदकता जातौ तदवच्छेदकत्वं जातित्वे तादृशमसमासमानाधिकरण्ये जातित्वे स्यात्तत्राहि तद्धर्मजातित्वभेदः
कारणं स च नास्तीति न जातिमान् जातिमान् इति वाक्याच्छाब्दबोध एतादृशवाक्यवारणभावेन दंडी कुंडलीत्यादौ
प्रसिद्धिः तत्र च तद्धर्मः कुंडलत्वावच्छिन्नकुंडलनिष्ठावच्छेदकताकाभेदसंसर्गावच्छिन्नकुंडलनिष्ठप्रकारतानि
रूपितदंडिनिष्ठविशेष्यतानिरूपितदंडनिष्ठावच्छेदकतानिरूपितदंडत्वनिष्ठावच्छेदकत्वसंबंधेन शाब्दबोधस्य
तत्कारणीभूतकुंडलत्वरूपतद्धर्मभेदस्य च दंडत्वे सत्त्वात् नन्वेवमपि नन्वेवमपि जातित्वावच्छिन्नदंडत्वावच्छिन्नद

धो

व्यु.टी.

उविशिष्टतात्पर्यकत्वसदघटिताभ्यां सदंडीदंडी सदविवाक्याभ्यां शाब्दबोधानुपपत्तिः उभयत्रैव दंडत्वे दंडत्वभे
दाभावादिति चेन्न अत्रापि विशेष्यतावच्छेदकतावच्छेदकत्वप्रकारतावच्छेदकतावच्छेदकत्वयोर्निरवच्छिन्न
त्वेन विशेषणीयत्वात् ननु निरवच्छिन्नतद्धर्मावच्छिन्नावच्छेदकताकाभेदसंसर्गावच्छिन्नप्रकारतानिरूपित
निरवच्छिन्नविशेष्यतावच्छेदकतावच्छेदकत्वसंबंधेन शाब्दबुद्धित्वावच्छिन्नं प्रति तद्धर्मभेदस्य कारणत्वे
दंडवान् दंडवान् इति वाक्यात् शाब्दबोधापत्तिरत आह एवं दंडवान् दंडवानित्यादि स्यादवाक्यमिति मनु पा
संबंधपुरस्कारात् दंडसंयोगवान् दंडसंयोगवानित्यर्थः दंडसंयोगत्वावच्छिन्नवत्ति दंडत्वावच्छिन्न दंडावच्छिन्नदं
डसंयोगत्वावच्छिन्न दंडसंयोगवत्तितद्वच्छिन्नवत्तः दंडत्वावच्छिन्न दंडावच्छिन्न दंडसंयोगत्वावच्छिन्नदंडसं
योगवतोऽभेदान्वयबोधवारणाय दंडत्वनिष्ठावच्छेदकतानिरूपित दंडनिष्ठावच्छेदकतानिरूपित दंडसंयो
गत्वावच्छिन्न दंडसंयोगनिष्ठावच्छेदकतानिरूपित संयोगिपुरुषनिष्ठाभेदसंसर्गावच्छिन्नप्रकारतानिरूपि
तपुरुषनिष्ठविशेष्यतानिरूपित दंडसंयोगत्वावच्छिन्न दंडसंयोगनिष्ठावच्छेदकतानिरूपित दंडनिष्ठावच्छेद
कतानिरूपितावच्छेदकत्वसंबंधेन दंडत्वे शाब्दबोध आपाद्यते तत्र दंडत्वभेदरूपकारणं नास्तीति नापत्तिरित्यर्थः
एतादृशकार्यकारणभावश्च कुंडलसंयोगवान् दंडसंयोगवान् इत्यादौ प्रसिद्धः दंडत्वनिष्ठावच्छेदकतानिरूपक
दंडनिष्ठावच्छेदकतानिरूपक दंडसंयोगनिष्ठावच्छेदकतानिरूपकपुरुषनिष्ठाभेदसंसर्गावच्छिन्नप्रकारतानि

४५

रूपितपुरुषनिष्ठविशेष्यतानिरूपित दंडसंयोगत्वावच्छिन्न दंडसंयोगनिष्ठावच्छेदकतानिरूपितावच्छेदकत्व
दंडनिष्ठावच्छेदकतानिरूपितावच्छेदकत्वसंबंधेन दंडत्वे शाब्दबोधापत्तेः तत्र दंडत्वभेदरूपकारणं ना) कुं
डलसंयोगनिष्ठावच्छेदकतानिरूपित कुंडलनिष्ठावच्छेदकतानिरूपितावच्छेदकत्वसंबंधेन शाब्दबोधस्य दंड
त्वादिभेदस्य च सत्वात् ननु तद्धर्मावच्छिन्नावच्छेदकताकाभेदसंसर्गावच्छिन्नप्रकारतानिरूपितविशेष्यतावच्छेद
कतावच्छेदकत्वसंबंधेन शाब्दबोधत्वावच्छिन्नं प्रति तद्धर्मभेदस्य कारणत्वेऽपि न्यूनवृत्तित्वावच्छिन्न दंडत्वावच्छिन्न दंडाव
च्छिन्न दंडसंयोगावच्छिन्न पुरुषतात्पर्यकत्वसदघटिताभ्यां सदंडवान् दंडवान् सदृशवाक्याभ्यां शाब्दबोधानुपप
त्तिरुभयत्र दंडत्वे दंडत्वभेदाभावादिति चेन्न प्रकारतावच्छेदकतावच्छेदकत्व विशेष्यतावच्छेदकतावच्छेदक
त्वयोर्निरवच्छिन्नत्वविशेषणीयत्वादित्याह अवच्छेदकतायामिति तथा च निरवच्छिन्नतद्धर्मावच्छिन्नावच्छे
दकताकत्वच्छेदकताकाभेदसंसर्गावच्छिन्नप्रकारतानिष्ठप्रकारतानिरूपितविशेष्यतावच्छेदकतावच्छेदकतानि
रूपितनिरवच्छिन्नावच्छेदकत्वसंबंधेन शाब्दत्वावच्छिन्नं प्रति तद्धर्मभेदस्य कारणतात् प्रकृते च दंडत्वनिष्ठा
वच्छेदकतायाः उभयत्र जातित्वावच्छिन्नतया निरवच्छिन्नतादृशावच्छेदकत्वसंबंधेन शाब्दबोधाभावेन दंडत्वभेदा
भावेऽपि सावच्छिन्नतादृशावच्छेदकत्वसंबंधेन शाब्दबोधोपपत्तिरिति भावः ज्ञायत्वादाह वस्तुतस्त्विति तद्धर्मि
त्वत्वनिविषयतासंबंधेन ज्ञानं प्रतीति धर्मितावच्छेदकतासंबंधेन घटत्वावच्छिन्नप्रकारताभेदसंसर्गकत्वयो

ष्यताज्ञानं द्रव्यत्वप्रमेयत्वादावस्ति तत्र धर्मितावच्छेदकतासंबंधेन द्रव्यं घटः प्रमेयो घट इत्यादिशाब्दबोधो जाय
ते स च शाब्दबोधो व्याप्यः तद्व्यापकं च तद्धर्मान्यवृत्तिविषयतासंबंधेन ज्ञानं प्रकृते तद्धर्मः प्रकारीभूतघटनिष्ठ
घटत्वं तदन्यद्द्रव्यत्वं तद्वृत्तिर्या धर्मितावच्छेदकतारूपा विषयता तत्संबंधेन ज्ञानं द्रव्यं घट इति शाब्दरूपं
तस्य तद्धर्मान्यवृत्तिविषयतासंबंधेन ज्ञानत्वेन रूपेण स्वं प्रति व्यापकत्वात् तथा च व्यापकीभूतशाब्दबो
धस्तद्धर्मान्यवृत्तिविषयतासंबंधेन ज्ञानत्वेन रूपेण) द्रव्यत्वे सति तत्र द्रव्यत्वे तद्धर्मभिन्नो घटत्वभेदो हेतु
रप्यस्तीति धर्मितावच्छेदकतासंबंधेन द्रव्यत्वे वर्तमानेन घटत्वावच्छिन्नप्रकारकाभेदसंसर्गकयोग्यताज्ञा
नेन घटत्वावच्छिन्नप्रकारकाभेदान्वयबोधो धर्मितावच्छेदकतासंबंधेन द्रव्यत्वे आपादयितुं शक्यते घये
घट इत्यत्र तु धर्मितावच्छेदकतासंबंधेन घटत्वावच्छिन्नप्रकारकाभेदसंसर्गकयोग्यताज्ञानेन घटत्वावच्छिन्न
प्रकारकाभेदान्वयबोधो धर्मितावच्छेदकतासंबंधेनापादयितुं न शक्यते योग्यताज्ञानापाद्यशाब्दव्यापकस्य
तद्धर्मान्यवृत्तिविषयतासंबंधेन ज्ञानस्य जनकीभूतायास्तद्धर्मभेदरूपासामग्र्यास्तदभावात् घटत्वे घटत्वभे
दाभावादिति भावः। एतदेव स्पष्टतया दर्शयति घटत्वावच्छिन्नप्रकारतेत्यादिना अभेदसंसर्गावच्छिन्ना
पाद्य घटत्वावच्छिन्ना घटनिष्ठप्रकारतानिरूपिता या द्रव्यनिष्ठा विशेष्यता तदवच्छेदकता द्रव्यत्वेत
त्संबंधेन द्रव्यं घट इति शाब्दत्वावच्छिन्नं प्रति घटत्वान्यवृत्तिविषयतासंबंधेन प्रत्यक्षं प्रति अनुमितिशाब्द

४८ ४८

साधारणज्ञानत्वावच्छिन्नस्य व्यापकतया घटत्वादौ तादृशविषयतासंबंधेन घटत्वान्यवृत्तिविषयतासंबंधेन ज्ञान
त्वावच्छिन्नस्य व्यापकतया घटत्वादौ तादृशविषयतासंबंधे सादिद्रव्यं घटत्वे घटत्वभेदरूपासामग्री तद्विरहेण त
त्र घटत्वे तादृशविशेष्यतावच्छेदकतासंबंधेन घटत्वावच्छिन्नाभेदसंसर्गावच्छिन्नप्रकारतानिरूपितविशेष्यतावच्छेद
कतासंबंधेन घटो घट इत्यत्र शाब्दबोधापत्तिर्नेत्यर्थः। उक्तं लाघवं दर्शयति एवं चेत्यादिना तद्धर्मान्यवृत्तिविषयतात्म
संबंधेन ज्ञानं प्रति तद्धर्मभेदत्वेन हेतुत्वांगीकारे च घटत्वान् घटत्वादित्यत्र शाब्दबोधवारणाय घटत्वरूपतद्धर्माव
च्छिन्नघटनिष्ठावच्छेदकतानिरूपिताभेदसंसर्गावच्छिन्नघटत्वद्वृत्तिनिष्ठप्रकारतानिरूपितविशेष्यतावच्छेदकता
वच्छेदकत्वसंबंधेन शाब्दबुद्धित्वावच्छिन्नं प्रति तद्धर्मभेदस्य कारणत्वमापन्नत्वम्यते योग्यताज्ञानत्व घटत्वद्वृत्ति
त्वाभेदसंसर्गावच्छिन्नप्रकारताशालि शाब्दबोधव्यापकस्य तद्धर्मान्यवृत्तिविषयतासंबंधेन ज्ञानत्वावच्छिन्नस्य जन
कीभूतायास्तद्धर्मभेदरूपासामग्र्यास्तदभावादेव घटत्वानित्यत्र शाब्दवारणसंभवात् इत्यर्थः। एवमुद्देश्यतावच्छेदकेति एकत्व
त्विवाक्येनैतत्र एकत्ववन्नेकपदार्थः सुबर्थवचनार्थ एकत्वं तथा चोद्देश्यतावच्छेदकीभूत एकत्वे विधेयीभूतैकत्वभेद
भावात् एकत्ववानित्यत्र शाब्दबोधानुदयात् तथा द्वौ बहवः इत्यत्रापि शाब्दबोधानुदयात् तथा द्वौ बहवः इत्यत्रापि शाब्द
बोधानुदयात् एकत्वत्वावच्छिन्नासमवायादिसंसर्गावच्छिन्नाया विभक्त्यर्थैकत्वद्वित्वादिनिष्ठप्रकारतानिरूपिताया
एकद्विपदार्थदारनिष्ठविशेष्यतानिरूपितासमवायादिसंसर्गावच्छिन्नाया एकत्वद्वित्वनिष्ठावच्छेदकतानिरूपिते

कु॰टी॰

कृतत्ववद्भिन्नत्वनिष्ठावच्छेदकतासंबंधेन एकत्ववद्भिन्नत्ववत्तायां जायमानशाब्दबोधे एकत्ववद्भिन्नत्वभेदस्य हेतुत्वांतरक-
ल्पनमनावश्यकमेव घटः इत्यत्र घटत्वविशिष्टत्वयोग्यताज्ञानजन्यैकत्ववद्भिन्नत्वाद्यवच्छिन्नसमवायादिसंसर्गावच्छिन्न
एकत्ववद्भिन्नत्वनिष्ठप्रकारतानिरूपितशाब्दबोधव्यापकस्य एकत्ववद्भिन्नत्वादिरूपतद्धर्मान्यघटत्वादिवृत्तिविषयतासंबंधेन ज्ञान
त्वावच्छिन्नस्य तथाजातिमानित्यादौ योग्यताज्ञानजन्यैकत्वत्वाद्यवच्छिन्नसमवायादिसंसर्गावच्छिन्नैकत्ववद्भिन्नत्वनिष्ठप्र-
कारतानिरूपितजातिमद्वृत्तिनिष्ठविशेष्यतानिरूपितजातिनिष्ठावच्छेदकतानिरूपितजातित्वनिष्ठावच्छेदकतावगा-
हिशाब्दबोधव्यापकस्य एकत्वादिरूपतद्धर्मान्यजातित्वादिवृत्तिविषयतासंबंधेन ज्ञानत्वावच्छिन्नस्य च जनकत्वेन क्ल-
प्तायास्तद्धर्मभेदरूपासामग्रीतदभावादेव कृतौ द्वौ घटौ इत्यादावपि शाब्दबोधवारणसंभवात् तत्र विभक्तेः पदसाधुत्वा-
र्थमेव प्रयुज्यत इति भावः एवं कर्मगच्छतीत्यादावपि कर्मपदोत्तरद्वितीयार्थः कर्मत्वं तत्र कर्मत्वत्वावच्छिन्नकर्मत्व
आधेयतासंबंधेन तद्वान् कर्मत्ववान् कर्मपदार्थः स्वकर्मण इति यावत् । अन्वयबोधवारणाय कर्मत्वत्वावच्छिन्नावकर्म-
त्वनिष्ठावच्छेदकताया स्याः द्वितीयार्थाधेयतासंसर्गावच्छिन्नाकर्मनिष्ठाप्रकारतानिरूपिता धर्मिता कर्मत्वेन
त्ववच्छेदकता कर्मत्वत्वेन संबंधेन कर्मत्वे शाब्दापत्तिवारणाय कर्मत्ववद्भेदस्य हेतुत्वांतरकल्पनमप्यनावश्यकमे-
वेत्यर्थः कर्मवत्कर्मणा तुल्यं क्रिय इति सत्वेककर्मपदोत्तरवर्त्तिप्रत्ययार्थः सादृश्यावच्छिन्नसादृश्यसादृश्यनिरूपितत्व

४६॥

संबंधेन कर्मपदार्थस्यान्वयात् कर्मणा तुल्यं क्रियः कर्मकर्मनिरूपितसादृश्यावच्छिन्नाभिन्न इति बोधस्तथा च निरूपि-
तत्वसंबंधेन कर्मविशिष्टं सादृश्यमिति योग्यताज्ञानजन्यकर्मत्वत्वावच्छिन्नकर्मत्वनिष्ठावच्छेदकतानिरूपकक-
र्मनिष्ठप्रकारतानिरूपितसादृश्यनिष्ठविशेष्यतानिरूपितसादृश्यत्वनिष्ठावच्छेदकत्वावगाहिशाब्दबोधव्यापक-
स्य कर्मत्वरूपतद्धर्मान्यसादृश्यत्ववृत्तिविषयतासंबंधेन ज्ञानत्वावच्छिन्नस्य जनकत्वेन क्लृप्तायास्तद्धर्मभेदरूपासाम-
ग्रीतदभावादेव कर्मगच्छतीत्यादावपि शाब्दबोधापत्तिवारणाय संभवादिति भावः घटेन घटः इत्यादावनुमितेः शाब्दस्य
वेति घटत्वावच्छिन्नप्रतियोगिताकभेदनिष्ठप्रकारतानिरूपितघटनिष्ठविशेष्यतानिरूपितघटत्वनिष्ठावच्छेदकत्व
संबंधेनानुमितौ शाब्दबोधे च घटत्वादिभेदस्यापि पृथक्कारणत्वं न कल्पनीयं घटेन घटः इत्यत्र प्रतियोगितासंबंधेन
घटभेदवान् घटः इति योग्यताज्ञानजन्यघटत्वावच्छिन्नप्रतियोगिताकभेदनिष्ठप्रकारतानिरूपितघटनिष्ठधर्मितानिरू-
पितघटत्वनिष्ठावच्छेदकत्वावगाहिशाब्दबोधपरामर्शादिजन्यतादृशानुमितिव्यापकस्य प्रतियोगितावच्छेदकीभूत-
घटत्वादिरूपतद्धर्मान्यपटत्वादिवृत्तिविषयतासंबंधेन ज्ञानत्वावच्छिन्नस्य तादृशत्वेनाभिमतायास्तद्धर्मभेदरूपासा-
मग्री तदभावादेव तदापत्तेर्वारणीयत्वादिति भावः न तद्धर्मभेदस्यैव वेति घटत्वादिभेदत्वेन या कारणता तयैव सकलापत्ति-
प्रसंगवारणसंभवात् घटो घटः घटेन घटः इत्यत्र शाब्दमात्रजनकपदसमभिव्याहाररूपाकांक्षायोग्यताज्ञानसत्त्वेन ज्ञानव-
त्त्वादापाद्यमानशाब्दबोधवारणसंभवात् इत्यर्थः ॥ इति व्युत्पत्तिवादे भेदान्वयविवरणं ॥ शाब्दबोधे चैकपदार्थे परप-
दार्थस्य संसर्गः संसर्गतयैव विषयो भवति स च क्वचिद्वृत्तिः क्वचिदितरः एवं सुतं तत्राभेदान्वयबोधप्रकारं प्रतिपाद्य

भेदान्वयबोधप्रकारं वक्तुमुपक्रमते भेदान्वयबोधश्चेत्यादिना तंडुलं पचतीत्यादौ प्रातिपदिकार्थतंडुलस्याश्रयतासं
बंधेन प्रत्ययार्थकर्मत्वेन सहान्वयः तंडुलनिष्ठकर्मतेति बोधात् एवं चंद्र इव मुखमित्यादौ प्रातिपदिकार्थचंद्रस्य
निरूपितत्वसंबंधेनाइवार्थकत्वे निपातार्थसादृश्येन समन्वयः चंद्रनिरूपितसादृश्याश्रयीभूतं मुखमिति बो
धात् एवं पचतीत्यत्र धात्वर्थपाकस्यानुकूलतासंबंधेनाख्यातार्थकृत्या समन्वयः पाकानुकूलकृतिरिति बोधात्
एवं न कलंजं भक्षयेदित्यादौ धात्वर्थभक्षणे लिङर्थबलवदनिष्टाननुबंधित्वादिरूपविध्यर्थाभावस्याउ
पयोगितासंबंधेनान्वयः बलवदनिष्टाननुबंधित्वविशिष्टेष्टसाधनत्वाभाववत् कलंजभक्षणमिति शाब्दबो
धात् गुरुमतेतु विध्यर्थयोगः पर्यवसितन्न कलंजक्षभक्षणाभावविषयमपूर्वमितिभावः कलंजभक्षणाभावरूपनि
योजकनियोज्यमपूर्वमिति यावत् तथाच प्रातिपदिकार्थश्च धात्वर्थश्च प्रातिपदिकार्थधात्वर्थौ तयोः प्रातिपदिका
र्थयोर्भेदान्वयबोधश्च प्रत्ययार्थेन क्वचित् निपातार्थेन च समवसेजायत इति योजना तत्रैव द्वारार्थः। न चेन्मति
अन्येन प्रत्ययनिपातार्थभिन्नेनेत्यर्थः अतिरिक्तेन प्रातिपदिकार्थेन धात्वर्थेन च समं प्रातिपदिकार्थधात्वर्थयोर्भेदान्वय
बोधो नास्तीत्यर्थः एतदेवोपपादयति सत्यपि पदार्थोपस्थितौ इति पदार्थोपस्थितियोग्यतात्सानोदिरूपकारण
कलापे सत्यपि राजपुरुष इत्यत्र स्वसंबंधेन राजवान् पुरुष इत्यन्वयबोधात् भूतलं घट इत्यत्राधेयतासंबंधे
न भूतलवान् घट इत्यन्वयाबोधात् तंडुलं पचति चैत्र इत्यत्र स्वकर्मकत्वसंबंधेन तंडुलवान्पाकः कर्तृत्वसंबंधेन
नाद्रष्टापाकवांश्चैत्र इत्यन्वयबोधात् चैत्रेण पच्यते तंडुल इत्यत्र स्वकर्तृकत्वसंबंधेन चैत्रवान्पाकः कर्मत्वसंबं

धेन ताद्रष्टापाकवान् तंडुल इत्यन्वयबोधादिति योजनया शाब्दबोधानुदयादित्यर्थः अत्रयुक्तिं प्रमाणयति
निपातातिरिक्तेत्यादिः क्रियातादृशप्रातिपदिकार्थयोः क्रिया निपातातिरिक्तप्रातिपदिकार्थयोरित्यर्थः ननु
चैत्रः पचतीत्यत्र कर्तृत्वसंबंधेन पाकवांश्चैत्र इति भेदसंबंधेनान्वयसंभवेपि क्रियातादृशप्रातिपदिकार्थयोरि
ति व्युत्पत्तिर्न कल्पनीया तद्गुरोधेन चाख्यातस्य सार्थकत्वमपि न कल्पनीयं एवं तंडुलः पच्यत इत्यत्रापि क
र्मतासंबंधेन पाकवान् तंडुल इत्यन्वयबोधसंभवे उक्तव्युत्पत्तिकल्पनं तदनुरोधेनाख्यातस्य कर्मत्वार्थकत्व
कल्पनं न कर्तव्यमित्यत आह कर्मत्वकर्तृत्वादिसंसर्गबंधेन तंडुलचैत्रादौ पाकादेरिति तथाच यथा चैत्रः पच
तीत्यत्र कर्तृत्वसंबंधेन चैत्रे पाकान्वयः तथा तंडुलं पचतीत्यत्रापि कर्मतासंबंधेन तंडुले पाकान्वयः स्या
देव तंडुलः पच्यत इत्यत्र यथा कर्मतासंबंधेन तंडुले पाकान्वयस्तथा चैत्रः पच्यत इत्यत्रापि कर्तृतासंबंधे
न चैत्रे पाकान्वयस्यापत्तेः कारणाभावात् व्युत्पत्तिकल्पनं तदनुरोधेन चाख्यातस्य कर्तृत्वकर्मत्वार्थकत्वकल्पनं
चावश्यकमिति भावः ननु तंडुलविशेष्यक कर्मत्वसंसर्गकपाकप्रकारकबोधे यत्नादिसमभिव्याहारज्ञानं कार
णं ननु शानचादिसमभिव्याहारतानं कारणं ननु यगादिसमभिव्याहारज्ञानमित्येवमेव तंडुलः पचतीत्यत्र क
र्मत्वसंसर्गकपाकप्रकारकचैत्रविशेष्यकशाब्दबोधस्य च कारणाभावात् संभवेनोक्तव्युत्पत्तिर्निर्युक्तिकात्तदनुरोधे
न चाख्यातस्य सार्थकत्वकल्पनमपि निर्युक्तिकमत आह स्वकर्मकत्वस्वकर्तृकत्वादिसंबंधेनत्यादि तथाच

व्यु.टी.

तंडुलं पचतीत्यादौ तंडुलप्रकारकस्वकर्मकत्वसंसर्गकपाकविशेष्यकान्वयबोधे नियामकीभूताया आख्याता-
दिसमभिहाररूपाकांक्षा सैव तंडुलः पचतीत्यत्राप्यस्तीति तंडुलप्रकारकस्वकर्मकत्वसंसर्गकपाकविशेष्य-
कान्वयबोधस्यापत्तेः एवं चैत्रेण पच्यत इत्यादौ चैत्रप्रकारकस्वकर्तृत्वसंसर्गकपाकविशेष्यकशा-
ब्दबोधप्रयोजकप्रकृतिसमभिहाररूपाकांक्षायाः चैत्रः पच्यत इत्यत्रापि सत्त्वाच्चैत्रप्रकारकस्वकर्तृत्वसंस-
र्गकपाकविशेष्यकशाब्दबोधापत्तिवारणाय धात्वर्थातिरिक्तनामार्थधर्मिकार्थे वा क्रियाया इत्यत्र प्रातिप-

निपाता

दिकार्थयोर्भेदेन साक्षादन्वयबोधो व्युत्पन्न इति द्वितीयव्युत्पत्तिः व्युत्पत्त्यंतरमभिहितं तथा च तथावि-
धव्युत्पत्तिविरोधात्तंडुलरूपनामार्थस्य तत्कर्मत्वरूपभेदसंबंधेन धात्वन्वयः संभवति किंतु तंडु-
लस्याधेयतासंबंधेन द्वितीयार्थकर्मत्वे तस्य निरूपकत्वसंबंधेन विक्लित्त्यनुकूलव्यापारे धात्वर्थे तस्य च
आख्यातार्थकृतौ तस्याश्रयत्वसंबंधेन चैत्रेऽन्वय इति चैत्रस्तंडुलं पचतीत्येव प्रयोगस्साधुः एवं चैत्रस्य
आधेयतासंबंधेन घटपदार्थेऽन्वयवारणाय तृतीयार्थकृतौ कृतेश्च जन्यतया विक्लित्त्यनुकूलफूत्का-
रादिरूपव्यापारे तस्य च जन्यतया आख्यातार्थविक्लित्तौ तस्याश्चाश्रयतासंबंधेन कर्मणि तंडुले एवं च चै-
त्रनिष्ठकृतिजन्यविक्लित्त्यनुकूलव्यापारजन्यविक्लित्त्याश्रयस्तंडुल इति बोधः एतन्मते फलस्य द्वितीयाद्यु-
बाधे भानमिति चिंत्यं फलव्यापारयोः पृथक्शक्तिवादिमते आश्रयत्वं कर्माख्यातार्थः चैत्रनिष्ठकृति

१८॥

जन्यविक्लित्त्याश्रयस्तंडुल इति बोधः एतन्मते चैत्रस्पर्शी भविष्यत्युपरिष्टात् इत्थं च चैत्रेण पच्यते तंडुल इत्येव प्रयोगस्सा-
धुरिति तादृशस्त्रीत्वाभाव इति भावः राजपुरुष इत्यत्र राजपदार्थस्य स्वत्वसंबंधेन पुरुषपदार्थे भूतलं घट
इत्यत्र च भूतलपदार्थस्याधेयतासंबंधेन घटपदार्थेऽन्वयवारणाय निपातातिरिक्तप्रातिपदिकार्थयोर्भेदेन
साक्षादन्वयबोधस्याव्युत्पन्नत्वादिति प्रथमाव्युत्पत्तिरिति ध्येयं व्युत्पत्तौ साक्षात्पदकृत्यमाह विभक्त्यर्थमं-
तराकृत्येति तयोरपि धात्वर्थनिपातातिरिक्तप्रातिपदिकार्थयोरपि विभक्त्यर्थकर्मत्वादिकमंतराकृत्यान्व-
यबोधादित्यर्थः विभक्त्यर्थकर्मत्वद्वारा निपातातिरिक्ततंडुलरूपप्रातिपदिकार्थस्य पाकेऽन्वयबोधादिति
यावत् विशिष्टान्वये तंडुलनिष्ठकर्मत्वं यत्रान्वेति तंडुलमपि तत्र कर्मतयान्वेतीति भावः साक्षादिति विभ-
क्त्यर्थमद्वारीकृत्य नामार्थधात्वर्थयोर्नान्वय इति अर्थः। निपातातिरिक्तेति प्रातिपदिकार्थस्य निपाताति-
रिक्तत्वविशेषणाद् भूतले न घट इत्यादौ घटादेर्नञर्थाभावेन प्रतियोगितासंबंधेनान्वयेपि न क्षतिरिति सूचिते-
णान्वयः भूतले न घट इत्यस्य घटप्रतियोगिकाभावो भूतलवृत्तिरित्यर्थः ननु भूतलवृत्तित्वं प्रतियोगित्वा-
भावानुयोगी घट इति तथा सति तु सविधिकरणाकांक्षापत्तेः घटो न पट इत्यस्य पटप्रतियोगिकत्वं घट इत्य-
र्थः घटादेरित्यादिना प्रतियोगितया चान्वितं भूतलवृत्तित्वादीनां परिपरिग्रहः नञर्थाभावेन अन्वयसं-
बंधाभावेन भेदेन चेत्यर्थः मुखं चंद्र इवेत्यादौ चंद्रप्रतियोगिकसादृश्यानुयोगि मुखमिति न बोधात्॥

मु.टी

मुखचंद्रादीनामनुयोगिताप्रतियोगिताभ्यामिवार्थसादृश्यादिनान्वयेपि न क्षतिरिति योजना ननु लं
जं भक्षयेदित्यादौ नञ्ः व्याप्तिरूपमते लिङः धात्वर्थमुख्यविशेष्यकबोधस्य स्वीकरणीयत्वेन सिद्धां
तात् बलवदनिष्टाननुबंधित्वविशिष्टेष्टसाधनत्वविशिष्टत्वरूपसाध्याभाववत् कलंजकर्मकभक्ष
णमिति बोधात् बलवदनिष्टाननुबंधित्वविशिष्टेष्टसाधनत्वादिरूपलिङर्थप्रतियोगिकनञुपस्थाप्या
भाववतानुयोगितया धात्वर्थभक्षणादेरन्वयेपि न क्षतिरिति योजना गुरुमते त्विति गुरुमते तु आख्या
तार्थविशेष्यकस्यैव बोधस्य विधिलिङादिघटितवाक्यात् स्वीकरणीयत्वे इति सिद्धांतात् कलंजकर्मकभक्षण
प्रतियोगिकाभाववदपूर्वमिति बोध इति ध्येयं ननु निपातातिरिक्तनामार्थयोर्भेदेन साक्षादन्वयबोधस्य
अव्युत्पन्नत्वमिति नियमात् भेदसंसर्गावच्छिन्ननामार्थनिष्ठप्रकारताभिरूपितविशेष्यतासंबंधे
न शाब्दबुद्धिं प्रति विभक्तिनिपातान्यतरजन्योपस्थितिः कारणमिति कार्यकारणभावसंपन्न इति
कथं राजपुरुष इत्यादिसमासस्थले राजपदार्थस्य स्वत्वसंसर्गेण पुरुषविशेष्यकबोध इत्यत आह
राजपुरुष इत्यादाविति भेदेनेति स्वत्वसंबंधेनान्वयः किं तु तेन समं पुरुषेण समंघिभक्तंन्यार्थविशेषे
तारूपितत्वविशिष्टे लाक्षणिकं यद्राजादिपदं तदुपस्थाप्यतदुपस्थापितस्य लक्षणयास्या

४६ ४२

दिपदजन्योपस्थितिविषयस्य राजादिसंबंधादेरभेदान्वयबोधस्वीकारेण न दोषो न व्यभिचार इत्यर्थः ननु च
मपि मुखं चंद्र इत्यादिरूपकस्थले चंद्ररूपनामार्थस्य स्वनिरूपितसादृश्यरूपपरंपरासंबंधेन विभक्त्य
र्थनिपातातिरिक्तनामार्थे मुखे न्वयात् व्यभिचार इत्यत आह मुखं चंद्र इत्यादाविति न तत्र व्यभिचार
इति मुखं चंद्र इत्यादिरूपकस्थलीयशाब्दबोधव्यतिरेकव्यभिचारेणेत्यर्थः मुखं चंद्र इत्यत्र भेदसंबंधेन शा
ब्दबोधरूपकार्यसत्वं चेत् प्रत्ययनिपातान्यतरजन्योपस्थितिरूपकारणसत्वं चेत् भवेत् तत्र व्यतिरेकव्य
भिचारोपि भवेत् तत्र भेदसंबंधेन शाब्दबोधरूपकार्यमेव नास्तीति कथं व्यतिरेकव्यभिचार इति भावः के
चित्त्विति तल्लक्षणेति अत्र एवमिति चंद्रसदृशे चंद्रपदलक्षणायां उभयत्र शाब्दबोधसाम्ये उपमारूपक
योर्भेदो न स्यात् उपमैवेति रोध्यता भेदो रूपकमिष्यत इति वाच्यं यतस्तत्रोक्तेति रोध्यतभेदमादायैवोपमायाः
रूपकभेदोपगमात् रूपकस्थले तु चंद्रपदस्य चंद्रसदृशलक्षणकत्वेतिरोध्यता भेदाभावेनोपमालक्षणासमन्व
यासंभवादिमुख्यार्थचंद्रादेरेव भेदभ्रमो मुखादौ न तथा सति चंद्रादिगतान्हादकत्वादिधर्मप्रतीतिरपि मुखा
दौ निराबाधेति आहार्येति भेदभ्रम इति बाधकाली नेच्छाजन्यज्ञानमाहार्यमिति आहुरित्यस्वरस सादृश्यं
तु शाब्दान्वयव्यतिरेकसिद्धत्वं प्रतीतौ शब्दजन्यत्वेमिति ननु सादृश्यानुरोधिरत्नुभवविरोधश्चेति चेन्नु

व्यु.टी.

नादात्म्यातिरिक्तसंबंधेन नामार्थयोर्नान्वयबोध इति तादात्म्यातिरिक्तसंबंधस्याभेदसंबंधस्य तथा च निपाता
तिरिक्तनामार्थयोर्भेदेनैवान्वय इति व्युत्पत्तेरेव तात्पर्यमिति भावः। नीलो घट इत्यत्र स्ववृत्तिनीलत्वा
दिसंबंधेनेति स्वं नीलरूपाश्रयस्तद्वृत्ति नीलत्वरूपमेव तेन संबंधेन नीलादेर्यथा ऽन्वयो घटे ऽन्वय एवं मु
खं चंद्र इत्यत्र स्वं चंद्रस्तद्वृत्त्याह्लादकत्वादिसंबंधेन चंद्रादेर्मुखादावन्वय इत्यर्थस्तादृशान्वयबोधेपि मु
खं चंद्र इत्यादौ स्ववृत्त्याह्लादकत्वसंबंधेन चंद्रान्वयबोधेपि समानविभक्तिकत्वादिकं तत्र कारणं अत एव स
मानविभक्तिकत्वस्य नियामकत्वान्नातिप्रसंगः नीलो घट इत्यादिविरुद्धविभक्तिकस्थले घटादौ नीलादे
रभेदान्वयबोधरूपातिप्रसंगापत्तेरित्यर्थः आह्लादकत्वमाह्लादजनकत्वं तेन च मुखं चंद्रयोर्भिन्नमेवेति स्ववृ
त्त्याह्लादकत्वसंबंधेन मुखादौ चंद्रादेरन्वयासंभवो ऽन्यवृत्तिधर्मस्य अन्यसंबंधतानंगीकारे नीलघ
टपदघटितनीलो घट इतिवाक्यस्य प्रामाण्यापत्तिरत्र स्वरसो वदंतीत्यनेन सूचितः अत्र सादृश्य
बोधकेवादिपदघटितवाक्ये उपमालंकारस्तदभावे रूपकालंकारस्तथा च मुखं चंद्र इत्यादिरूपकस्थले चंद्रा
दिपदस्य चंद्रादिसदृशे लक्षणा सत्वेपि उपमारूपकयोर्वैलक्षण्यानुपपत्तिरिति बोध्यं अथ राजप्रकारकत्व
संसर्गकपुरुषविशेष्यकान्वयबोधजनकराजादिपदजन्यराजपदार्थोपस्थितिघटितराजप्रकारकत्वयो
ग्यताज्ञानादिरूपसामग्रीसत्वाद्राजा पुरुष इत्यत्र कथं न तादृशबोध इत्यभिप्रायवानाशंकते अथ राजा पुरु

भट्टा॥

ष इत्यादाविति ननु राजा पुरुष इत्यत्र भेदान्वयबोधस्वीकारे निपातातिरिक्तनामार्थयोर्भेदेन साक्षादन्वयबो
धो ऽव्युत्पन्न इति नियमभंगस्यास्यादित्यत आह सामग्र्याः कार्यजनन इति सामग्र्याः पदसमभिव्याहारादिरू
पसामग्र्याः कार्यजनने स्ववृत्तसंबंधेन राजविशिष्टः पुरुष इति ज्ञानबुद्धिजनने उक्तनियमभंगो न बाधकः तत्र
हेतुमाह सामग्रीसत्वे सत्येव कार्यमिति नियमादिति राज्ञः पुरुष इत्यत्र भेदान्वयरूपफलोदयात्तल्ल
ज्ज्वीभूताकांक्षास्तीति ज्ञायते कार्येण कारणमनुमेयमिति न्यायात् राजा पुरुष इत्यत्र भेदान्वयबोधानुदयात्तल्लया
जवीभूताकांक्षा नास्तीति कथं तत्र भेदान्वय इत्यत्र अन्वयेनाह नच तत्र भेदान्वयबोधोपपत्तिरिति राज्ञः पुरुष इत्य
त्र भेदान्वयबोधप्रयोजकपदसमभिव्याहारज्ञाने योग्यताज्ञानादिघटितसामग्री यथास्ति तथा राजा पुरुष
इत्यत्रापि राजादिपदसमभिव्याहार राजप्रकारकयोग्यताज्ञानादिघटितसामग्रीवर्तते एवेति कथं न तत्र रा
जप्रकारकभेदान्वयबोध इत्यत आह समभिव्याहाररूपेति अथ राजप्रकारकभेदसंसर्गसशब्दान्वयबोधे
राजपदाव्यवहितोत्तरङस्पदत्वरूपानुपूर्वीविशेषस्य प्रयोजकत्वं कुतः मितिकृतः प्रयोजकता दृशानुपूर्वीविशे
षाभावात् राजा पुरुष इत्यत्र तादृशान्वयबोध इत्यत नच तादृशाकांक्षायास्तत्वेति तत्र राजा पुरुष इत्यत्र तादृशाकां
क्षायाः पदाव्यवहितोत्तरङस्पदत्वरूपानुपूर्वीविशेषाकांक्षाया अभावादेव न तत्र राजा पुरुष इत्यत्र राजप्रकारकपुरुषवि
शेष्यकभेदसंसर्गकशाब्दबोधापत्तिरित्यर्थः। अथ राजप्रकारकषष्ठ्यर्थसंबंधविशेष्यकभेदसंसर्गकबोधे राजपदा

व्यवहितोत्तरस्य उक्तरूपानुपूर्वीविशेषस्य प्रयोजकत्वेपि राजप्रकारकभेदसंसर्गकपुरुषविशेष्यकशाब्दं प्रतितस्य
प्रयोजकत्वं नास्तीति तद्विरहेपि तादृशान्वयबोधप्रयोजकपदसमभिव्याहाररूपाकांक्षायास्तत्र सत्त्वाद्राजप्रकारक
स्वत्वसंसर्गकपुरुषविशेष्यकान्वयबोधस्य निराबाधत्वात् एवं स्यादह संबंधादिविशेष्यकेति नादृशाकांक्षाज्ञानरूपकारण
विरहस्यापि किंचित्करत्वादिति राजपदाव्यवहितोत्तरस्य उक्तरूपाकांक्षाज्ञानं राजप्रकारकषष्ठ्यर्थस्वत्वविशे
ष्यकबोध एव कारणं न तु राजप्रकारकपुरुषविशेष्यकभेदसंसर्गकबोधे इति तादृशान्वयबोधानतिप्रसंगः? नादृशानु
पूर्वीविशेषरूपाकांक्षाज्ञानविरहात्। किंचित्करो ननु राजप्रकारकस्वत्वसंसर्गकपुरुषविशेष्यकशाब्दाभावप्रयो
जकत्वमस्यार्थः अथ राजा पुरुष इत्यादिसमानविभक्तिकपदघटितवाक्याद्भेदान्वयबोधः सर्वानुभवविरुद्ध इति त
त्कारणप्रकारं दर्शयितुं निपातातिरिक्तव्युत्पत्तिनिर्वाहकत्वार्यकारणभावं दर्शयति अत्रेत्यादि स्वाना? समानावि
शेष्यतापरस्या सत्या शाब्दबोधीयविशेष्यताविशिष्टविशेष्यतासंबंधेन तथा च नामार्थनिष्ठभेदसंसर्गावच्छि
न्नप्रकारतानिरूपितविशेष्यतासंबंधेन शाब्दं प्रति शाब्दबोधीयविशेष्यताविशिष्टविशेष्यतासंबंधेन प्रत्यय
जन्योपस्थितेर्हेतुत्वकल्पनात् राज्ञः पुरुष इत्यत्र निरूपितत्वसंसर्गकराजप्रकारकबोधः विशेष्यतासंबंधेन
उक्तस्य प्रत्ययार्थे स्वत्वे वर्तते तत्र विशेष्यतासंबंधेन उक्तप्रत्ययजन्योपस्थितिर्हेतुरस्त्येव राजा पुरुष इत्यत्र तु
नामार्थे पुरुषे विशेष्यतासंबंधेन प्रत्ययजन्योपस्थितिरूपहेतुर्नास्तीति न तथा पुरुषविशेष्यतासंबंधेन राजप्र

कारकभेदसंसर्गकबोध आपाद्यते इति भावः नादृशकार्यकारणभावे व्यतिरेकव्यभिचारमाशंकते न च संबंधोपि
नामार्थस्तथा च राज्ञः पुरुष इत्यत्र राजनिरूपितस्वत्वप्रकारकाश्रयत्वसंसर्गकपुरुषविशेष्यकान्वयबोधो
भवति सोपि न स्यात् षष्ठ्यर्थसंबंधस्य स्वत्वस्यापि संबंधरूपनामार्थतया स्वत्वरूपनामार्थतया
च तत्प्रकारकोपि कोपि बोधो भवत्येव स च बोधो विशेष्यतासंबंधेन पुरुषे स्ति तत्र पुरुषे विशेष्यता
संबंधेन प्रत्ययजन्योपस्थितिर्नास्तीति व्यतिरेकव्यभिचारादित्यर्थः व्यतिरेकव्यभिचारमुद्धर
ति तत्र नामपदजन्येति तथा च राज्ञः पुरुष इत्यत्र राजनिरूपितस्वत्वप्रकारकबोधस्य उक्तस्य प्रत्य
यजन्यत्वेन संबंधांशेपि पदजन्यत्वाभावात् संबंधादितत्तन्नामपदजन्यतत्तन्नामार्थप्रकारकशाब्द
बुद्धित्वरूपप्रत्ययजन्योपस्थितिजन्यतावच्छेदकानाक्रांततया पुरुषविशेष्यतासंबंधेन प्रत्ययजन्यो
पस्थितिविरहेपि विशेष्यतासंबंधेन राजस्वत्वप्रकारकबोधाभावादिति भावः। एवं व्यभिचारवा
रणेपि पुनरपि व्यभिचारमुपपादयन् शाब्दबोधानुपपत्तिमुपपादयति राजसंबंधः प्रमेय इतित
था च राजसंबंधः प्रमेयः राज्ञः पुरुष इति वाक्यद्वयजन्यो यः प्रमेयाभिन्नः राजसंबंधः राजसंबंधव
त्पुरुष इत्याकारकः समूहालंबनात्मकबोधस्तस्य संबंधरूपतत्तन्नामपदजन्यत्वेन प्रत्ययजन्योप
स्थितिरूपहेत्वभावादित्यर्थः। समाधत्ते प्रत्ययाधीनेत्यर्थोपस्थित्यजन्येति प्रत्ययाधीनायान्त

व्यु॰टी॰

तत्तर्थोपस्थितिस्तस्यस्य संबंधादिरूपार्थस्योपस्थितिस्तादजन्यायस्तादर्थप्रकारकस्तत्तन्नामार्थप्रकार
कः शाब्दबोधो विशेष्यता संबंधेन तादृशशाब्दबोधत्वावच्छिन्नं प्रतिशाब्दबोधीयविशेष्यताविशि
ष्ट विशेष्यता संबंधेन प्रत्ययजन्योपस्थितेर्हेतुत्वोपगमादित्यर्थः राज्ञः पुरुष इत्यत्र ङस्प्रत्ययाधी
नायास्वत्व संबंधरूपतत्तर्थोपस्थितिस्तज्जन्यएव शाब्दबोधः स्वत्वात्मकसंबंधरूपतदर्थप्रका
रको राजनिरूपितस्वत्ववान्पुरुष इत्याकारको बोधः सच प्रत्ययजन्योपस्थितिजन्यतावच्छेदकीभूत
प्रत्ययाधीनतत्तर्थोपस्थितिजन्यतत्तदर्थप्रकारकशाब्दबुधित्वानाक्रांत इति विशेष्यता संबं
धेन पुरुषे जायमाने राजनिरूपितस्वत्ववान्पुरुष इति बोधे प्रत्ययजन्योपस्थितिर्नापेक्षिताऽपि
तु ङस्प्रत्ययाधीनसंबंधादिरूपतत्तर्थोपस्थितिरन्यराजादिरूपनामपदाधीनराजादिरूप
तत्तदर्थोपस्थितिजन्ये निरूपितत्वसंसर्गकराजप्रकारकबोधे प्रत्ययजन्योपस्थितेर्विशेष्यता
प्रत्यासत्त्याऽपेक्षितत्वात्साचोपस्थितिर्निरूपितत्वसंसंसर्गावच्छिन्नराजनिष्ठप्रकारतानिरूपि
तविशेष्यताश्रयीभूतङस्प्रत्ययार्थस्वत्वात्मकसंबंधेऽस्तीतिनतादृशवाक्यहृदयजन्यसमूहालंब
नात्मकबोधे पुरुषस्य विशेष्यतयाभानानुपपत्तिर्नवाव्यभिचारः प्रमेयाभिन्नो राजसंबंधवा
न्पुरुष इति समूहालंबनात्मकस्याश्रयत्वसंसर्गकराजनिरूपितस्वत्वात्मकषष्ठ्यर्थसंबंधप्रकार

६१

कबोधस्य प्रत्ययाधीनतत्तदर्थोपस्थितसजन्यतत्तदर्थप्रकारकशाब्दबुधित्वरूपप्रत्ययजन्योपस्थिति
जन्यतावच्छेदकानाक्रांतत्वादिति भावः ननु निरूपितत्वसंसर्गावच्छिन्नराजनिष्ठप्रकारतानिरू
पितविशेष्यत्वाभिन्नाश्रयत्वसंसर्गावच्छिन्नस्वत्वात्मकषष्ठ्यर्थसंबंधनिष्ठप्रकारतानिरूपित
पुरुषनिष्ठविशेष्यताशालिबोधस्य राज्ञः पुरुष इति वाक्यघटकराजपदङस्पदपुरुषपदाधीनतत्त
दर्थोपस्थितिजन्यत्वेन राजप्रकारकशाब्दबोधस्यापि ङस्प्रत्ययाधीनतत्तदर्थोपस्थितिजन्यत्वात्त
त्तया प्रत्ययाधीनतत्तदर्थोपस्थितिजन्यशाब्दबोधस्यैवाप्रसिध्या निरुक्तकार्यकारणभावो
निर्युक्तिक एवेति चेन्न तादृशबोधस्य तादृशशाब्दबुधित्वेन वाक्यघटकङस्पदजन्यत्वेपि राज
प्रकारशाब्दबुधित्वेन ङस्प्रत्ययाधीनतत्तदर्थोपस्थितिजन्यत्वाभावात् ङस्प्रत्ययाधीनतत्तदर्थो
पस्थितेः स्वत्वात्मकसंबंधविशेष्यकस्वत्वात्मकसंबंधप्रकारकशाब्दबुधित्वावच्छिन्नं प्रत्येवकार
णत्वात् राजप्रकारकशाब्दबोधे ङस्प्रत्ययाधीनतत्तदर्थोपस्थितिजन्यत्वसत्वेन तादृशशाब्दबोधस्य
प्रसिध्या निरुक्तकार्यकारणभावस्य निर्दुष्टत्वादिति भावः ॥ अथ राजा पुरुष इत्यत्र राजप्रकारकप्र
सिध्यानिरुक्तकार्यकारणभावस्य निर्दुष्टत्वादिति भावः ॥ अथैवमपि त्यादिन
द संसर्गकशाब्दबोधापत्तिस्तादृशकार्यकारणभावस्वीकारेपि तदवस्थैवेत्याह ॥ अथैवमपीत्यादिना
यत्र राजपुरुष इत्यत्र पुरुषपदाधीनपुरुषोपस्थितिर्नोपुरुषपदशालिज्ञानजन्यसंमूहालंबनात्म

व्यु॰धी॰

कपुरुषोपस्थितौ पुरुषपदशक्तिज्ञानजन्यसंस्कारालंबनात्मकपुरुषोपस्थितौ प्रत्ययवत्त्वात् प्रत्ययवत्त्वाधःकृतश्चेद्
कत्वादिरूपः प्रत्ययार्थो विषयीभूतः पुरुषः एवं चेत्तेनैवंविधासंस्कारालंबनोपस्थितिरूपस्याः विशेष्यतासंबं
धेन पुरुषेऽपि सत्त्वात् तस्य पुरुषस्य राजप्रकारकस्वत्वादिरूपभेदसंसर्गकस्वत्वसंबंधेन राजवान् पुरुष इति
बोधे भानापत्तिर्दुर्वारेत्यर्थः प्रत्ययाधीनतत्तदर्थोपस्थितेस्तज्जन्यतत्तदर्थप्रकारकशाब्दबुद्धित्वावच्छिन्नं प्रति
प्रत्ययजन्यतावच्छेदकीभूतविशेष्यतासंबंधेन प्रत्ययजन्योपस्थितेः कारणत्वोपगमादेव तादृशापत्तेर्वारणी
यत्वादित्याह नचेति प्रत्ययजन्यतावच्छेदकीभूतेति एवं कत्वादितत्प्रत्ययार्थनिष्ठविशेष्यतासंबंधेनोपस्थितिं
प्रति तत्तत्प्रत्ययत्वेन प्रत्ययस्य तत्तत्प्रत्ययज्ञानत्वेन तत्तत्प्रत्ययज्ञानस्य वा कारणतासंसर्गशक्तिज्ञानरूपव्यापारानुबं
धिनी एवं पुरुषादिनामार्थनिष्ठविशेष्यतासंबंधेनोपस्थितिं प्रति शक्तिज्ञानरूपव्यापारानुबंधिनो पुरुषादिना
मपदस्य कारणता पुरुषादिनामपदज्ञानस्य वा तथा च स्वत्वादिप्रत्ययजन्यतावच्छेदकीभूतविशेष्यता पुरुषनिष्ठ
स्वत्वादिप्रत्ययार्थ एव कत्वादेरेवेति प्रत्ययजन्यतावच्छेदकीभूतविशेष्यतासंबंधेन प्रत्ययजन्योपस्थितेः पुरुषनि
ष्ठ एव न तु पुरुषे इति प्रत्ययाधीनतत्तदर्थोपस्थितिस्तज्जन्यराजादिरूपतत्तदर्थप्रकारकशाब्दबोधः पुरुषे
आपादयितुं न शक्यत एव न च पुरुषे तादृशोपस्थितिनिरूपककारणविरहात् आजायतां तादृशबोधः पुरुष
निष्ठेत्वेन तु राजप्रकारकस्वत्वसंसर्गकशाब्दबोधो विशेष्यतासंबंधेन स्यात्तत्र प्रत्ययजन्यतावच्छेदकी

९३

भूतविशेष्यतासंबंधेन प्रत्ययजन्योपस्थितिनिरूपककारणसत्त्वादिति वाच्यं पुरुषनिष्ठत्वेन तादृशोपस्थिति
सत्त्वेऽपि राजनिरूपितस्वत्वसंसर्गत्वस्य योग्यताज्ञाननिरूपककारणताभावादिति भावः एवमपि राजा पुरुष
इत्यत्र भेदान्वयबोधमुपपादयति ज्ञानभेदेन विशेष्यताभेदादिति यत्र कुत्रचित् तादृशस्थले प्रत्ययाद
र्शनस्थल एव अथवा जानातीत्यत्र लिङ्प्रत्ययत एव लक्षणया पुरुषाद्युपस्थितिः तत्र पुरुषे यानि
तादृशोपस्थितिनिरूपिता उःस्प्रत्ययलक्षणाधीनपुरुषोपस्थितिनिरूपिता उःस्प्रत्ययलिङ्प्रत्ययान्यतरज
न्यतावच्छेदकीभूतविशेष्यता तदपेक्षया पुरुषादिपदशक्तिज्ञानजन्यपुरुषे यानि तादृशोपस्थितिनिरूपिता उः
स्प्रत्ययलक्षणाधीनपुरुषोपस्थितिनिरूपिता लिङ्प्रत्ययलक्षणाधीनपुरुषोपस्थितिनिरूपिता उःस्प्र
त्ययलिङ्प्रत्ययान्यतरजन्यतावच्छेदकीभूतविशेष्यता तदपेक्षया पुरुषादिपदशक्तिज्ञानजन्यपुरु
षाद्युपस्थितिविशेष्यताया विषयभेदेन विशेष्यताभेदाङ्गीकारेऽपि ज्ञानभेदेन विशेष्यतासंबंधभेदाभावा
त्पुरुषविषयविषयस्यैक्यादभिन्नतया तावतापि प्रत्ययजन्यतावच्छेदकीभूतविशेष्यतासंबंधेन प्रत्य
यजन्योपस्थितेस्तु तदङ्गीकारेणापि उक्तातिप्रसंगस्य वारणासंभवादित्यर्थः तथा च राजा पुरुष इत्यत्र राजप्रकारकस्व
त्वादिरूपभेदसंसर्गकपुरुषविशेष्यकशाब्दापत्तिनिवारणाय निपातनामिन्नरिक्तनामार्थयोरिति व्युत्पत्तिनिर्वा

स्थि

व्यु॰टी॰।

हेतुः प्रत्ययाधीनतत्तदर्थोपस्थितिर्हेतुरिति कार्यकारणभावः एवमपि पुरुषपदाधीनपुरुषान्तरस्य प्रत्ययाधीनत्त्
त्त्हालंबनात्मिकायाः पुरुषएकत्वानिच्छिन्नप्रत्ययजन्योपस्थितेः पुरुषेसत्वात्तादृशशाब्दबोधापत्तिस्तद्वारणाय प्र
त्ययजन्योपस्थितिहेतुतानिर्वाहकविशेष्यतासंबंधेनप्रत्ययजन्यतावच्छेदकीभूतत्वंविशेषणमुपात्तंतत्तथोपस्थिता पि
शाइत्यत्रऽस्य प्रत्ययलक्षणाधीनप्रत्ययजन्योपस्थितिनिरूपिताप्रत्ययजन्यतावच्छेदकीभूतायापुरुषनिष्ठविशेष्य
तासैवराजापुरुषइत्यत्रपुरुषपदाधीनपुरुषोपस्थितिनिरूपितापुरुषनिष्ठविशेष्यताज्ञानभेदेनविशेष्यताभावादि
ति प्रत्ययजन्यतावच्छेदकीभूतविशेष्यतासंबंधेनप्रत्ययजन्योपस्थितिरूपहेतोः पुरुषेसत्वात्तादृशशाब्दबोधा
पत्तिस्तदवस्थेवेतिभावः अथप्रत्ययजन्योपस्थितिहेतुतानिर्वाहकविशेष्यतासंबंधेनप्रत्ययजन्यतावच्छेद
कीभूतत्वरूपंविशेषणमुपेक्ष्यस्वजनकज्ञानीयप्रत्ययवृत्तिप्रकारतानिरूपितविशेष्यताविशिष्टत्वरूपंविशेष
णमुपपादयन्नुक्तातिप्रसंगंवारयितुं स्वजनकज्ञानीयेति राज्ञइत्यत्र स्वंऽस्य प्रत्ययजन्यास्वत्वमित्याकारोपस्थितिस्तज्ज
नकंज्ञानं स्वं संऽस्य प्रत्ययवाक्यं नामवृत्तिसंबंधेनऽस्य तत्पदविषयकंज्ञानंपदपदार्थसंबंधस्यनामत्वेनतादृशज्ञानी
यावृत्तिसंबंधावच्छिन्नाऽस्य प्रत्ययनिष्ठाप्रकारतातन्निरूपितविशेष्यतास्वरत्वे स्ति अथच स्वत्वमित्युपस्थितिविशेष्यतापि
स्वत्वे स्तीतिसामानाधिकरण्यसंबंधेनस्वजनकज्ञानीयप्रत्ययनिष्ठप्रकारतानिरूपितविशेष्यताविशिष्टाऽस्य प्रत्ययजन्यो

८४

३४॥

पस्थितिनिरूपितास्वत्वनिष्ठविशेष्यताभवतीतितत्संबंधेनप्रत्ययजन्योपस्थितिरूपकारणसत्वात्ऽस्य प्रत्ययार्थस्वत्वे
प्रत्ययाधीनतत्तदर्थोपस्थितिजन्यराजरूपतत्तदर्थप्रकारकशाब्दधीर्भवत्येवराजापुरुषइत्यत्र पुरुषपदोत्तरसुप्रत्ययार्थ
एकत्वपुरुषोभयविषयकसमूहालंबनात्मिकायाः पुरुषएकत्वमित्याकारोपस्थितेस्तन्निरूपितविशेष्यतापुरुषेस्तिस्वपदा
र्थतादृशोपस्थितिजनकंयत्सुत्वावच्छिन्नसंबंधेनसुप्रत्ययवदेकत्वमितिवृत्तिज्ञानंतन्निरूपितासुप्रत्ययनिष्ठप्रकारतातन्निरूपि
ताथविशेष्यतासापुरुषेनास्त्यपि त्वेकत्वएववर्ततइतिवैयधिकरण्येन सामानाधिकरण्याभावात् सामानाधिकरण्यसं
बंधेनस्वजनकज्ञानीयप्रत्ययनिष्ठप्रकारतानिरूपितविशेष्यताविशिष्टप्रत्ययजन्योपस्थितिविशेष्यतायाःपुरुषेऽ
भावेनतादृशविशेष्यतासंबंधेनप्रत्ययजन्योपस्थितिरूपकारणविरहात्पुरुषेप्रत्ययाधीनतत्तदर्थोपस्थितिजन्यराजरूप
तत्तदर्थप्रकारकस्वत्वसंसर्गकशाब्दबोधापत्तिरितिभावः प्रत्ययस्यद्वैविध्योपपादनमुखेनोक्तकार्यकारणभावकल्पना
संभवमुपपादयन्नियामकान्तराभावेनप्रत्ययत्वमेकमनुगतं दर्शयति नदस्यादिना प्रत्ययत्वंवा
ति अनुगतानतिप्रसक्तस्यादेर्वचनीयात्वेवक्तव्यत्वेऽस्यार्थः तथाहि प्रत्ययत्वंजातिरुतोपाधिर्नाद्यः सुप्त्वादि
नासंकरप्रसंगात्तथाहि परस्परात्यंताभावसमानाधिकरणयोर्धर्मयोरेकत्रसमावेशःसंकरस्तथाच सुप्त्वंविहायप्रत्य
यत्वं तिङ्प्रत्यये प्रत्ययत्वंविहायसुप्त्वंसुवादावितिसुप्त्वात्यंताभावसमानाधिकरणप्रत्ययत्वात्यंताभावसमानाधि
करणसुप्त्वयोरेकत्रसुप्रत्ययेसमावेशोनलक्षणसमन्वयादिति नापिद्वितीयः तस्यनिर्वक्तुमसंभवात् तथाहिनच
प्रकृतेः परत्वे प्रयुज्यमानत्वंप्रत्ययत्वमितिवाच्यंवृक्षादावव्याप्तेः नचप्रकृतेः पूर्वपरान्यतरत्वे प्रयुज्यमानत्वं

व्यु.टी.।

दिनिवाच्यं गौरवात् प्रत्ययविधातुद्देश्यत्वरूपप्रवृत्तिनिमित्तघटितत्वेनान्योन्याश्रयाच्च तादृशसंबंधेन प्रत्ययपदवत्त्वं तदित्यपि न प्रत्ययपदात्सुप्तिङादिबोधेत्यत्र इति अस्याधुनिकसंकेतत्वेन सुप्तिङादावीश्वरीयसंकेतरूपप्रत्ययपदशक्त्यसंभवात् पाणिनीयसंकेतसंबंधेन प्रत्ययपदवत्त्वं तदित्यपि नेत्याह नवीनपाणिनीयतंत्राणां तज्ज्ञानानुपपत्तेरिति हि कुतस्तत्कार्यकारणभावकल्पनायाः प्रत्ययाधीनेत्यादिना शाब्दं प्रति तादृशविशेष्यतासंबंधेन प्रत्ययजन्योपस्थितेः कारणत्वकल्पनाया असंभवादित्यर्थः ननु सत्तु यथा तथा प्रत्ययत्वं स्यात् तथापि तादृशशाब्दं प्रति स्वरूपसत्प्रत्ययजन्योपस्थितेः कारणत्वमुत प्रत्ययत्वेन ज्ञातप्रत्ययजन्योपस्थितिः कारणमिति चेन्नाथ इत्याह राजसंबंध इति संबंधादिपदे ऊर्ध्वपदत्वभ्रमदशायां करणपाठवेन राजसंबंधः पुरुष इत्यस्य स्थाने राज्ञः पुरुष इति श्रावणात् भ्रमज्ञानदशायां राजप्रकारकसंबंधविशेष्यकबोधो जायते तादृशविशेष्यतासंबंधेन स्वरूपसत्प्रत्ययजन्योपस्थितिरूपकारणं नास्तीति तादृशान्वयबोधो न स्यादित्यर्थः किंच राज्ञः पुरुष इत्यादौ करणपाठवेन राज्ञ इत्यस्य स्थाने राजसंबंध इति श्रवणात् भ्रमज्ञानदशायां राजप्रकारकनिरूपितत्वसंसर्गकसंबंधविशेष्यकबोधो न जायते तत्र तादृशविशेष्यतासंबंधेन स्वरूपसत्प्रत्ययजन्योपस्थितिरूपकारणमस्तीति तादृशान्वयबोधः स्यादिति प्रत्ययाधीनेत्यदर्थोपस्थित्यजन्याधुनिकशाब्दं प्रति स्वरूपसत्प्रत्ययजन्योपस्थितेः कारणकल्पनानसंभवतीति भावः द्वितीयपक्षमनद्य दूषयति न च प्रत्ययत्वेनेत्यादिना वेशासंभवादित्यंतेन एतद्दोषद्वयस्य राजस

५८

श्री

बंधे तत्र संबंधपदे ऊर्ध्वपदत्वभ्रमदशायां तादृशशाब्दबोधानुपपत्तिरूपदोषस्य राज्ञ इत्यत्र ऊर्ध्वपदे संबंधपदत्वभ्रमदशायां तादृशशाब्दबोधापत्तिरूपदोषस्य च नानवकाशः प्रथमस्थले राजसंबंध इत्यत्र संबंधपदस्य ऊर्ध्वप्रत्ययत्वेन ज्ञातत्वात् प्रत्ययत्वेन ज्ञातप्रत्ययजन्योपस्थितिरूपकारणसत्त्वेन तादृशशाब्दबोधापपत्तिसंभवात् द्वितीयस्थले राज्ञ इत्यत्र ऊर्ध्वप्रत्ययस्य संबंधपदत्वेन ज्ञानतया प्रत्ययत्वेन ज्ञातप्रत्ययजन्योपस्थितिरूपकारणाभावात् तादृशशाब्दबोधापत्त्यसंभवादित्यर्थः अथ षष्ठ्यादेः ऊर्ध्वप्रत्ययत्वाधनुपस्थितिदशायामपि राज्ञः पुरुष इत्यानुपूर्वीविशेषज्ञानाधीनतत्पदार्थोपस्थितिमतस्तादृशबोधो सत्त्वात् तादृशशाब्दं प्रति प्रत्ययत्वेन ज्ञातप्रत्ययजन्योपस्थितेः कारणत्वासंभव इत्याह राज्ञः पुरुष इत्यादावित्ति न चैवं राजा पुरुष इत्यादावानुपूर्वीविशेषप्रकारकेति राज्ञः पुरुष इत्यत्र ऊर्ध्वकारान्तरसत्त्वरूपानुपूर्वीमत्त ऊर्ध्वपदभिन्नज्ञानं तत्पदार्थोपस्थितौ ऊर्ध्वपदार्थसंबंधोपस्थितौ कारणं न तु ऊर्ध्वसादिः प्रत्ययाभवनीत्यपि तन्नूनं शाब्दबोधकारणमिति भावः न चैवं राजा पुरुष इत्यादावपि राजादिप्रकारकत्वस्वत्वादिरूपभेदसंसर्गकशाब्दबोधापत्तिरत आह इदं पुनरत्र नवीनमिति अत्र राजा पुरुष इत्यादिसमानविभक्तिस्थले पुनरिदं तत्त्वं अप्रसिद्धस्यापादनासंभव इति अथ राजप्रकारकभेदान्वयबोधस्याप्रसिद्धिं प्रदर्शयति यत्र षष्ठ्यादिविभक्तिरेव स्वारसिकलक्षणयेति सादिनात्पर्यविषयलक्षणयेत्यर्थः ननु सुब्विभक्तौ न लक्षणा अन्यथा संबंधषष्ठ्येव लक्षणया कर्तृत्वकर्मत्वप्रकारकबोधसंभवे कर्तृकर्मणोः कृतीति सत्रप्रणयनं व्यर्थं स्यादित्यत आह शक्तिभ्रमेणवेति तथा च राज्ञो ऽस्तीत्यत्र ऊर्ध्वसुब्विभक्तिलक्षणाभ्रमजन्योप

४२५० ४१ व्यु.टी.

स्थिति विषयपुरुषविशेष्यता संबंधेन प्रसिद्धस्य राजप्रकारकस्वत्वसंसर्गकबोधस्य राजापु
रुष इत्यत्रापादनं संभवतीति भावः राज्ञो स्तीत्यत्र तादृशान्वयबोधस्य प्रसिद्धत्वेपि तस्थलीय तज्जनकसाम
ग्र्यभावादेव राजापुरुष इत्यत्र तदापादनमशक्यमित्याह नहीति तादृशबोधे इति राज्ञो स्तीत्यादिस्थलीय राजप्र
कारकस्वत्वसंसर्गकबोधे या राजपदाव्यवहितोत्तरङस्पदत्वरूपतथाविधप्रकृतिप्रत्यययोरानुपूर्वीरूपाकांक्षाज्ञा
नं तेन सहकृतानहि भक्तिलक्षणाज्ञानशक्तिभ्रमजन्यपुरुषाद्युपस्थितिरित्यादिरूपासमग्री तस्याएव तादृशा
बोधोत्पत्तिनियामकत्वं तस्या राजप्रकारकस्वत्वसंसर्गकपुरुषविशेष्यकबोधोत्पत्तिनियामकत्वं तस्यास्तदभावादेव
राजपदाव्यवहितोत्तरङस्पदत्वरूपानुपूर्वीविशेषरूपाकांक्षाज्ञानसहकृतस्य विभक्तिलक्षणाशक्तिमदन्यत
रजन्यपुरुषाद्युपस्थितिघटितसामग्र्यभावादेवेति तदापत्तिः राजापुरुष इत्यादौ तादृशबोधापत्तिरित्यर्थः अत
एवेति निरस्तमित्यन्वयेन तान्वयेति तथाच अतएव वक्ष्यमाणादेवेति निरस्तमित्यर्थः इतीति किंमित्याकांक्षायामिति
पदद्यासक्तिमाह स्वत्वादिसंबंधेनेति तत्पदं राजप्रकारकस्वत्वसंसर्गकपुरुषविशेष्यकबोधपरमिति तात्पर्यवि
षयतदादिपदघटितात्सुन्दरः इत्यादिवाक्यात् प्रसिद्धस्य राजप्रकारकस्वत्वसंसर्गकबोधस्य राजापुरुषसुन्दर इत्या
ज्ञान दौ पदार्थोपस्थितितात्पर्यविशेषादिरूपसामग्रीबलात्पदाभिरित्यर्थः अत एवास्या निदर्शवक्ष्यमाणदूषण
मेवाह ससुन्दर इत्यादिना ससुन्दर इत्यादिवाक्याधीनशाब्दसामग्र्याः तत्पदं प्रथमांतसुन्दरादिपदसमभिव्याहृ
तमिति समभिव्याहारज्ञानसहकृतात्तत्पदं राजप्रकारकस्वत्वसंसर्गकपुरुषविशेष्यकबोधपरमिति तात्पर्यज्ञा

९६

तसहकृतात्तत्पदं राजप्रकारकस्वत्वसंसर्गक(त्वे) यात्तत्पदशक्तिज्ञानजन्यस्वत्वसंबंधेन राजविशिष्टपुरुषोपस्थितिसहकृ
तितस्या तदभावादेव ससुन्दर इत्यादिस्थलीयसामग्र्यभावादेव राजापुरुषः सुन्दर इत्यादौ तादृशशाब्दापत्तिरि
त्यर्थः अथेत्यादि चेदित्यन्तेन ग्रंथेन संसर्गतावादिमतेपदत्रयान्वयाशंकृते अथेति एतादृशरीत्यापत्तिवारणे स
मभिव्याहारविशेषस्य कारणत्वस्वीकारे राजापुरुष इत्यत्र राजप्रकारकस्वत्वसंसर्गकपुरुषविशेष्यकशाब्दबोधा
पत्तिवारणे राज्ञः पुरुष इत्यादौ स्वत्वसंसर्गकराजप्रकारकपुरुषविशेष्यकान्वयबोधस्वीकारेपि क्षतिविरहात्तथ
थयं तराजपदत्वावच्छिन्नधर्मिकप्रथमांतपुरुषपदसमभिव्याहारज्ञानस्य तादृशबोधनियामकत्वस्याभावात्तु राजा
पुरुष इत्यत्र राजप्रकारकस्वत्वसंसर्गकपुरुषविशेष्यकान्वयबोधापत्तिरूपक्षतिविरहात्तु इत्यर्थः उक्तव्युत्पत्ति
युक्तिकृतेति निपातातिरिक्तनामार्थयोः क्रियातादृशप्रातिपदिकार्थयोश्च भेदेन साक्षादन्वयबोधो व्युत्पन्नइति
रर्थकृत्यर्थः पष्ठ्यंतराजपदसमभिव्याहारस्य तादृशबोधनियामकत्वस्याभावादेव राजापुरुष इत्यादितः स्वत्वरू
पभेदसंसर्गकराजप्रकारकशाब्दापत्तिवारणे नामार्थयोरिति व्युत्पत्तिर्निर्गलित्वमितिभावः विभक्त्यर्थसंबंधादिवि
चक्रत्वमपि निर्युक्तिकं राज्ञः पुरुष इत्यादितः स्वत्वसंबंधेन राजवान्पुरुष इति बोधे बाधकाभावात् एवं तुलप
चतीत्यादितः स्वत्वसंबंधेन तण्डुलवान्पाक इति बोधे बाधकाभावाच्च नीलो घट इत्यादिस्थलीयविशेषण
विभक्तिवत्सर्वा अपि विभक्तयः साधुत्वार्था एवेत्यर्थः राजापुरुष इत्यत्र स्वत्वरूपभेदसंसर्गकपुरुषविशेष्य

व्यु.टी.१

कशाब्दसाब्दसामग्रीविरहमुपपादयति नहीत्यादिना तत्र राजपुरुष इत्यत्र तथाविधान्वयबोधोपगमे राजप्र
कारकस्वत्वसंसर्गकपुरुषविशेष्यकान्वयबोधोपगमेन तत्स्थलीयसामग्रीबलात् षष्ठ्यंतराजपदघटितवाक्यस्थ
लीयसामग्रीबलात् राजापुरुष इत्यादावपि तथाविधान्वयबोधप्रसंग राजप्रकारकस्वत्वसंसर्गकपुरुषविशेष्य
कान्वयबोधप्रसंगो नहि संभवति तत्स्थलीयसामग्र्याः षष्ठ्यंतराजपदघटितवाक्यस्थलीयसामग्र्याः षष्ठ्यं
तराजपदघटितवाक्यस्थलीयसामग्र्याः षष्ठ्यंतराजपदं प्रथमांतपुरुषपदसमभिव्याहृतमिति समभिव्या
हाररूपाकांक्षाज्ञानघटिततया तदभावादेव षष्ठ्यंतपदाभावादेव तत्र राजापुरुष इत्यत्र तादृशसामग्र्याः
षष्ठ्यंतराजपदं प्रथमांतपुरुषपदसमभिव्याहृतमित्याकांक्षाज्ञानघटितसामग्र्याः अभावादित्यर्थः यथा नि
पातातिरिक्तनामार्थयोरिति व्युत्पत्तिर्निरर्थया यथा वा विभक्तीनां संबंधादिवाचकत्वमपि व्यर्थं तथा राजपुरुष इति
समासे भेदान्वयस्वीकारेपि स्वत्वसंबंधेन राजविशिष्टः पुरुष इति बोधस्वीकारेपि क्षतिविरहात् राजापुरुष इत्य
त्र प्रथमाविभक्तिव्यवधानेन राजपदाव्यवहितोत्तरपुरुषपदत्वरूपानुपूर्वीविशेषरूपवक्ष्यमाणभेदान्वयबो
धनियामकाभावेन राजप्रकारकस्वत्वसंसर्गकराजप्रकारकपुरुषविशेष्यकबोधापत्तिरूपक्षतिविरहादित्यर्थः ए
तदेव पूर्वपक्षोत्तरपक्षाभ्यां उपपादयति नचेत्यादिना तत्र राजपुरुष इति समासे स्वत्वसंसर्गकबोधाभ्युपग
मे तत्स्थलीयसमासस्थलीयराजपदजन्यराजपदार्थोपस्थितिसहकृतराजप्रकारकस्वत्वसंसर्गकयोग्यता

८७॥

ज्ञानादिघटितशाब्दसामग्रीबलात् राजापुरुष इत्यादावपि तादृशबोधापत्तिः स्वत्वसंबंधेन राजवान् पुरुष इति बो
धापत्तिरिति वाच्यं नचेत्यन्वयः तत्र हेतुमाह तत्स्थलीयशाब्दबोध इति समासस्थलीयशाब्दबोध इत्यर्थः तत्र
समासस्थले राजापुरुष इत्यत्र प्रथमाविभक्त्या व्यवधानाद्राजपदाव्यवहितोत्तरपुरुषपदत्वरूपानुपूर्वी
विशेषरूपाकांक्षाज्ञानघटितसामग्र्या असिद्धेरिति भावः स्वत्वप्रकारतावादिमते धांतो जांकुते नचेत्यादिना प्रकृ
ति प्रत्यययोरिति तथा च राज इत्यत्र निरूपितत्वसंसर्गकराजप्रकारकस्वत्वविशेष्यकबोधो जायते स्वत्वमिति
वाक्यात्तु तादृशबोधो न जायत इति राजप्रकारकनिरूपितत्वसंसर्गकस्वत्वविशेष्यकान्वयबोधं प्रति राजपदाव्यव
हितोत्तरस्वपदत्वरूपानुपूर्वीविशेषरूपाकांक्षाज्ञानस्य कारणत्वं क्लृप्तं राजप्रकारकस्वत्वसंसर्गकपुरुषविशेष्य
कशाब्दबोधं प्रति राजपदाव्यवहितोत्तरपुरुषपदत्वप्रातिपदिकद्वयाव्यवधानघटितानुपूर्वीविशेषरूपाकांक्षाज्ञानस्य
कारणत्वं क्लृप्तं राजप्रकारकस्वत्वसंसर्गकपुरुषविशेष्यकशाब्दबोधं प्रति तु राजपदाव्यवहितोत्तरपुरुषपदत्वरूपप्रातिप
दिकद्वयाव्यवधानघटितानुपूर्वीविशेषरूपाकांक्षाज्ञानस्य कारणत्वं तेनोभयवादिसिद्धं प्रमाणाभावात् तथा च प्रातिपदिकद्व
याव्यवधानघटितानुपूर्वीज्ञानस्याप्रामाणिकतया कारणत्वाभावेन राजपुरुष इति समासे या राजपदजन्यराजपदार्थोप
स्थितिघटितयोग्यताज्ञानादिरूपा सामग्री सा राजापुरुष इत्यत्राप्यस्तीति अत्रापि राजप्रकारकस्वत्वसंसर्गकपुरुषविशेष्य
कबोधापत्तिस्तद्वारणाय प्रातिपदिकद्वयाव्यवधानघटितानुपूर्वीविशेषज्ञानस्य कारणत्वं कल्प्यते गौरवं परमिति चेन्न

नइति पूर्वपक्षिणामाशयः सिद्धान्तिनस्तु राजपुरुष इति समासे राजसंबंधिप्रकारकाभेदान्वयबोधे लक्षणैव नियामिका
तदभावादेव राज्ञः पुरुष इत्यत्र नापत्तिरिति तद्वारणाय राजपुरुषपदाव्यवधानघटितानुपूर्वीज्ञानस्य कारणत्वं न कल्प्यत
इति लाघवमिति भावः स्वत्वस्य संसर्गतावादी प्रतिबंधानुपूर्वीविशेषनिवेशगौरवमुद्धरति भवन्मतेपीत्यादिना भ
वन्मतेपि स्वत्वप्रकारतावादिसिद्धान्तमतेपि राजपुरुष इत्यादिसमासे यादृशसामग्रीबलात् राजपदलक्षणाज्ञान
जन्यराजसंबंध्यादिरूपपदार्थोपस्थितिघटितराजसंबंधिप्रकारयोग्यताज्ञानादिरूपसामग्रीबलात् राजसंबंधिपुरुष
पदार्थयोरभेदान्वयबोधः तथा राज्ञः पुरुष इत्यादिवाक्येपि राजपदस्य राजसंबंधिनि लक्षणायां सत्यां तादृशसामग्रीब
लात् समासस्थलीयसामग्रीतुल्यसामग्रीबलात् नियतस्तादृशाभेदान्वयप्रसङ्गवारणाय तथाविधानुपूर्वीज्ञानस्य रा
जपदाव्यवहितोत्तरपुरुषपदत्वरूपानुपूर्वीज्ञानस्य समासवाक्यजन्यराजसंबंधिप्रकारकपुरुषविशेष्यकाभेदसं
सर्गकबोधहेतुता कल्प्यते अस्माभिः प्रतिपक्षनिविष्टे स्वत्वसंसर्गतावादिभिः राजप्रकारकस्वत्वादिरूपभेदसंसर्ग
कपुरुषविशेष्यकबोध एव तादृशराजपदपुरुषपदाव्यवधानघटितानुपूर्वीज्ञानस्य हेतुता कल्प्यते इति नाधिक्यम्
इति राज्ञः पुरुष इत्यत्र प्रथमाविभक्तिकृतव्यवधानसत्त्वेन राज्ञः पुरुष इत्यत्र षष्ठीविभक्तिकृतव्यवधानसत्त्वेन ता
दृशाव्यवधानघटितानुपूर्वीविशेषरूपाकांक्षाज्ञानघटिततादृशशाब्दसामग्र्यभावेन तत्र तत्र तादृशान्वयबो
धापादनासंभवात् राज्ञः पुरुष इत्यत्र राजपदस्य राजसंबंधिनि लक्षणायां हि राजपदार्थराजसंबंधिनः स्वत्वप्र

प्रकारतावादिनये षष्ठ्यर्थसंबंध एवान्वयस्य वाच्यतया राजसंबंधी संबंधवान् पुरुष इति शाब्दबोधस्यैव संभवेन समास
स्थले नियमेन राजसंबंधिप्रकारकाभेदसंसर्गकशाब्दबोधे इष्टापत्त्यसंभवादिति भावः अथ राजपुरुष इति समा
से राजसंबंधिप्रकारकाभेदसंसर्गकशाब्दे तादृशानुपूर्वीज्ञानकारणत्वस्योभयमतसिद्धत्वेपि राजप्रकारकस्वत्वादि
रूपभेदसंसर्गकबोधे तादृशानुपूर्वीज्ञानस्य कारणत्वकल्पनमधिकमेवेत्याशंकते चेन्नेत्यादि वाच्यमित्यंतेन उभ
यमतएव स्वत्वप्रकारतावादि स्वत्वसंसर्गतावादिमतद्वयस्यापि स्वारसिकलक्षणाग्रहे तात्पर्याधीनलक्षणाग्रहे राजपु
रुष इत्यत्र राजसंबंध्यभिन्नः पुरुष इति बोधो भवति इयांस्तु विशेषः एतावन्मात्र एव भेदः यदस्मन्मते सिद्धान्तिमते ष
ष्ठ्यर्थसंबंधविशिष्टार्थे निरूढलाक्षणिकसमासत्वमिति षष्ठीतत्पुरुषलक्षणाक्रांतत्वेन तेनासौ समासः राजपुरुष इ
त्यादिसमासः षष्ठीतत्पुरुष इति भवन्मते पूर्वपक्षिमते यद्या राजपदस्य राजसंबंधिनि स्वारसिकलक्षणा सा चोभय
वादिसिद्धेति राजसंबंधित्वपुरुषत्वधर्माभ्यां विभिन्नाभ्यामेकधर्मिबोधकत्वरूपकर्मधारयलक्षणाक्रांतत्वेन राज
पुरुष इति समासः कर्मधारय इति व्यवह्रियते इति विशेषः तादृशानुपूर्वीज्ञाने हेतुताकल्पनं निमित्तं स्वारसिकल
क्षणाग्रहकाले राजपुरुष इत्यत्र राजसंबंधिप्रकारकपुरुषविशेष्यकाभेदसंसर्गकशाब्दबोधे राजपदाव्यवहितोत्तरपु
रुषपदत्वरूपानुपूर्वीज्ञानहेतुतायाः उभयमततुल्यत्वेपि पूर्वपक्षिमते राजपुरुष इत्यत्र राजप्रकारकस्वत्वसंसर्गकपुरु
षविशेष्यकशाब्दबोधं प्रति राजपदाव्यवहितोत्तरपुरुषपदत्वरूपानुपूर्वीज्ञानकारणत्वकल्पनमाधिक्यमिति पर

पक्षिणा स्वत्वसंसर्गकबोध एवेत्यंगीकर्तव्य इत्याशयः अथ पूर्वपक्षीयमते लक्षणागौरवमुद्धरति उक्ताभेदान्वयबोध
इत्यादिना राजपुरुष इति समासे निरूढलक्षणाज्ञानाधीनराजसंबंध्यभिन्नः पुरुष इति बोधे राजपदाव्यवहितोत्तर
पुरुषपदत्वरूपानुपूर्वीज्ञानहेतुतायां व्यभिचारः प्रभुजनः धनपपुरुषः भूपपुरुष इत्यादिपर्यायशब्दोत्तरघटि
तानुपूर्वीस्थलेऽनुरोधेन) राजपदाव्यवहितोत्तरपुरुषपदत्वरूपानुपूर्वीज्ञानरूपकारणाभावेऽपि राजसंबंध्यभि
न्नपुरुष इति शाब्दबोधोदयात् तद्वारणाय तादृशानुपूर्वीज्ञानानंतर्यस्य राजपदाव्यवहितोत्तरपुरुषपदत्वरूपानुपू
र्वीज्ञानाव्यवहितोत्तरत्वस्य कार्यतावच्छेदककोटौ तादृशानुपूर्वीज्ञाननिष्ठकारणतानिरूपितकार्यतावच्छेदककोटा
ववश्यंनिवेशनीयतयेत्यस्यार्थः राजपुरुष इत्यत्र स्वाव्यवहितोत्तरत्वसंबंधेन राजपदाव्यवहितोत्तरपुरुषपदत्व
रूपानुपूर्वीज्ञानविशिष्टराजसंबंधिप्रकारकाभेदसंसर्गकपुरुषविशेष्यकशाब्दबोधं प्रति राजपदाव्यवहितोत्तरपुरु
षपदत्वरूपानुपूर्वीज्ञानस्य कारणतेत्येवंविधकार्यकारणभाव एवावकल्प्यः तत्र राजसंबंधिप्रकारकाभेदसंसर्गकपु
रुषविशेष्यकत्वरूपविषयतानिवेशप्रयोजनाभावेन तन्निवेशरूपकार्यकारणभावभावकल्पने गौरवात् किंतु स्वाव्यवहि
तोत्तरत्वसंबंधेन राजपदाव्यवहितोत्तरपुरुषपदत्वरूपानुपूर्वीज्ञानविशिष्टशाब्दबुद्धित्वावच्छिन्नं प्रति राजपदा
व्यवहितोत्तरत्वसंबंधेन) पुरुषपदत्वरूपानुपूर्वीज्ञानं कारणमित्येवंविधकार्यकारणभाव एव वाच्यः तथा च स्वा

व्यवहितोत्तरत्वसंबंधेन राजपदाव्यवहितोत्तरपुरुषपदत्वरूपानुपूर्वीज्ञानविशिष्टशाब्दबुद्धित्वरूपस्य तादृशानुपूर्वी
ज्ञानकार्यतावच्छेदकस्य राजप्रकारकत्वस्य च संसर्गकपुरुषविशेष्यकशाब्दबोधसाधारण्येन राजप्रकारकाभेदान्वय
बोधे राजपदपुरुषपदाव्यवधानघटितानुपूर्वीज्ञानहेतुताया अधिकाभावादित्यर्थः एवं तंडुलं पचतीत्यादावि
ति स्वनिष्ठकर्मत्वनिरूपकत्वसंबंधेन तंडुलवान्पाक इति बोधोंगीकर्तव्यः न कुत्र कर्मत्वे द्वितीयादेः शक्तिकल्पने
तंडुलं पचतीत्यादिवाक्यजन्यबोधे कर्मत्वनिष्ठतंडुलनिरूपिताधेयतासंबंधेनस्य पाकनिष्ठकर्मतीयनिरूपकत्वसं
सर्गस्य च विषयताकल्पने गौरवादित्यर्थः ननु तंडुलं पचतीत्यत्र स्वनिष्ठकर्मतानिरूपकत्वसंबंधेन तंडुलवान्पाक इति
बोधापत्तिस्तंडुलः पचतीत्यत्र नहि संभवतीत्यर्थः तत्र हेतुमाह तादृशान्वयबोध इति तंडुलप्रकारकस्वनिष्ठक
र्मत्वनिरूपकत्वसंसर्गकपाकविशेष्यकान्वयबोधे तंडुलपदं पचतीति पदसमभिव्याहारज्ञानस्य हेतुतया
कारणतया तंडुलः पचतीत्यादौ तादृशसामग्र्याः तंडुल१पदत्वावच्छिन्नधर्मिकपचतीतिपदसमभिव्याहारज्ञान
घटितसामग्र्याः असिद्धेरित्यर्थः। एवं च पचतीति चैत्र इत्यादावपीति अत्रापि कालसंबंधेन पाकवांश्चैत्र इत्याकारक
एव बोधोंगीकर्तव्यः अन्यथा एतादृशबोधानंगीकारे तन्नीत्या तंडुलं पचतीत्यादिस्थलेऽनुरीत्या गौरवात् तं
थाहि तंडुलं पचतीत्यत्र कर्मत्वे द्वितीयाविभक्तेः शक्तिकल्पनं कर्मत्वीयसंसर्गेण शाब्दबोधविषयताकल्पनं
तथा चापि कालताबाख्यानस्य वृत्तिकल्पनं तदीयाश्रयत्वा एतत्संबंधेन शाब्दबोधाविषयताकल्पनंमि

व्यु.टी.

निगोरवादित्यर्थः पच्यते चैत्रः पाकश्चैत्र इत्यादावपि तथाविधान्वयबोधापत्तिमुद्भावयति तत्रेत्यादिना तत्र पचति
चैत्र इत्यत्र तादृशान्वयबोधस्वीकारे कृति संबंधेन पाकवांश्चैत्र इति बोधांगीकारे तत्स्थलीयपचति चैत्र इति स्थलीयायां पच
धातुजन्यपाकोपस्थितिः पाकप्रकारककृतिसंसर्गकयोग्यताज्ञानादिरूपा सामग्री तद्बलात् पच्यते चैत्रः पाकश्चैत्र इत्यादौ
तथाविधान्वयबोधापत्तेः कृति संबंधेन पाकवांश्चैत्र इत्यन्वयबोधापत्तेरप्युक्तरीत्यैव कृतिसंसर्गकपाकप्रकारकचै
त्रविशेष्यकबोधं प्रति प्रथमान्तचैत्रपदसमभिव्याहृतत्याख्यातविकरणकारकव्यानंतपचधातुपदज्ञानं कारणमिति कार्यकार
णभावस्वीकारेणैव वारणसंभवात् पच्यते चैत्र इत्यत्र प्रथमान्तचैत्रपदसमभिव्याहृतत्याख्यातविकरणकारकव्यानंतपचधातुज्ञान
घटितकारणसामग्र्यभावादेव तादृशबोधापत्त्यसंभवादित्यर्थः कर्तरि यगात्मनेपदयोरसाधुत्वाच्चैत्रः पच्यत इति प्रयोगस्य
वन संभवतीत्यत उक्तं पाकश्चैत्र इत्यादावित्ति अथ राज्ञः पुरुष इत्यत्र राजप्रकारकस्वत्वसंसर्गकपुरुषविशेष्यकान्वय
बोधस्वीकारे प्रतियोग्यन्वयोनुत्पत्तियोगक्षेमभावितिन्यायेन पुरुषो न राज्ञ इत्यत्रापि स्वत्वसंसर्गावच्छिन्नप्रतियो
गिताकराजाभाववान्पुरुष इत्येवान्वयबोधो वाच्यः स च न संभवति स्वसंबंधस्य वृत्त्यनियामकत्वेन प्रतियोगितानवच्छे
दकतया वृत्त्यनियामकसंबंधावच्छिन्नप्रतियोगिताया अप्रसिद्धत्वेन स्वत्वसंसर्गावच्छिन्नप्रतियोगिताकाभावस्य
नञा प्रत्याययितुमसंभवादिति षष्ठ्यादेः स्वत्वादिवाचकत्वमावश्यकमित्यभिप्रायेण समाधत्ते एवं राज्ञः पुरुष इत्यादिना
आवश्यकमिति तथा चाश्रयतासंबंधेन राजस्वत्ववान्पुरुष इति बोध एव राज्ञः पुरुष इत्यादौ न तु स्वत्वसंबंधेन राज

६०

वान्पुरुष इति बोध इति भावः अन्यथा स्वत्वसंसर्गकबोधे अन्यथा षष्ठ्यादेः स्वत्वादिवाचकत्वानंगीकारे राजस्वत्वाद्यभा
वेति आश्रयतासंसर्गावच्छिन्नप्रतियोगिताकतदभावो नञा प्रत्याय्यत इति नियमेन राज्ञः पुरुष इत्यत्र स्वत्वसंबंधेन राज
विशिष्टः पुरुष इति बोधस्वीकारे पुरुषो न राज्ञ इत्यत्रापि स्वत्वसंसर्गावच्छिन्नप्रतियोगिताकराजाभाववान्पुरुष इत्येव त
त्राबोधयितुं शक्यते तत्राश्रयतासंसर्गावच्छिन्नप्रतियोगिताकराजस्वत्वाद्यभावस्तस्मात्स्वत्वं षष्ठ्यर्थस्तस्याश्रयता
संबंधेन पुरुषेऽन्वयस्तथा च पुरुषो न राज्ञ इति वाक्यादाश्रयतासंसर्गावच्छिन्नप्रतियोगिताकराजस्वत्वाभावबोधोप
पत्तिरिति भावः ननु पुरुषो न राज्ञ इत्यत्र स्वत्वसंसर्गावच्छिन्नप्रतियोगिताकराजाभावबोध एव भवतु का क्षतिरित्यत आ
ह नहि तत्र स्वत्वादीति तत्र पुरुषो न राज्ञ इत्यत्र स्वत्वादिसंबंधावच्छिन्नप्रतियोगिताकराजाद्यभाव एव प्रतीयते राजस्व
त्वाद्यभावो न तु प्रतीयत इति नहि संभवतीति योजना तत्र हेतुमाह स्वत्वादिसंबंधस्य वृत्त्यनियामकत्वेनेति अत एवेति स्वा
मित्वादिसंबंधस्य निरूपकत्वाख्यस्य वृत्त्यनियामकत्वादेव नवीनाः स्वामित्वादिकं परित्यज्य स्वत्वादेः षष्ठ्यर्थत्वं स्वी
कुर्वन्तीत्यन्वयः स्वामित्वादेः षष्ठ्यर्थत्वानंगीकारे हेतुमाह स्वामित्वादेः षष्ठ्यर्थत्व इति तस्य स्वामित्वस्य रा
ज्ञः पुरुष इत्यत्र षष्ठ्यर्थस्वामित्वस्य निरूपकतासंबंधेन पुरुषेऽन्वयसंभवेपि तादृशसंबंधस्य निरूपकत्वादिसंबंधस्य वृ
त्त्यनियामकतया आधारत्वानियामकतया प्रतियोगितानवच्छेदकत्वेन प्रतियोगितावच्छेदकत्वाभावेन तत्संबंधाव
च्छिन्नाभावस्य पुरुषो न राज्ञ इत्यत्र निरूपकत्वसंसर्गावच्छिन्नप्रतियोगिताकराजनिष्ठस्वामित्वाभावस्य नञा बोधन

व्यु॰टी॰

संभवात् ननु आश्रयतासंबंधावच्छिन्नप्रतियोगिताकराजनिष्ठस्वामित्वाभाव एव पुरुषे प्रत्याय्यतां तत्र आश्रयतासं
बंधेन चैत्रस्य धनिन इत्यादौ स्वत्वं षष्ठ्यर्थः तत्संबंधः आश्रयताख्यः स च वृत्तिनियामकः चैत्रस्वत्ववद्धनमिति प्रतीतेः
यदि स्वामित्वं षष्ठ्यर्थस्तदा निरूपकत्वं तत्संबंधः स च वृत्तिनियामकः चैत्रनिष्ठस्वामित्ववद्धनमिति प्रतीतेस्तथा च स्वा
मित्वस्य षष्ठ्यर्थत्वे चैत्रस्य धनमित्यतोपि शाब्दबोधानुपपत्तेः वृत्त्यनियामकनिरूपकतासंबंधावच्छिन्नप्रतियोगि
ताकाभावस्य नञा प्रत्यायनासंभवात् यच्च यदि चैत्रनिष्ठस्वामित्वस्याश्रयतासंबंधावच्छिन्नप्रतियोगिताकाभाव एव
नञा तत्र प्रत्याय्यत इत्युच्यते तदाऽऽश्रयतासंबंधावच्छिन्नप्रतियोगिताकचैत्रनिष्ठस्वामित्वाभावस्य धने सर्वदा सत्वेन
चैत्रसंबंधिधनेपि नेदं चैत्रस्येति प्रयोगापत्तिरित्यर्थः अथ नञ्समभिव्याहृतवाक्यजन्यशाब्दबोधोपपादनाय ष
ष्ठ्यादेः स्वत्वादिवाचकत्वेपि तदसमभिव्याहृते राज्ञः पुरुष इत्यादौ षष्ठ्यादेः स्वत्वादिवाचकत्वं गौरवपराहतमित्या
शयेनाह । न च नञ्समभिव्याहारस्थलेति तस्य षष्ठ्यर्थस्वस्य तत्संसर्गस्य स्वत्वीयाश्रयतारूपसंसर्गस्य भानव
त्त्वेन शाब्दधीविषयताकल्पने गौरवादित्यर्थः । ननु नञ्समभिव्याहारस्थले च नञ्समभिव्याहारस्थलेपि रा
ज्ञः पुरुष इत्यादौ षष्ठ्यं तत्र राजपदपुरुषपदजन्योपस्थित्यादिघटितसामग्रीबलात् राजस्वत्वप्रकारकबोधो भवतु बाध
काभावादित्यत आह नञ्समभिव्याहारे रावेति तत्प्रकारकेत्यर्थः तत्प्रकारकबोधस्य स्वत्वप्रकारकबोधस्य न

६१

ञ्समभिव्याहारस्थले नञ्समभिव्याहारस्थले इत्यर्थः तथा च नञ्समभिव्याहारस्थले स्वत्वसंसर्गक एव बोध इति
भावः एतन्मूलं दूषयति एवं सतीति नञ्पदं विना नञ्पदाभावे याहृशसमभिव्याहारस्थले राज्ञः पुरुष इत्यादौ यत्र ध
र्मिणि पुरुषे येन संबंधेन आश्रयतासंबंधेन यस्य राजस्वत्वस्य विशेषणतया भानं तत्समभिव्याहारे पुरुषो न राज्ञ
इत्यादौ तत्र धर्मिणि पुरुषे तत्संबंधावच्छिन्नाश्रयतासंबंधावच्छिन्नप्रतियोगिताकस्य राजस्वत्वाभावस्य स राजस्वत्वा
भाव एव प्रतीयत इति नियमस्तामर्थ्यकृत प्रतियोग्यभावान्वयौ तुल्ययोगक्षेमाविति सर्वसिद्धनियमापलापापत्तेः नञ्
निर्मुक्ते राज्ञः पुरुष इत्यादौ राजप्रकारकस्वत्वसंसर्गकपुरुषविशेष्यकबोधस्य नञ्समभिव्याहारस्थले पुरुषो न राज्ञ इत्या
दौ चाश्रयत्वसंसर्गावच्छिन्नप्रतियोगिताकराजस्वत्वाभावप्रकारकपुरुषविशेष्यकबोधस्य पूर्वपक्षिणा स्वीकृतत्वेन स
र्वसिद्धनियमापलापस्तन्मते इत्यर्थः प्रकारान्तरेणापि संसर्गतामतं निरस्यति राज्ञः पुरुष इति पुरुष इति
वाक्यजन्ययोः प्रामाण्यज्ञानानास्कन्दितः स्वत्वसंबंधेन राजवान् पुरुष इति बोधस्तद्दशायां पुरुषो न राज्ञ इति वाक्या
त् आश्रयतासंसर्गावच्छिन्नप्रतियोगिताकराजस्वत्वाभावनिष्ठस्वरूपसंसर्गावच्छिन्नप्रकारतानिरूपितपुरुषनिष्ठ
विशेष्यताशालिबोधापत्तेरित्यर्थः नन्वेतदुमाह स्वत्वाभावबुद्धाविति आश्रयतासंसर्गावच्छिन्नप्रकारतानिरूपितप्र
तियोगिताकराजस्वत्वाभावबुद्धौ स्वत्वसंसर्गकज्ञानस्य स्वत्वसंबंधेन राजवान् पुरुष इति बोधस्य विरोधित्वे प्रतिबंधक
त्वे मानाभावात् संसर्गतावादिमते राज्ञः पुरुष इति वाक्यजन्यस्य राजप्रकारकस्वत्वसंसर्गकपुरुषविशेष्यकबोधस्य

ब्यु.टी.

पुरुषो न राज्ञ इति वाक्यजन्यस्य तत्संसर्गावच्छिन्नप्रतियोगिताकराजाभावप्रकारकस्वत्वरूपसंसर्गकपुरुषविशेष्य
कबोधं प्रति याध्याभावावगाहित्वेन प्रतिबंधकत्वेपि आश्रयतासंसर्गतावच्छिन्नप्रतियोगिताकराजस्वत्वाभावप्र
कारकस्वत्वरूपसंसर्गकपुरुषविशेष्यकबोधं प्रति याध्याभावानवगाहितया प्रतिबंधकत्वं न संभवति समानप्रका
रकसमानसंसर्गकज्ञानस्यैव याध्याभावावगाहितया विरोधित्वात् इहतु न तथा विरोधित्वं प्रकारसंसर्गभेदा
दिति भावः ननु पुरुषो न राज्ञ इत्यत्रापि षष्ठीविभक्तिः पदसाधुत्वार्थैवास्तु भवतु च स्वत्वसंसर्गावच्छिन्नप्र
तियोगिताकराजाभावबोधः तस्य नियमात् संसर्गस्याभावप्रतियोगितावच्छेदकत्व स्वीकारे दोषाभावादि
सेव तस्य नियामकसंबधस्याभावप्रतियोगितावच्छेदकत्वे घटे ज्ञानं नवेति संशयनिरासाय कदाचि
ज्ज्ञानेन घटादिकमपि प्रयुज्येत तथाहि विभक्तीनां सार्थकत्ववादिमते घटे न ज्ञानमिति वाक्यात् घटनिरूपितत्वनिभाव
ज्ञानमित्याकारकः घटनिरूपितत्वसम्बन्धावच्छिन्नाभावप्रकारकज्ञानाधिकरणबोधो भवति तादृशबोधस्य च घटनिरूपितत्व
ज्ञानाभावरूपैतरकोटिनिर्णयात्मकतया घटे ज्ञानं नवेति संशयनिवर्तकत्वं संभवतीति घटे ज्ञानं नवेति संशयनि
रासाय घटे न ज्ञानमिति प्रयोगो युक्तः ज्ञानेन घट इति वाक्यात् ज्ञाननिरूपितत्वसम्बन्धावच्छिन्नाभावप्रकारक घटधर्मिकप्र
कबोधो भवति तादृशबोधस्य च घटे ज्ञानं नवेति संशयैककोटिनिर्णयात्मकत्वाभावेन तादृशसंशयनिवर्तकत्वं न सं

६२

भवतीति घटे ज्ञानं नवेति संशयनिरासाय ज्ञानेन घट इति प्रयोगोनुचितः विभक्तीनां निरर्थकत्ववादिमते तु घ
टे ज्ञानं न ज्ञानमिति वाक्यादाधेयतासंसर्गावच्छिन्नप्रतियोगिताकघटाभावज्ञानमिति वा बोधः तथा ज्ञानेन
घट इति वाक्यादपि आधेयतासंसर्गावच्छिन्नप्रतियोगिताकघटाभाववत् ज्ञानमिति ज्ञानधर्मिकाधेयतासंसर्गा
वच्छिन्नप्रतियोगिताकघटाभावप्रकारकबोधोपि भवति बाधकाभावात् तथा च घटे न ज्ञानमिति वाक्यजन्यबोध
वज्ज्ञानेन घट इति वाक्यजन्यबोधस्याप्येकतरकोटिनिर्णयात्मकतया घटे ज्ञानं नवेति संशयनिवर्तकत्वं संभवतीति
यथा तादृशसंशयनिरासाय घटे न ज्ञानमिति वाक्यं प्रयुज्यते तथा ज्ञानेन घट इत्यपि वाक्यं कदाचित्प्रयुज्येत
इति वाच्यं सप्तम्यंतविशेषणमिति सिद्धांतात् सप्तम्यंतज्ञानपदार्थस्यैवाधेयतासंसर्गावच्छिन्नप्रतियोगि
ताकत्वसंबंधेन नञर्थाभावविशेषणतया नञर्थाभावस्य च घटे प्रथमांतपदार्थे विशेषणतायाश्चान्वय
न ज्ञानेन घट इति वाक्यादाधेयतासंसर्गावच्छिन्नप्रतियोगिताकज्ञानाभाववान्घट इत्येव बोधो न त्वाधेयता
संसर्गावच्छिन्नप्रतियोगिताकघटाभावज्ञानमिति ज्ञानधर्मिकोपि बोधः संभवति तथा च ज्ञानेन घट इति
वाक्यजन्यस्याधेयतासंसर्गावच्छिन्नप्रतियोगिताकज्ञानाभाववान्घट इति बोधस्य घटे ज्ञानं नवेति संशयवि
षयैकतरकोटिनिर्णयात्मकतायाः तादृशसंशयनिवर्तकत्वासंभवेन घटे ज्ञानं नवेति संशयनिरासाय
ज्ञानेन घट इति प्रयोगस्य हास्यास्पदत्वेन कर्तुमशक्यत्वादिति स्थितं विभक्तीनां निरर्थकत्ववादिमतस्य निर्दुष्टत्वेन स्वरा

दिः प्रकारताभ्युपगमे गौरवपरास्तमित्याह वृत्तिनियामकेत्यादिना अभावप्रतियोगितावच्छेदकत्वेऽपि वृत्तिनिया
मकसंबंधस्याभावप्रतियोगितानवच्छेदकत्वपक्षे पुरुषो न राज्ञ इति वाक्याच्छाब्दबोधानुपपत्तिरूपदोषस्तदुक्त
रीत्येत्यर्थः स्वत्वसंसर्गावच्छिन्नप्रतियोगिताकराजाभाववान्पुरुष इति बोधस्योपपादनादिति भावः राजस्वत्वा
दिः राजपदोत्तरषष्ठ्यर्थस्वत्वादेः अन्यथा राजस्वत्वादेः प्रकारतानभ्युपगमे नादृशसमभिव्याहारेति राज्ञः
पुरुष इत्याकारकषष्ठ्यंतराजपदसमभिव्याहृतप्रथमांतपुरुषपदसमभिव्याहारज्ञानघटितयोग्यताज्ञाना
दिरूपशाब्दसामग्रीकाल इत्यर्थः विशिष्टवैशिष्ट्यावगाहिति राजस्वत्वाभाववद्विशिष्टे पुरुषे सौंदर्यवैशिष्ट्या
वगाहिज्ञौ राजस्वत्वाभाववान्पुरुषः सुंदर इति प्रत्यक्षवारणाय तत्र विशिष्टवैशिष्ट्यावगाहिप्रत्यक्षे नादृश
सामग्र्याः षष्ठ्यंतराजपदसमभिव्याहृतप्रथमांतपुरुषपदसमभिव्याहारघज्ञानघटितयोग्यताज्ञानादिरू
पसामग्र्याः राजप्रकारकस्वत्वसंसर्गकबोधोत्पादिकायाः प्रतिबंधकत्वकल्पनाधिक्येन पूर्वपक्षिमते गौरवमि
र्थः नत्रुभयमतरवसमानविषयकानुमित्यादिकं प्रतिजन्यभिन्नविषयकं प्रत्यक्षादिकं प्रति च शाब्दसाम
ग्र्याः प्रतिबंधकत्वकल्पनाप्रयुक्तगौरवाभिधानमित्यत आह अस्मिन्नये इति स्वत्वप्रकारतावादिमते ना
दृशसमभिव्याहारेति राज्ञः पुरुष इत्याकारकषष्ठ्यंतराजपदसमभिव्याहृतप्रथमांतपुरुषपदसम

भिव्याहारज्ञानघटितयोग्यताज्ञानादिरूपसामग्र्याः राजस्वत्वप्रकारकाश्रयत्वसंसर्गकपुरुषविशेष्यकबो
धोत्पादिकायाः राजस्वत्ववान्पुरुष इति बोधस्य यो बाधः राजस्वत्वाभाववानिति निश्चयरूपस्तदभावघटि
तत्वयानत्त्वे राजस्वत्वाभाववान्पुरुष इति निश्चयरूपो यो बाधस्तदभावघटितषष्ठ्यंतराजपदसमभि
व्याहृतप्रथमांतपुरुषपदसमभिव्याहारज्ञानघटितयोग्यताज्ञानादिरूपसामग्रीसत्त्वेऽपि विशेष्यतावच्छे
दकादिप्रकारकेति राजस्वत्वाभावविशिष्टपुरुषे सौंदर्यवैशिष्ट्यावगाहिप्रत्यक्षोत्पादकराजस्वत्वाभाव
वान्पुरुष इत्याकारकराजस्वत्वाभावरूपविशेष्यतावच्छेदकप्रकारकनिश्चयरूपकारणविरहादेव राज
स्वत्वाभाववान्पुरुषः सुंदर इत्याकारकं न यो विशिष्टवैशिष्ट्यावगाहिप्रत्यक्षोत्पत्त्यसंभवेन नादृशसामग्र्याः
राजस्वत्ववान्पुरुष इत्याकारकराजस्वत्वप्रकारकपुरुषविशेष्यक आश्रयत्वसंसर्गकबोधजनकषष्ठ्यं
तराजपदत्वावच्छिन्नधर्मिकप्रथमांतपुरुषपदसमभिव्याहारज्ञानघटितयोग्यताज्ञानादिरूपसामग्र्याः
प्रतिबंधकत्वाकल्पनादित्यर्थः ननु यत्र राजस्वत्वाभावसौंदर्योभयप्रकारतानिरूपितपुरुषनिष्ठविशेष्यता
शालिप्रत्यक्षसामग्री राजस्वत्वाभावः सौंदर्यमिति ज्ञानद्वयघटितावर्तते यत्र च राज्ञः पुरुष इति वाक्य
जबोधजनकराजस्वत्वप्रकारकयोग्यताज्ञानादिघटितसामग्री च वर्तते तत्रैकत्र द्वयमिति रीत्या प्रम

क्षवारणाय निरुक्तशाब्दसामग्र्याः एकत्र हृदयमिगिरीत्यविषयताशालि प्रत्यक्षत्वावच्छिन्नं प्रति प्रतिबंधक
त्वं स्वत्वप्रकारतादिनापि स्वी कर्तव्यं एवं च प्रतिबध्यतावच्छेदककोटौ विशेषणवैशेष्ययोजनाभावे न विशिष्ट
वैशिष्ट्यावगाहि प्रत्यक्षसाधारणविभिन्नविषयकजन्यप्रत्यक्षत्वावच्छिन्नं प्रति शाब्दसामग्र्याः प्रतिबंधक
त्वीकारात्तद्विशिष्टवैशिष्ट्यावगाहि प्रत्यक्षेऽधिकप्रतिबंधकता कल्पनाप्रयुक्तगौरवं स्वत्वसंसर्गतावा
दिमतञ्च मते आह अन्यादृशप्रत्यक्षस्थलीयेति केचित्तु अन्यादृशप्रत्यक्षस्थलीयेतिग्रंथमित्थमवतार
यंति तथाहि स्वत्वप्रकारतावादिसिद्धांतिमतेपि स्वत्वाभावसौंदर्ययोरेकत्र हृदयमिगिरीत्याबाधं प्रति शाब्दसा
मग्र्याः प्रतिबंधकत्वकल्पने तत्तत्प्रत्यक्षादिरूपविशेषणविशेषप्रयुक्तगौरवेण लाघवाद्विशिष्टवैशिष्ट्यावगा
हिप्रत्यक्षसाधारणराजस्वत्वाभावसौंदर्योभयप्रकारकपुरुषविशेष्यकप्रत्यक्षत्वरूपैकधर्मावच्छिन्नप्रति
बध्यतानिरूपितानिरुक्तशाब्दसामग्री चैवैकप्रतिबंधकत्वकल्पनयैव स्वत्वसंसर्गतावादिनो मम पि निर्वा
हइति तदसत् विशिष्टवैशिष्ट्यावगाहि प्रत्यक्षस्य राजस्वत्वाभावविशिष्टपुरुषसौंदर्यप्रकारकत्वेन राजस्व
त्वाभावप्रकारकत्वेपि पुरुषत्वावच्छिन्ने राजस्वत्वा सौंदर्योभयप्रकारकत्वाभावेन पुरुषविशेष्यकराजस्वत्वाभा
वसौंदर्योभयप्रकारकप्रत्यक्षत्वस्याभावेन पुरुषविशेष्यकराजस्वत्वाभावसौंदर्योभयप्रकारकप्रत्यक्षत्वस्य

तादृशविशिष्टवैशिष्ट्यावगाहिप्रत्यक्षसाधारण्यासंभवेन तादृशैकप्रतिबध्यप्रतिबंधकभावस्य कल्पयितुमशक्यत्वात्
तन्मते स्वत्वस्य संसर्गतावादिमते अन्यादृशप्रत्यक्षस्थलीयप्रतिबंधकतया विशिष्टवैशिष्ट्यावगाहिप्रत्यक्षादन्या
दृशीयदेकत्र हृदयमिगिरीत्याविषयताशालिप्रत्यक्षं तत्स्थलीयविशिष्टवैशिष्ट्यावगाहिप्रत्यक्षसाधारणाभिन्नविष
यकजन्यप्रत्यक्षत्वावच्छिन्ननिष्ठप्रतिबध्यतानिरूपितनिरुक्तशाब्दसामग्रीनिष्ठैकप्रतिबंधकतया न निर्वाहः
राजस्वत्वाभाववान्पुरुष इत्याकारकविशिष्टवैशिष्ट्यावगाहिप्रत्यक्षं प्रति शाब्दसामग्र्याः प्रतिबंधकत्वाकल्पन
प्रयुक्तगौरवविरहात्मक निर्वाहेनेत्यर्थः एतदेवोपपादयति अन्यत्रान्यविधेत्यादिना अन्यत्र एकविशिष्टे परवैशिष्ट्या
वगाहि राजस्वत्वाभाववान्पुरुषः सुंदर इत्याकारकप्रत्यक्षनिष्ठप्रतिबध्यतानिरूपितनिरूपितशाब्दसामग्रीनिष्ठप्रतिबंध
कतादन्यस्मिन्नेकत्र हृदयमिगिरीत्याविषयताशालिपुरुषधर्मिकराजस्वत्वाभावसौंदर्योभयप्रकारकराजस्वत्वाभाव
वान्पुरुषः सुंदर इत्याकारकप्रत्यक्षनिष्ठप्रतिबध्यतानिरूपितप्रतिबंधकत्वे अन्यविधप्रत्यक्षेच्छानां एकत्र हृदयमि
गिरीत्याविषयताशालिराजस्वत्वाभाववान्पुरुषः सुंदर इत्याकारकं प्रत्यक्षं जायतामितिआकारकेच्छानामेवोत्तेजकत
या तादृशशाब्दसामग्रीनिष्ठप्रतिबंधकतोत्तेजकीभूतैकत्र हृदयमिगिरीत्याविषयताशालिप्रत्यक्षं जायतामित्याका
रिकेच्छाविरहविशिष्टराजः पुरुष इति शाब्दसामग्रीनिष्ठप्रतिबंधकतानिरूपितप्रतिबध्यतावच्छेदकं न भिन्नवि
षयकजन्यप्रत्यक्षत्वं किंतु राजस्वत्वाभावसौंदर्योभयप्रकारतानिरूपितपुरुषनिष्ठैकविशेष्यताशालिप्रत्यक्षत्वं त
च्च न राजस्वत्वाभावविशिष्टपुरुषसौंदर्यवैशिष्ट्यावगाहिप्रत्यक्षसाधारणं तथा चैकत्र हृदयमिगिरीत्याविषय

नाशाब्दिप्रत्यक्षं जायतामितीच्छाविरहविशिष्टराज्ञः पुरुष इति शाब्दसामग्रीभिन्नविषयकजन्यप्रत्यक्षत्वावच्छि
न्नं प्रति प्रतिबंधिकेति एवमेकविधप्रतिबध्यप्रतिबंधकभावस्य कल्पयितुमशक्यत्वेयमर्थः एतद्दोषापादयितु
तत्र हेतुमाह तादृशेच्छायामसत्त्यामिति अत्र राज्ञः पुरुष इति शाब्दसामग्रीकाले इति शेषः तथा चैतादृशे
च्छायामेवं तद्द्वयमिति रीत्या विषयताशाब्दिप्रत्यक्षं जायतामित्याकारिकेच्छायामसत्त्यां उपदर्शितविशिष्टवै
शिष्ट्यबोधत्वप्रकारकेच्छाबलात् राजस्वत्वाभाववविशिष्टपुरुषे सौंदर्यवैशिष्ट्यावगाहिप्रत्यक्षं जायतामिति
च्छाबलात्तु उपदर्शितविशिष्टवैशिष्ट्यबोधापत्तये राजस्वत्वाभाववविशिष्टपुरुषे सौंदर्यवैशिष्ट्यावगाहिरा
जस्वत्वाभाववान्पुरुषः सुंदर इत्याकप्रत्यक्षोपपत्तये अन्यादृशविषयतायाः भिन्नविषयकजन्यप्रत्यक्षीय
विषयताभिन्नराजस्वत्वाभावसौंदर्योभयप्रकारतानिरूपितपुरुषनिष्ठविशेष्यतारूपविषयतायाः एव तत्र प्रति
बध्यतावच्छेदकत्वेनोपगमावश्यकत्वात् तत्रेति समभ्यानिरूपितत्वमर्थः तथा चैवं तद्द्वयमिति रीत्या विषय
ताशाब्दिप्रत्यक्षेच्छाविरहविशिष्टतादृशशाब्दसामग्रीनिष्ठप्रतिबंधकतानिरूपितप्रतिबध्यतावच्छेदकत्वे
नोपगमावश्यकत्वादित्यर्थः अत्रैव तद्द्वयमिति रीत्या विषयताशाब्दिप्रत्यक्षेच्छाविरहविशिष्टतादृशशाब्द
सामग्रीः भिन्नविषयकजन्यप्रत्यक्षत्वावच्छिन्नं प्रति न प्रतिबंधकत्वं संभवति एवं तद्द्वयमिति रीत्या प्रत्यक्षेच्छा
विरहविशिष्टतादृशशाब्दसामग्रीकालेपि विशिष्टवैशिष्ट्यावगाहिप्रत्यक्षं जायतामितीच्छाबलात् विशिष्टवैशि

ष्ट्यावगाहिभिन्नविषयकजन्यप्रत्यक्षोत्पत्तिसंभवेनैव व्यतिरेकव्यभिचारात् किं चैवं तद्द्वयमितिरीत्या प्रत्यक्षेच्छावि
रहविशिष्टतादृशशाब्दसामग्री राजस्वत्वाभावसौंदर्योभयप्रकारतानिरूपितपुरुषनिष्ठविषयताशाब्दिप्रत्यक्षं प्र
ति प्रतिबंधिका तथा विशिष्टवैशिष्ट्यावगाहिप्रत्यक्षेच्छाविरहविशिष्टतादृशशाब्दसामग्री राजस्वत्वाभाववि
शिष्टपुरुषे सौंदर्यवैशिष्ट्यावगाहिप्रत्यक्षं प्रति प्रतिबंधिकेति पृथगेव प्रतिबध्यप्रतिबंधकभावः संभवति तथा च
स्वत्वसंसर्गतावादिप्राचीनमते राज्ञः पुरुष इत्यत्र स्वत्वसंबंधेन राजवान्पुरुष इति शाब्दबोधस्तादृशबोधश्च स्वत्वसं
बंधेन राजाभाववान्पुरुष इत्याकारकनिश्चयस्तदभावघटितापृष्ठ्यंतराजपदसमभिव्याहृतप्रथमांतपुरुषपद
समभिव्याहारज्ञानस्य घटितयोग्यताज्ञानादिरूपतादृशशाब्दबोधजनकीभूतसामग्रीतत्काले राजस्वत्वाभाववि
शिष्टपुरुषे सौंदर्यवैशिष्ट्यावगाहि राजस्वत्वाभाववान्पुरुषः सुंदर इत्याकप्रत्यक्षनियामकराजस्वत्वाभाववान्पुरु
ष इति विशेष्यतावच्छेदकप्रकारकनिर्णयसंभवेनैकविशिष्टेऽपरवैशिष्ट्यावगाहिनी राजस्वत्वाभाववान्पुरुष
इति प्रत्यक्षापत्तिस्तद्वारणाय तादृशशाब्दसामग्र्याः प्रतिबंधकताऽधिकमकल्पनाप्रयुक्तगौरवं स्वत्वप्रकारतावा
दिनवीनमते तु आश्रयतासंबंधेन राजस्वत्ववान्पुरुष इति बोधस्तत्सामग्री राजस्वत्वाभाववान्पुरुष इति बाधात्मक
निर्णयाभावघटिता तत्काले राजस्वत्वाभाववान्पुरुषः सुंदर इत्याकारकप्रत्यक्षजनकराजस्वत्वाभाववान्पुरुष इ
ति विशेष्यतावच्छेदकप्रकारकनिर्णयाभावादेव तादृशप्रत्यक्षोत्पत्तेरसंभवेन तादृशप्रत्यक्षं प्रति तादृशशा

ब्दसामग्र्याः प्रतिबंधकत्वाकल्पनेन लाघवमिति स्वत्वादेः प्रकारताभ्युपगमः समुचित इति भावः अथ स्वत्व
प्रकारतावादिमते राजस्वत्वाभाववान्पुरुषः सुंदर इति प्रत्यक्षं प्रति तादृशशाब्दसामग्र्याः प्रतिबंधकत्वाकल्प
नेपि स्वत्वसंसर्गावच्छिन्नप्रतियोगिताकराजाभाववान्पुरुषः सुंदर इत्याकारकप्रत्यक्षं प्रति तादृशशाब्दसाम
ग्र्याः प्रतिबंधकत्वकल्पनस्यावश्यकतया गौरवं समानमेवेत्याशंकते नच स्वत्वादेः प्रकारत्वेपीति नवीनम
तेपि स्वत्वसंसर्गावच्छिन्नप्रतियोगिताकराजाभाववान्पुरुषः सुंदर इत्याकारकविशिष्टवैशिष्ट्यावगाहिप्रत्य
क्षं प्रति तथाविधसामग्र्याः आश्रयतासंबंधेन राजस्वत्ववान्पुरुष इति शाब्दबोधजनकीभूतायाः षष्ठ्यंतरा
जपदत्वावच्छिन्नधर्मिकप्रथमांतपुरुषपदसमभिव्याहारज्ञानघटितयोग्यताज्ञानादिरूपायाः सामग्र्याः प्र
तिबंधकताधिक्येन गौरवं तन्मते स्वत्वसंसर्गावच्छिन्नप्रतियोगिताकराजाभाववान्पुरुष इति प्रत्यक्षजनकीभू
तायाः स्वत्वसंसर्गावच्छिन्नप्रतियोगिताकराजाभाववान्पुरुष इति विशेष्यतावच्छेदकनिर्णयरूपसामग्र्याः
राजस्वत्वाभाववान्पुरुष इति बाधाभावघटितायाः राजस्वत्ववान्पुरुष इति शाब्दबोधजनसामग्र्याश्च युग
पत्संभवेन तादृशप्रत्यक्षापत्तिसंभवात् नत्संसर्गतामते स्वत्वस्य संसर्गतावादिमते तादृशसामग्र्याः स्व
त्वसंबंधेन राजवान्पुरुष इति शाब्दबोधजनकसामग्र्याः नत्सत्वे स्वत्वसंसर्गावच्छिन्नप्रतियोगिताक
राजाभाववान्पुरुष इति बाधाभावघटितराजप्रकारकस्वत्वसंसर्गकपुरुषविशेष्यकशाब्दबोध

सामग्रीसत्त्वे स्वत्वसंसर्गावच्छिन्नप्रतियोगिताकराजाभाववान्पुरुष इति विशेष्यतावच्छेदकनिर्णयरूपकारणविरहा
त् स्वत्वसंसर्गावच्छिन्नप्रतियोगिताकराजाभाववान्पुरुषः सुंदर इति प्रत्यक्षवारणसंभवादित्यर्थः उक्तप्रत्यक्षसाम
ग्र्युक्तशाब्दसामग्र्योर्युगपदवस्थानासंभवेन प्राचीनमते तादृशप्रत्यक्षं प्रति तादृशशाब्दसामग्र्याः प्रतिबंधक
ताकल्पनेन गौरवानवकाशादिति भावः अथ स्वत्वप्रकारतावादिन[illegible]वीनः तादृशप्रत्यक्षं प्रति तादृशसामग्री
प्रतिबंधकताधिक्यमंगीकृत्य प्रकारांतरेण लाघवमुपपाद्य साम्यमुपपादयन् संसर्गतावादिमते गौरवं प्रदर्शयति
तन्मत इत्यादिना तन्मते स्वत्वप्रकारतावादिनवीनमते तादृशप्रत्यक्षं प्रति स्वत्वसंबंधावच्छिन्नप्रतियोगिताक
राजाभाववान्पुरुषः सुंदर इति प्रत्यक्षं प्रति तथाविधसामग्र्याः आश्रयतासंबंधेन राजस्वत्ववान्पुरुष इति शाब्द
निश्चायकसामग्र्याः प्रतिबंधकत्वाधिक्येपि स्वत्वसंबंधावच्छिन्नप्रतियोगिताकराजाभाववान्पुरुष इत्याकारक
विशेष्यतावच्छेदकनिर्णयरूपप्रत्यक्षसामग्री आश्रयतासंसर्गावच्छिन्नप्रतियोगिताकराजस्वत्वाभाववान्पुरु
ष इत्याकारकबाधाभावघटिततादृशशाब्दसामग्र्योर्मिलनसंभवेनाधिकप्रतिबंधकताकल्पनेपीत्यर्थः निरूपि
तत्वादिसंबंधावच्छिन्नेति निरूपितत्वसंसर्गावच्छिन्नप्रतियोगिताकराजाभाववत्त्वं चैत्रमैत्रयोरित्याकारके नि
रूपितत्वसंबंधेन राजाभाववत्त्वमित्याकारकविशेष्यतावच्छेदकप्रकारकनिर्णयकारणकवैशिष्ट्यावगाहि
प्रत्यक्षे तथाविधसामग्र्याः षष्ठ्यंतराजपदत्वावच्छिन्नधर्मिकप्रथमांतपुरुषपदसमभिव्याहारज्ञानघटितयो

व्यु.टी.

यत्वाज्ञानादिरूपायाः बाधाभावघटितायाः राजनिरूपितस्वत्ववान्पुरुष इति शाब्दसामग्र्याः प्रतिबंधकत्वाकल्प
नेन तदंशे साम्यादित्यर्थः अत्र स्वत्वप्रकारतावादिनवीनमते राज्ञः पुरुष इति वाक्यात् निरूपितत्वसंबंधेन
राजवत्स्वत्वं आश्रयतासंबंधेन स्वत्ववान्पुरुष इति बोधः निरूपितत्वसंबंधेन राजाभाववत्स्वत्वमित्याकारक
स्तस्य बाधः स एव विशेष्यतावच्छेदकप्रकारकनिर्णयरूपत्वेन निरूपितत्वसंसर्गावच्छिन्नप्रतियोगिता
क राजाभाववत्स्वत्वं प्रमेयमित्याकारकविशिष्टवैशिष्ट्यप्रत्यक्षसामग्रीं तथा च निरूपितत्वसंबंधेन राज
वत्स्वत्वाश्रयः पुरुष इति शाब्दबोधनक निरूपितत्वसंसर्गावच्छिन्नप्रतियोगिताक राजाभाववत्स्वत्वमिति नि
र्णयरूपबाधाभावघटितशाब्दसामग्रीकाले विशेष्यतावच्छेदकप्रकारकनिर्णयरूपकारणाभावादेव तादृ
शप्रत्यक्षमिति न नवीनमतीयशाब्दशाब्दसामग्रीप्रतिबंधिकेति भावः। तदंशे साम्यादिति यथा स्वत्वप्रका
रतावादिनवीनमते स्वत्वसंसर्गावच्छिन्नप्रतियोगिताकराजाभाववान्पुरुषः सुंदर इति विशिष्टवैशिष्ट्य
बोधाहिप्रत्यक्षं प्रति तादृशशाब्दसामग्र्याः प्रतिबंधकत्वाधिक्यकल्पनं तथा स्वत्वसंसर्गतावादिप्राचीनमते
निरूपितत्वसंसर्गावच्छिन्नप्रतियोगिताकराजाभाववत्स्वत्वं प्रमेयमिति प्रत्यक्षं प्रति तादृशशाब्दसा
मग्र्याः प्रतिबंधकत्वाधिक्यकल्पनमिति प्रतिबंधकत्वाधिक्यकल्पनांशे साम्यादित्यर्थः नन्वेवं साम्ये संसर्गता
मतेपि गौरवाभावात्स्वत्वादेः संसर्गत्वमेवोचितमत आह तथा चेत्यवेदिति तथा च उभयमते साम्ये सत

६७॥

पि स्वत्वसंसर्गतावादिप्राचीनमते राज्ञः पुरुष इति वाक्यात् स्वत्वसंबंधेन राजवान्पुरुष इति बोधस्तत्सामग्री स्व
त्वसंबंधेन राजाभाववान्पुरुष इति निश्चयरूपबाधबाधप्रतियोगिकाभावघटिता यदावर्तते तदा राजस्वत्वाभाववान्पुरुषः सुं
दर इति प्रत्यक्षसामग्री राजस्वत्वाभाववान्पुरुष इति विशेष्यतावच्छेदकप्रकारकनिर्णयघटितापि वर्तत एव तथा च शाब्द
सामग्रीप्रत्यक्षसामग्र्योर्युगपदवस्थानासंभवात् तादृशशाब्दसामग्र्याः पर्वतोत्तु राजस्वत्वाभाववान्पुरुषः सुंदर इति प्र
त्यक्षं प्रति प्रतिबंधकत्वं न कल्प्यत इति संसर्गतावादिप्राचीनमते प्रतिबंधकत्वाधिक्यकल्पनप्रयुक्तगौरवाभावात् स्वत्वादेः सं
सर्गत्वमनुचितं स्वप्रकारतावादिनवीनमते तु राज्ञः पुरुष इति वाक्यात् आश्रयतासंबंधेन राजस्वत्ववान्पुरुष इति
बोधस्तथा बाधो द्विविधः एको निरूपितत्वसंबंधेन राजाभाववत्स्वत्वमित्याकारको द्वितीयस्तु राजस्वत्वाभावव
ान्पुरुष इति आकारकस्तत्र बाधाभावघटितशाब्दसामग्र्याः स्वत्वसंबंधेन राजाभाववान्पुरुषः सुंदर इति प्रत्यक्षं प्र
तिबंधकत्वं न संपद्यते सामग्र्यप्रपदितं द्वितीयबाधाभावघटितशाब्दसामग्र्याः राजस्वत्वाभाववान्पुरुषः सुंदर इति प्र
त्यक्षं प्रति प्रतिबंधकत्वं न कल्प्यते तथा हि राज्ञः पुरुष इति वाक्यजन्य राजस्वत्ववान्पुरुष इति शाब्दबोधस्य बाधो रा
जस्वत्वाभाववान्पुरुष इत्याकारकः एवं च विशेष्यतावच्छेदकप्रकारकनिर्णयरूपयाः। राजस्वत्वाभाववान्पुरुषः
सुंदर इति प्रत्यक्षकारणं तथा च बाधतदभावयोर्युगपदसंभवात् राजस्वत्वाभाववान्पुरुष इति बाधाभावघटितशा
ब्दसामग्रीकाले राजस्वत्वाभाववान्पुरुष इति विशेष्यतावच्छेदकप्रकारकनिर्णयरूपप्रत्यक्षसामग्र्यभावादेव न

नादृशप्रत्यक्षोत्पत्तिसंभवादिति नवीनमते नादृशप्रत्यक्षं प्रति तादृशशाब्दसामग्र्याः प्रतिबंधकतानवच्छेदकत्वमिति याप्रा
चीननये नादृशप्रत्यक्षं प्रति शाब्दसामग्र्याः प्रतिबंधकताधिक्यमप्यस्येनी ? ति पूर्वोक्तगौरवरूपरूपो दोषोऽ
वरसरेत्यभावः यद्यपि यस्मिन्धर्मिणि यो धर्मो विधेयस्तस्मिन्धर्मिणि तद्धर्माभावो बाधस्तज्ज्ञानं प्रतिबंधकं त
थापि प्रकृते यत्र धर्मिणि यो धर्मो भासते तत्र धर्मिणि तद्धर्माभावनिश्चयो बाधः स च स्वरूपत एव प्रतिबंध
क इति बोध्यं स्वत्वसंसर्गतावादिप्राचीनः पुनः प्रकारांतरेणावतारयति न च स्वत्वादेः प्रकारतामते इति नादृश
सामग्रीप्रतिबंधकतायां राज्ञः पुरुष इति वाक्यघटकपदजन्यपदार्थोपस्थितियोग्यताज्ञानादिरूपशाब्दसाम
ग्रीनिष्ठायां घटादिरूपभिन्नविषयप्रत्यक्षादिनिष्ठप्रतिबध्यतानिरूपितप्रतिबंधकतायामित्यर्थः स्वत्वाद्युप
स्थितिनिवेशाधिक्येन स्वत्वसंसर्गतावादिमते विभक्तेः साधुत्वार्थकतया तात्पर्यमात्रग्राहकतया वा स्वत्वा
द्यर्थबोधकतया सामग्रीप्रतिबंधकतायां स्वत्वाद्युपस्थितिनिवेशाधिक्याभावेन स्वत्वप्रकारतावादिमते वि
भक्तेः सार्थकत्वेन तदधीनस्वत्वाद्युपस्थितिनिवेशाधिक्येनेत्यर्थः राजस्वत्वाभाववानिति स्वत्वसंसर्गतावा
दिप्राचीनमते राज्ञः पुरुष इत्यत्र स्वत्वसंबंधेन राजवान्पुरुष इति बोधस्तद्बाधोऽपि स्वत्वसंबंधेन राजाभाववा
न्पुरुष इति निश्चयरूपस्तदभावोऽपि स्वत्वसंबंधेन राजाभावाभाववान्पुरुष इति निश्चयाभावरूपोऽन्यपदा

र्थघटितः प्रतिबंधकसामग्र्यामंतर्भवति स्वत्वप्रकारतावादिनवीनमते तु स्वत्वं षष्ठ्यर्थ इति राज्ञः पुरुष इ
त्यत्राश्रयतासंबंधेन राजस्वत्ववान्पुरुष इति बोधो तद्बाधोऽप्याश्रयतासंबंधेन राजस्वत्वाभाववान्पुरुष इति
निश्चयरूपस्तदभावस्तु आश्रयतासंबंधेन राजस्वत्वाभावाभाववान्पुरुष इति निश्चयाभावरूपो ब
हुपदार्थघटितस्तत एव प्रतिबंधकसामग्र्यामंतर्भवतीति बाधाभावनिवेशाधिक्येन च गौरवमित्यर्थः
अस्मन्मते स्वत्वसंसर्गतावादिमते नादृशोपस्थितिः विभक्तिजन्यस्वत्वाद्युपस्थितिः तथाविधबाधा
भावादीनामाश्रयतासंसर्गावच्छिन्नप्रतियोगिताकराजस्वत्वाभाववान्पुरुष इति निश्चयात्मकबहुपदार्थघटि
तबाधाभावादीनां तथाविधवाक्यजन्यशाब्दबोधं प्रति राज्ञः पुरुष इति वाक्यजन्यप्राचीनमतसिद्धस्वत्व
संबंधेन राजवान्पुरुष इति बोधं प्रति हेतुतया कारणत्वाभावेन तादृशवाक्यघटितसामग्रीप्रतिबंधक
तायां राज्ञः पुरुष इति वाक्यघटितस्वत्वसंबंधेन राजाभाववान्पुरुष इति बाधाभावघटिताकांक्षायोग्य
ताज्ञानादिरूपसामग्रीनिष्ठप्रतिबंधकतायां तेषामनिवेशात् षष्ठीजन्यस्वत्वोपस्थितिस्वत्वप्रकारक
योग्यताज्ञानराजस्वत्वाभाववान्पुरुष इति बाधाभावादीनामनिवेशाल्लाघवमित्यर्थः अथ स्वत्वप्रकारता
वादिनवीनः घटादिरूपभिन्नविषयप्रत्यक्षनिष्ठप्रतिबध्यतानिरूपिताकांक्षायोग्यताज्ञानपदार्थोपस्थिति
रूपशाब्दसामग्रीनिष्ठप्रतिबंधकतायां स्वत्वसंसर्गतावादिप्राचीनोपन्यस्तं षष्ठीविभक्तिजन्यस्वत्वाद्युप
स्थितिनिवेशाधिक्यप्रयुक्तगौरवमुररीकुर्वाणो राजस्वत्वाभाववान्पुरुष इति बाधाभावनिवेशानं प्राचीन

व्यु॰टी॰

स्याप्यावत्त्वप्रकारकत्वमिति आह भवन्मतेपीत्यादिना भवन्मतेपि स्वत्वसंसर्गकत्वादिमतेपि तद्वत्ताज्ञानं प्रति तद्भा
ववत्ताज्ञानं एवं तद्वत्ताज्ञानं प्रति तदभावव्याप्यवत्ताज्ञानं च प्रतिबंधकमिति प्रतिबध्यप्रतिबंधकभावस्य
स्वीकृततया स्वत्वसंबंधेन राजवान्पुरुष इति निर्बाधं प्रति स्वत्वसंबंधावच्छिन्नप्रतियोगिताकराजाभाववान्
पुरुष इति निश्चयो यश्च स्वत्वसंबंधेन राजाभावव्याप्यो यो राजस्वत्वाभावस्तद्वान्पुरुष इति निश्चयः प्रतिबं
धकस्तथा च स्वत्वसंबंधेन राजाभाववान्पुरुष इति निश्चयस्येव स्वत्वसंबंधेन राजाभावव्याप्यराजस्वत्वा
भाववान्पुरुष इति निश्चयस्यापि राज्ञः पुरुष इति वाक्यजन्यराजप्रकारकस्वत्वसंसर्गकपुरुषविशेष्यक
शाब्दधीविरोधितया तादृशनिश्चयाभावस्य स्वत्वसंबंधेन राजाभावव्याप्यराजस्वत्वाभाववान्पुरु
ष इति निश्चयाभावस्य तथाविधशाब्दसामग्रीप्रतिबंधकतायां स्वत्वसंबंधेन राजवान्पुरुष इति शा
ब्दस्यायाः सामग्री राजपुरुषादिपदजन्यराजपुरुषादिरूपपदार्थोपस्थितिघटितस्वत्वसंबंधेन राजाभा
ववान्पुरुष इति निश्चयाभावकबाधाभावघटितराजप्रकारकयोग्यताज्ञानादिरूपा तन्निष्ठायां घटादिरूप
भिन्नविषयकप्रत्यक्षनिश्चयप्रतिबध्यतानिरूपितप्रतिबंधकतायां निवेशनस्याधिक्येन लाघवा
नवकाशादित्यर्थः प्राचीनमते स्वत्वसंबंधेन राजवान्पुरुष इति स्तत्र स्वत्वसंबंधेन राजाभाव योध
वान्पुरुष इति निश्चयो ग्राह्याभावावगाहितया प्रतिबंधकः स्वत्वसंबंधेन सत्ताभावव्याप्यराजस्वत्वा

६१

भाववान्पुरुष इति निश्चयोपि तदभावव्याप्यवत्ताज्ञानमुद्रया प्रतिबंधक इत्युभयबाधयोरभावाद्द्वयं घटादि
रूपभिन्नविषयकप्रत्यक्षनिष्ठप्रतिबध्यतानिरूपितशाब्दसामग्रीनिष्ठप्रतिबंधकतायां निवेशनीयमि
ति लाघवानवकाशादित्यावत् नवीनमते लाघवमाह मन्मत इत्यादिना मन्मते स्वत्वप्रकारतावादिनवीन
मते बाधाभावनिवेशेनैव राज्ञः पुरुष इति शाब्दसामग्र्यां राजस्वत्वाभाववान्पुरुष इति बाधाभावनिवेशेनै
व रणवकारण स्वसंसर्गावच्छिन्नप्रतियोगिताकराजाभाववान्पुरुष इति बाधाभावनिवेशावारणं तादृशनि
श्चयकाले राजस्वत्वाभाववान्पुरुष इति बाधनिश्चयकाले प्रत्यक्षाद्युपपत्तेः भिन्नविषयकघटादिप्रत्यक्षा
द्युपपत्तेः बाधनिश्चयकाले बाधाभावघटितशाब्दसामग्रीरूपप्रतिबंधकाभावात् तदभावांशानिवे
शादिति घटादिरूपभिन्नविषयकप्रत्यक्षप्रतिबंधकीभूतशाब्दसामग्र्यां ग्राह्याभावावगाहिराजस्वत्वाभाव
वान्पुरुष इति बाधाभावनिवेशस्यावश्यकत्वेपि राजाभाववान्पुरुष इति बाधाभावानिवेशादित्यर्थः अत्र संबंधा
नुमितौ स्तेन संबंधेन संबंधि अनुमितिं प्रति कारणतया राजनिरूपितस्वत्ववत्ताज्ञानं स्वत्वसंबंधेन राजव
त्ताज्ञानं प्रति कारणमिति स्वत्वसंबंधेन राजवत्तां प्रति राजस्वत्ववत्ताया एव नियामकतया स्वत्वसंबंधे
न राजवत्तां प्रति राजस्वत्ववत्ताया एव व्यापकत्वमुपपत्तेः तथा च व्यतिरेकव्यापकाभावस्यैव व्याप्यतया
राजस्वत्वाभावस्यैव स्वत्वसंसर्गावच्छिन्नप्रतियोगिताकराजाभावव्याप्यत्वं इत्थं च प्राचीनमते ग्राह्या

भावावगाहित्वेन राजाभाववान् पुरुष इति निश्चयात्मकबाधस्य तदभावव्याप्यवत्ताज्ञानमुद्रया राजाभाव
व्याप्यराजस्वत्वाभाववान् पुरुष इति निश्चयात्मकबाधस्य स्वत्वसंबंधेन राजवान् पुरुष इति बोधं प्रति प्रतिबंध
कत्वावश्यकत्वतया भिन्नविषयकप्रत्यक्षादिप्रतिबंधकीभूतशाब्दसामग्र्यां उभयविधबाधाभावनिवेशो
ऽस्यावश्यकः स्वत्वसंसर्गवादिनवीनमते तु स्वत्वसंसर्गावच्छिन्नप्रतियोगिताकराजाभावस्य
राजस्वत्वाभावव्याप्यत्वेन भिन्नविषयकप्रत्यक्षप्रतिबंधकीभूतराजस्वत्ववान् पुरुष इति शाब्दसामग्र्य
ां बाधाभावावगाहि राजस्वत्वाभाववान् पुरुष इति निश्चयात्मकबाधाभावनिवेशस्यावश्यकत्वेऽपि राजस्व
त्ववान् पुरुष इति शाब्दं प्रति ग्राह्याभावावगाहित्वेन तदभावव्याप्यवत्ताज्ञानमुद्रया वा प्रतिबंधकीभूत
स्य स्वत्वसंसर्गावच्छिन्नप्रतियोगिताकराजाभाववान् पुरुष इति निश्चयात्मकबाधस्याभावनिवेशा
न्न वस्तुतस्तु नव्यमते तद्धर्मावच्छिन्नतानिश्चयं प्रति ग्राह्याभावावगाहि तदभाववत्तानिश्चय एव प्रतिबंधक
न तु तदभावव्याप्यवत्तानिश्चयोऽपि तदभावव्याप्यवत्तानिश्चय तदभावावच्छेदकवत्तानिश्चयादीनां
विनिगमनाविरहेण प्रतिबंधकत्वकल्पनागौरवात् सर्वत्र तदभाववत्तानिश्चयस्यैव प्रतिबंधकत्वसं
भवाच्च यद्यपि स्वतंत्रेच्छमुनिकल्पपृथक्निर्देशाम्लक्सत्प्रतिपक्षस्य दोषत्वसंपत्तये ऽनुमितौ तत्

दभावो व्याप्यवत्तानिश्चयस्य प्रतिबंधकत्वं मणीकृन्मते तथापि शाब्दं प्रति तदभावव्याप्यवत्तानिश्चयस्य
प्रतिबंधकत्वे मानाभावाभावात् शाब्दबोधं प्रति प्रतिबंधकीभूततदभावव्याप्यवत्तानिश्चयात्मकबाधाभावघटि
तो भावस्य भिन्नविषयकप्रत्यक्षप्रतिबंधकशाब्दसामग्र्यां निवेशे प्रयोजनाभावेन तदभावव्याप्यवत्ताव
निश्चयात्मकबाधाभावानिवेशादित्याशयः इदानीं राजस्वत्वाभाववान् पुरुषः स्वं दः राजाभावत्वत्वप्रमे
यमित्यादि द्विविधभिन्नविषयकप्रत्यक्षं प्रति यथा संसर्गतावच्छिन्ने शाब्दसामग्र्याः प्रतिबंधकताद्वयं तथा
राजकीयं स्वत्वं राजस्वत्ववान् पुरुष इत्यादिरूपसमानविषयकानुमितिद्वयं प्रति स्वत्वप्रकारतावच्छिन्ने
ऽपि शाब्दसामग्र्याः प्रतिबंधकताद्वयमिति रीत्या साम्यमादौ पादयितुः कस्यचिन्मतं उपन्यस्यति यद्विस
दिना राजकीयं स्वत्वं निरूपितत्वसंबंधेन राजवत्स्वत्वमिति स्वत्वविशेष्यकराजविधेयकानुमितिरेका एवं राजस्व
त्ववान् पुरुष इति आश्रयतासंबंधेन राजस्वत्वविधेयकपुरुषोद्देश्यकानुमितिरपरा इति द्विविधानुमितेरेव
तद्विनिरूपितविषयकत्वेन राजस्वत्ववान् पुरुष इति शाब्दबोधविषयातिरिक्तविषयकत्वाभावेन शाब्दबोधसमा
नविषयकत्वेन समानविषयकत्वेन समानविषयकानुमित्यादिकं प्रति शाब्दसामग्र्याः प्रतिबंधकत्वस्य सर्वसंमतत्वे
न तथाविधानुमितिं प्रति राजकीयस्वत्वं राजस्वत्ववान् पुरुष इति द्विविधानुमितिं प्रति प्रत्यक्षतादृशवाक्यघटित

व्यु.टी.

सामग्र्याः राज्ञः पुरुष इति वाक्यघटितयोग्यताज्ञानबाधाभावादिरूपसामग्र्याः प्रतिबंधकताद्वयं प्रतिबध्यभेदेन प्रति
बध्यताद्वयनिरूपितप्रतिबंधकताद्वयमिति गौरवमिति अर्थः अस्मन्मते च स्वत्वसंबंधसंसर्गतावादिमते च तादृश
नुमित्योः राजकीयं स्वत्वं राजस्वत्ववान्पुरुष इत्यनुमित्योः तथाविधवाक्यजन्यात् राज्ञः पुरुष इति वाक्यजन्या
त् राज्ञः पुरुष इति वाक्यजन्याद् राजकीयः पुरुषः स्वत्वसंबंधेन राजवान्पुरुष इति शाब्दबोधात् अतिरिक्तवि
षयकतया शाब्दबोधविषयतायाश्च राजपदार्थपुरुषपदार्थयोः स्वत्वाख्यसंसर्गसंसर्गे राजकीयं स्वत्वमित्य
नुमितिविषयताया राज्ञि स्वत्वेन यन्निरूपितत्वाख्यसंसर्गेन तथा राजकीयस्वत्ववान्पुरुष इत्यनुमितिविषयता
च राजनिरूपितस्वत्वे अथ च पुरुषे तयोराश्रयत्वाख्यसंसर्ग इत्यनुमित्योः भिन्नविषयकतया तत्र राजकीयं स्व
त्वं राजस्वत्ववान्पुरुष इत्यनुमित्योः तादृशसामग्र्याः राजप्रकारकस्वत्वसंसर्गकपुरुषविशेष्यकशाब्दसाम
ग्र्याः प्रतिबंधकताकल्पनं नास्ति समानविषयकानुमितिं प्रत्येव शाब्दसामग्र्याः प्रतिबंधकत्वकल्पनेनास्ति
(समानविषयकानुमितिं प्रत्येव) तस्मात् तथाविधानुमितिः तथाविधशाब्दसामग्र्यां भिन्नविषयकानुमि
तिशाब्दसामग्र्यां सत्यामनुमितिसामग्र्याः प्रतिबंधकत्वमेकमेव कल्पनीयमिति लाघवमिति भावः अथ
वा राजकीयं स्वत्वं राजस्वत्ववान्पुरुष इत्यनुमित्योः राज्ञः पुरुष इति वाक्यजन्यस्वत्वसंबंधेन राजवान्पुरु
ष इति शाब्दबोधादतिरिक्तविषयकतया शाब्दबोधस्य राजपुरुषविषयोस्तयोः संसर्गतया स्वत्वं च विषयः

८१।

अनुमित्योस्तु राजपुरुषौ स्वत्वं स्वत्वीयसंसर्गश्चात्र विषया इत्यधिकविषयकत्वमित्यर्थः स्वत्वप्रकारतावादिनवी
नः प्रतिबंधास्वमतं व्यवस्थापयति भवन्मते इत्यादिना भवन्मते स्वत्वसंसर्गतावादिप्राचीनमते यत्र राज्ञः पु
रुष इत्यत्र यादृशानुमिति राजवत्स्वत्वं राजस्वत्ववान्पुरुष इत्यनुमितिः स्वीक्रियते अनुमित्योः राजस्वत्व
च पुरुषादिरूपादिरूपप्राचीनमतसिद्धशाब्दविषयविषयकत्वात्समानविषयकत्वेऽपि तत्र समानवि
षयकशाब्दसामग्र्याः प्रतिबंधकत्वकल्पनांगीकारात् अस्मन्मतेऽपि स्वत्वप्रकारतावादिनव्यमतेऽपि तत्र राज्ञः
पुरुष इत्यत्र तादृशानुमितेरेव राजकीयं स्वत्वं राजस्वत्ववान्पुरुष इत्यनुमितेरेव स्वीकरणीयतया समान
विषयकानुमित्यादौ शाब्दसामग्र्याः प्रतिबंधकत्वकल्पनेनांगीकरणीयतया मतद्वयेऽपि साम्यमित्यर्थः स्व
त्वसंसर्गेण राजवान्पुरुष इति समानविषयकानुमितिं प्रति यथा प्राचीनमते राज्ञः पुरुष इति वाक्यघटि
तस्वत्वसंसर्गकराजप्रकारकयोग्यताज्ञानादिरूपशाब्दसामग्री प्रतिबंधिका तथा नवीनमतेऽपि स्वत्वसं
बंधेन राजवान्पुरुष इत्यनुमितिं प्रति राज्ञः पुरुष इति वाक्यघटिताश्रयत्वसंसर्गकराजस्वत्वप्रकारकयोग्य
ताज्ञानादिरूपशाब्दसामग्री मणिमंत्रन्यायेन प्रतिबंधिकेति यत्र प्राचीनेन तथानुमितिर्न स्वीक्रियते
तत्र नवीनेन मयाऽप्यनुमितिर्न स्वीक्रियत इत्यनुमितौ शाब्दसामग्र्याः प्रतिबंधकतासाम्यादित्यर्थः

५५

व्यु॰टी॰

एतदेवस्पष्टयति उपदर्शितस्थले इत्यादिना राजवत्स्वत्वं राजस्वत्ववान्पुरुष इत्यनुमितिद्वयं भवतु इ
प्राचीनैः स्वीयत्त्रियते तदनुमितिद्वयमस्माभिर्नवीनैः स्वीक्रियत इति कुतो हेतोरनुमितिद्वयनिष्ठप्रति
बध्यता निरूपितशाब्दसामग्रीनिष्ठप्रतिबंधकताद्वयं संभवेत् अन्यानुमितिद्वया स्वीकारे एवहि शाब्दसा
मग्र्यां प्रतिबंधकताद्वयापादको ऽनुमितिद्वयस्वीकारे तु कारणाभावादेव प्रतिबंधकताद्वयापादनं खपुष्पवदि
तिभावः ननु समानविषयकत्वात् अनुमितेः शाब्दविषयानतिरिक्तविषयकत्वं तथाच प्राचीनमते राजवृत्तीयं स्व
त्वं राजस्वत्ववान्पुरुष इत्यनुमित्योः पूर्वोक्तरीत्या ऽतिरिक्तविषयकत्वरूपभिन्नविषयकतया ऽनुमितिसामग्र्याः
प्राबल्यमित्यनुमितिरेव भवति नतु शाब्दबोध इति शाब्दसामग्र्याः अनुमितिप्रतिबंधकत्वं नास्तीति लाघवं
नवीनमते तु तादृशानुमित्योः शाब्दविषयानतिरिक्तविषयकत्वरूपसमानविषयकतया ऽनुमितिसामग्री
दुर्बलेत्यनुमितिर्नभवतीत्यनुमितिं प्रति शाब्दसामग्र्याः प्रतिबंधकत्वं कल्पनीयमिति गौरवं दुर्वारमेवेत्यत आ
ह। भवतापीति प्राचीनेनापि तादृशशाब्दं प्रति शाब्दसामग्र्याः स्वत्वसंबंधेन राजवान्पुरुष इति शाब्दं प्रति ता
दृशानुमितिद्वयसामग्रीद्वयस्य राजवृत्तीयस्वत्वं राजस्वत्ववान्पुरुष इति द्वयसामग्रीद्वयस्य प्रतिबंधकतायाः साम्या
च प्राचीनमते शाब्दबोधो न जायत इति शाब्दं प्रति अनुमितिद्वयसामग्रीद्वयं यथा प्रतिबंधकं तथा नवीनमते
प्यनुमितिर्न जायत इत्यनुमितिद्वयं प्रति शाब्दसामग्री प्रतिबंधकेति मतद्वयेपि साम्यमित्यर्थः न चैवमपि

७२॥

प्राचीनमते स्वत्वसंबंधेन राजवान्पुरुष इति शाब्दं प्रति राजवृत्तीयं स्वत्वं राजस्वत्ववान्पुरुष इत्यनुमितिद्वयसामग्री
द्वयस्य भिन्नविषयकानुमितिसामग्रीत्वेनैव प्रतिबंधकत्वं कल्पनीयं नवीनमते तु इच्छाया उत्तेजकत्वानुरोधे
न तादृशानुमितिद्वयनिष्ठप्रतिबध्यतानिरूपितराजस्वत्ववान्पुरुष इति शाब्दसामग्रीनिष्ठप्रतिबंधकताद्वय
मेव कल्पनीयमिति नवीनमते गौरवं तदवस्थमेवेत्यत आह एवं राजपुरुष इति तादृशशाब्दसामग्र्याः राजप्रकार
कस्वत्वसंसर्गकपुरुषविशेष्यकज्ञानत्वप्रकारकस्वत्वसंसर्गकतात्पर्यज्ञानादिघटितराजपदाव्यवहितोत्तरपु
रुषपदत्वज्ञानजन्योपस्थित्यादिरूपसामग्र्याः घटादिरूपभिन्नविषयकप्रत्यक्षादिकं प्रति प्रतिबंधकत्वाधिक्येन गौरवा
धेनोस्तत्र राजपुरुष इति समासे राजपदस्य राजसंबंधिनि लक्षणां स्वीकृत्य राजसंबंधिनो ऽभेदान्वयबोध एवेति
तत्स्तथाच घटादिरूपभिन्नविषयकप्रत्यक्षं प्रति तादृशसाम्ग्र्याः प्रतिबंधकतावच्छेदकस्य नाधिक्यमेव गौरवमित्यर्थः
प्रतिबंधानांवृत्ते नच भवन्मतेपीति राजसंबंध्यभेदान्वयवादिनस्मन्मतेपि तादृशान्वयबोधसामग्र्याः राजसं
बध्यभेदान्वयबोधसामग्र्या भिन्नविषयकप्रत्यक्षं प्रति प्रतिबंधकताधिक्येन गौरवं समानमित्यर्थः प्रतिपदीमुप
रञ्जुत्तरयति राजपदस्येति प्राचीनमतेपि राजपदस्य राजसंबंधिनि स्वारसिकलक्षणा यह काले ऽभेदसंबंधेन रा
जसंबंधिविशिष्टपुरुषे तात्पर्यग्रहसत्वे च भवन्मतेपि स्वत्वसंसर्गतावदि प्राचीनमतेपि कर्मधारयत्वेनाभिमता
त्पदार्थद्वयाभेदबोधकसमासत्वेनाभिमतात् तथाविधसमासवाक्यात् राजपुरुष इति समासवाक्यात् तादृश

व्युत्प.

बोधस्वीकारस्य राजसंबंध्यभेदबोधस्वीकारस्यावश्यकतया तादृशसामग्रीप्रतिबंधकतायाः राजसंबंधिप्रकारकाभेद
संसर्गकपुरुषविशेष्यकशाब्दबोधस्य नकराजपुरुषइतिवाक्यघटितयोग्यताज्ञानादिना ।रूपसामग्रीनिष्ठप्रतिबंध
कतायाः नवीनप्राचीनोभयमतसिद्धत्वादित्यर्थः राजपुरुषइतिसमासे नवीनमते राजपदे राजसंबंधिन्यना
दितात्पर्याधीना निरूढलक्षणा प्राचीनमते तु स्वारसिकी स्वेच्छाधीना प्रयोजनवतीलक्षणा न तथा प्राचीनमते विभ
क्त्यर्थस्व त्वादिसंसर्गकशाब्दबोधजनकसमासत्वं तत्पुरुषत्वमिति लक्षणात् राजपुरुषइति समासः षष्ठीतत्पु
रुषः यद्यपि तु राजपदस्य राजसंबंधिनि स्वारसिकलक्षणा तदार्थद्वयाभेदबोधकसमासत्वं कर्मधारयत्वमिति प्राची
नमतसिद्धकर्मधारयसमासलक्षणाक्रांततया राजपुरुष इति समासः कर्मधारयो भवति नवीनमते तु यत्र
वाक्यावस्थायां समासावस्थायां चाभेदबोधस्तत्रैव विग्रहवाक्यबोधितार्थाभेदबोधकसमासत्वरूपकर्मधारयस
मासत्वं यथा नीलमुत्पलं नीलोत्पलमित्यत्र राजपुरुष इति अत्र तु निपातातिरिक्तनामार्थयोरभेदान्वयनियमब
लादेव राजसंबंधिनि रूढलक्षणायाः सत्त्वे भेदबोधोऽपि राज्ञः पुरुष इति विग्रहदशायां राजसंबंधवान्पुरुष इति भेदान्वय
बोधोदये नाभेदान्वयबोधाभावान्निरूढलक्षणाक्रांतत्वेन न कर्मधारयत्वमिति भावः इदानीं नवीनमतं दूषयितुं कस्य
चिन्मतमुपन्यस्यति यत्त्वित्यादिना तदसदित्यंतेन दधिपश्येत्यत्र यथा लुप्तद्वितीयास्मरणेन कर्मत्वोपस्थित्या दधिनि
ष्ठकर्मत्वनिरूपकदर्शनाश्रयत्वमिति शाब्दबोधः तथा राजपुरुष इत्यत्रापि लुप्तषष्ठीस्मरणेन संबंधोपस्थित्या रा

८३॥

जनिरूपितस्वत्वाश्रयपुरुष इति शाब्दबोधस्संभवतीति निपातातिरिक्तनामार्थयोरिति व्युत्पत्तिविरोधपरिहाराय रा
जपदस्य राजसंबंधिनि निरूढलक्षणास्वीकृत्याभेदान्वयांगीकारो व्यर्थः तं दूषयति न चेत्यादिना अत्र राजपदा
र्थस्य मातंगपदार्थेऽन्वयबोधोपपत्तये लुप्तषष्ठीविभक्त्यनुसंधानदशायां ऋद्धराजपदयोः समानविभक्तिक
त्वसंपत्त्या ऋद्धराजपदार्थयोरभेदान्वयबोधोपपत्तिसंभवेन ऋद्धस्य राजमातंगा इति प्रयोगापत्तिरित्यर्थः सम
धत्ते यतस्तत्त्वेति न च ऋद्धस्य राजमातंग इत्यत्र ऋद्धराजादिपदानां ऋद्धराजादिपदोपस्थापितानामभे
दान्वयानुपपत्तिर्न वारणमपि तु समासघटकपदस्यासामर्थ्यातिदेशात् तत्समासासाधुत्वमेव वारणं समर्थः प
दविधिरिति सूत्रस्य पदसंबंधी यो विधिः समासादिरूपः स समर्थः विग्रहवाक्यार्थाभिधाने शक्तः स्यादर्थक
र्तृणां मते समासे एकार्थीभावलक्षणं सामर्थ्यं एकार्थीभावश्च विशिष्टशक्त्या विशिष्टैकार्थविशेष्यकबोधजन
कत्वं तच्च न संभवति द्वित्वादिप्रकारकधवखदिरादिनानापदार्थविशेष्यकबोधजनकधवखदिरौ इति द्वित्वादिति
समासे व्यासे किंतु समर्थः पदविधिरिति सूत्रस्य पदविधिः समासादिरूपः स समर्थः समर्थाश्रितः
समासाघटकपदनिराकांक्षपरस्परसाकांक्षपदाश्रितो बोध्यः समर्थात् समासाघटकपदनिराकांक्षपरस्परसा
कांक्षपदत्वमेव व्यपेक्षारूपं समासे सामर्थ्यमिदं च ऋद्धस्य राजमातंगा इत्यत्र समासाघटकऋद्धपदसापे
क्षतया राजपदस्य सापेक्षसमर्थवद्वृत्तीत्यतिदेशबलात् सामर्थ्यातिदेशात्तथा च ऋद्धस्य राजपुरुष इत्यत्राभि

युत्स्याभ्युपगत समासासाधुत्वनिर्वाहार्थोपात्त समासाघटकपदनिराकांक्ष त्वरूपविशेषणबललभ्यं समासासाधुत्वमपी
हानिर्दिशेद्गौणं अनिर्देशो हि मुख्यव्यवहारः यथागोरथः पुरुषो हस्तीतिपरस्परनिराकांक्षाणां समासो साधुस्त
थेहापि मुख्यव्यवहार एवं च ऋद्धस्य राजमातंगः । इत्यस्याप्रयोगे समासाधुत्वमेव हेतुरित्यर्थः तदुक्तं सविशेषणानां
वृत्तिर्नवृत्तस्य विशेषणयोगो नेति सविशेषणानां विशेषणयुक्तानां राजादिरूपविशेषणानां वृत्तिः समासरूपा ने
त्यर्थः विशेषणयुक्तानां विशेष्याणामपि समासादिरूपावृत्तिर्नेतितु नार्थः तथासति सुन्दराः राजमातंगा इत्यत्र सु
दररूपविशेषसापेक्षमातंगपदस्य राजपदेन समासानुपपत्तात्तादृशाप्रयोगानुपपत्तेः वृत्तस्य समस्तस्य मातं
गादिरूप राजादिरूपविशेषणस्य विशेषणयोगो न ऋद्धादिरूपविशेषणयोगो नेत्येवार्थः ननु वृत्तस्य समस्तस्य मा
तंगादिरूपविशेष्यस्यापि ऋद्धादिरूपविशेषणयोगो नेति तथासति ऋद्धाः राजमातंगा इत्यत्र राजपदेन समस्त
स्य मातंगस्य ऋद्धादिरूपविशेषणान्वययोग्यत्वेन तादृशप्रयोगानुपपत्तेस्तथा च सविशेषणानां विशेषणयु
क्तानां समासादिरूपावृत्तिर्नवृत्तानां समासादिरूपवृत्तिमतां विशेषणानां पुनर्विशेषणयोगो नेति तदर्थो बोध्यः
तत्सापेक्षत्वं चेति समासाघटकपदसापेक्षत्वं च तदर्थान्वित स्वार्थपरत्वं समासाघटकपदार्थान्वितोयः स्वार्थः
तत्र परं तात्पर्यं यस्य तत्समासाघटकपदार्थान्वित स्वार्थपरं तस्य भावस्तत्त्वं स्वार्थश्च स्वीयवृत्तिग्रहविशेष्यः
स्वीयो यो वृत्तिग्रहः शक्तिग्रहस्तद्विशेष्यस्तथा च समासाघटकं यदृद्धादिपदं तदर्थऋद्धत्वावच्छिन्नतान्वि
तोयः स्वार्थः राजपदीयशक्तिग्रहे राजा राजपदशक्य इत्याकारकविशेष्यो राजपदार्थस्तत्परत्वं तत्तात्प

कत्वं राजपद इति राजपदं समासाघटकऋद्धपदसापेक्षं भवतीति राजपदस्यासामर्थ्यात्समासाधुत्वं भवत एवं तदर्थान्वि
तस्वार्थपरत्वमित्यत्र स्वार्थपदेन स्वीयवृत्तिग्रहविशेष्यस्य विवक्षणादेवं चोरः शालितपत्र तत्पदं समासाघटकं चौरे
रितितृतीयापदं तदर्थः चारकरणकत्वं तदन्वितस्वार्थः शालितपदशक्तिग्रहविशेष्यः शातनकर्मीभूतः पत्रादिर्न
भवति किंतु शालितपदार्थैकदेशशातनक्रियैव भवति चारकरणकत्ववत्या शातनक्रियायास्तत्कर्मीभूतपत्रस्य
वृक्ष्यत इत्यर्थात् एवं चैत्रस्य दासभार्या इत्यत्र तत्पदं समासाघटकं चैत्रस्येति षष्ठीपदं तदर्थः नि[?]रूपि
तत्वं तदन्वितः स्वार्थः दासपदशक्तिग्रहविशेष्यो दासीनो भवति किंतु दासपदार्थैकदेशी भृत्यो दासत्वमेव भवति
चैत्रनिरूपितं तन्नृत्यस्वत्वं तद्वती भार्याय स्येत्यर्थात् तेन समस्यमान शालितदासपदादेः समासाघटकपदार्थान्वि
चौरैरिति चैत्रस्येति पद सापेक्षत्वं येनासमर्थत्वात्समासो न स्यादित्यर्थः ननु लाघवेन समासाघटकपदार्थान्वित स्वीयवृ
त्तिग्रहविषयार्थपरत्वमेव समासाघटकपदसापेक्षत्वं वाच्यं तथा च समासाघटकपदं चौरैरिति तृतीयापदं तदर्थः
चारकरणकत्वं तदन्वितोयः शालितपदीयवृत्तिग्रहस्य शातनकर्मीभूतः शालितपदशक्य इत्याकारकस्य प्रकार
त्वेन विषयीभूतोऽर्थः शातनं तत्परत्वस्य शालितपदे सत्वेन शालितपदस्यासमर्थत्वात्समासानुपपत्तिरत आह
तदर्थान्वितत्वेत्राभेदेनेति तथा चाभेदेन समासाघटकपदार्थान्वित स्वीयवृत्तिग्रहविषयार्थपरत्वमेव तत्सापेक्षत्वमे
वं च ऋद्धराजमातंग इत्यत्राभेदेन समासाघटक ऋद्धपदार्थान्वित राजपदीयवृत्तिग्रह॰ विषयीभूतराजरूपार्थप

रत्व स्य राजपदसत्वेन राजपदस्यासमर्थत्वात्समासासाधुत्वेनाप्रयोगः इत्येरः शालितपत्रं तु शालनपदीयवृत्ति
यद्विषयार्थस्य शालनस्य शारैरितिसमासाघटकपदार्थेन शारकरणकत्वेन सह भेदान्वयानसंभवनिशारकरण
कत्वस्य शालनधर्मत्वेन शालनरूपत्वाभावादाश्रयतासंबंधेन वशारकरणकत्वस्य शालनपदार्थेन शारकरणकत्वे
न सहाभेदेनान्वितस्य यद्वृत्तियद्विषयार्थपरत्वरूपसमासाघटकपदसापेक्षत्वस्य शालितपदेऽभावेन समासा
घटकपदनिराकांक्षत्वे सति परस्परसांकांक्षत्वेन शालितादिपदस्य समर्थतया समासस्य साधुत्वेन शारैः शालित
पत्र इत्यादिप्रयोगाः साधवः यत्त्विसादिनोक्तमतं दूषयति स्वारसिकलक्षणेति राजपुरुष इत्यत्र राजपदस्य राज
संबंधिनि स्वारसिकलक्षणासादिनातात्पर्यविषयार्थनिष्ठलक्षणातस्याः राजपदशाक्यसंबंधिपुरुष इति विग्रह
काले नाहन्नासमभिव्याहारज्ञानादेः राजपदाव्यवहितोत्तरपुरुषपदज्ञानादेः तथाविधबोधजनकतायाः राजसं
बंधिप्रकारकाभेदसंसर्गकपुरुषविशेष्यकबोधजनकतायाः क्लृप्तत्वात् उभयमतसिद्धत्वात् तत्र राजपुरुष इति सम
सघटकराजपदे निरूढलक्षणाया अनादितात्पर्यार्थनिष्ठलक्षणायाः स्वीकारे गौरवाभावादित्यर्थः अत्रायंभावः
राजसंबंध्यभिन्नपुरुष इति बोधे राजपदाव्यवहितोत्तरपुरुषपदत्वरूपानुपूर्वीविशेषरूपसमभिव्याहारज्ञानं
कारणं तत्र वृत्त्यापदजन्यपदार्थोपस्थितिः सहकारिणी वृत्तिश्च शक्तिलक्षणान्यतरसंबंधः शक्तिज्ञानं लक्षणाज्ञा
नं च पदार्थोपस्थितिद्वारा शाब्दबोधं प्रति कारणं न तु लक्षणनिष्ठस्वारसिकत्वाभिरूढत्वज्ञानमपि शाब्दबोधे

८५॥

रणं तद्विरहेपि शाब्दबोधोदयादिति न गौरवावकाश इति ननु शक्तेरिव निरूढलक्षणाया अपि स्वारसिकप्रयोगनि
यामकतया प्रयोगस्यस्यैव वाक्यार्थतात्पर्यकत्वात्स्वारसिकप्रयोगसंपादकवाक्यार्थज्ञानेन निरूढत्वविशिष्टलक्षणा
ज्ञानमेव कारणं वाच्यं तथा च गौरवमिति अभिप्रायेण शंकते न च स्वारसिकेति तत्र राजपुरुष इत्यत्र तादृशबोधस्य
राजसंबंध्यभिन्नः पुरुष इत्यन्वयबोधस्य प्राचीननवीनोभयमतसिद्धत्वेपि निरूढलक्षणावादिनवीनमते संबं
धितात्पर्यस्य राजपदं राजसंबंधिबोधकं भवत्विति तात्पर्यस्यानादित्वकल्पने गौरवमिति स्वरसः वक्तुरिच्छात
दधीना लक्षणा स्वारसिकी लक्षणेति योगेन सादितात्पर्यविषयीभूतार्थनिष्ठलक्षणाया एव स्वारसिकलक्षणात्वा
त् एवं भनादितात्पर्यमनादितात्पर्यमनादि वक्तुरिच्छा तद्विषयीभूतोऽर्थो राजसंबंधी तन्निष्ठा शाक्यसंबंध
रूपा लक्षणेति योगेनानादितात्पर्यविषयीभूतार्थनिष्ठलक्षणाया एव निरूढलक्षणात्वात् एवं च स्वारसिकत्वनि
रूढलक्षणाज्ञानयोः पदार्थोपस्थितिद्वारा शाब्दबोधकारणतासाम्येपि निरूढलक्षणाया घटकतात्पर्येऽनादि
त्वविशेषणमधिकमिति गौरवमित्यर्थः तथा च राजपुरुष इत्यलुप्तविभक्तिस्मरणेन राजनिरूपितस्वत्ववान् पु
रुष इत्येव बोधः समुचितो न तु निरूढलक्षणया राजसंबंध्यभिन्नः पुरुष इति बोध इति शंकाशयः समाधत्ते राजपुरुष
इत्यादीति राजपुरुष इत्यादिवाक्यजन्या राजनिरूपितस्वत्ववान् पुरुष इति शाब्दबोधात्पूर्वं नियमतः यदा यदा राजपुरु
ष इति वाक्यात्तादृशबोधस्तदा तदा तत्पूर्वक्षणे लुप्तविभक्तिस्मरणमिति नियमतः स्मरणकल्पनापेक्षया तथा रा

व्यु·टी·

इष्ट राज्ञोः राज्ञां वा पुरुष इति तात्पर्यवशाच्छाब्दबोधसंभवात् उ· सो सामूरूपानंतविभक्तिस्मरणकल्पनापेक्षया तथा
कल्पितानंतलुप्तविभक्तिस्मरणेषु तादृशसंबंधादिरूपार्थविषयकोपस्थितिनिष्ठकार्यतानिरूपितार्थ च तादृशशा
ब्दबोधरूपकार्यनिष्ठकार्यतानिरूपितानन्यथासिद्धकार्यनियतपूर्ववर्तित्वरूपकारणत्वकल्पनापेक्षया च तात्प
र्यनादित्वकल्पनायां गौरवविरहात् तात्पर्यविषयीभूतार्थे शक्यसंबंधरूपलक्षणात्भयमतसिद्धैव तात्पर्यपरम्
नादित्वरूपधर्ममात्रकल्पना लु· सु· सादिविभक्तिस्मरणरूपधर्मिकल्पना न तत्र संबंधादिरूपार्थविषयकोपस्थि
त्यादिकारणत्वरूपधर्मकल्पना तच्च लघीयसीति न तात्पर्यानादित्वकल्पने गौरवमिति तात्पर्यानादित्वं च स्वज्ञानज
न्यशाब्दबोधध्वंसकालीनस्वज्ञानजन्यशाब्दबोधसामान्यकत्वं स्वं तात्पर्यं तज्ज्ञानजन्यो यः शाब्दबोधः राजसंबंध
भिन्नः पुरुष इत्याकारकस्तद्ध्वंसकालीनं स्वज्ञानजन्यं तात्पर्यज्ञानजन्यं शाब्दबोधसामान्यं शाब्दबोधमात्रं यस्य
स्वशब्दोपात्ततात्पर्यस्य तत्त्वं ज्ञानजन्यशाब्दबोधमात्रं यस्य स्वशब्दोपात्ततात्पर्यस्य न तु स्वज्ञानजन्यशाब्दबोधध्वं
सकालीनस्वज्ञानजन्यशाब्दबोधसामान्यकः न स्यभावस्तत्त्वं नत्र तात्पर्ये सतीति तात्पर्यं च चैत्रीयतात्पर्यत्वेन मैत्रीय
तात्पर्यत्वेन विशिष्यतया ग्राह्यं किंतु तात्पर्यत्वेन तात्पर्यमात्रं ग्राह्यं तथा च तात्पर्यज्ञानजन्यः सर्वोऽपि शाब्दबोधः पूर्वपूर्वता
त्पर्यज्ञानजन्या ये शाब्दबोधास्तद्ध्वंसकालीनो भवतीति सर्वमपि तात्पर्यं स्वज्ञानजन्यशाब्दबोधध्वंसकालीनस्वजन्यशा
ब्दबोधसामान्यकं भवति स्वारसिकलक्षणास्थलेऽपि तु चैत्रीयप्राथमिकतात्पर्यज्ञानजन्यः शाब्दबोधः चैत्रीयप्राथमिक

७६॥

तात्पर्यज्ञानजन्यशाब्दबोधध्वंसकालीनो न भवतीति तानादित्वं तात्पर्यस्य निरूढलक्षणास्थले तु सर्वेऽपि तात्पर्यज्ञानज
न्याः शाब्दबोधाः पूर्वपूर्वतनतात्पर्यज्ञानजन्यशाब्दबोधध्वंसकालीना भवंत्येवेति अत्र तात्पर्यस्यानादित्वमत्र प्राथमिक
त्वेऽस्मिन्नपि तात्पर्यं नास्ति पूर्वपूर्वतनतात्पर्यसत्त्वादिति भावः यत्र राजपदस्य राजसंबंधिनि स्वारसिकलक्षणाग्र
हस्तत्र तादृशबोधस्योभयमतसिद्धतया तादृशसमभिव्याहारस्य राजसंबंधिनि पुरुषे बोधकारणतायाः कल्प
नयैव निर्वाहे सर्वत्र लुप्तविभक्तिस्मरणकल्पने मानाभावादिति क्वचित्पुस्तके उन्तोल्लिखितः पाठः स च गतार्थत्वानुरु
क्तः वस्तुतो राजसंबंध्युपस्थितिं विना राजपुरुष इत्याकारकसमभिव्याहारमात्रेण राजसंबंधभिन्नः पुरुष इति शाब्दबो
धासंभवाच्च न युक्तः इति बोध्यं न चैवं दधिपत्रपनीत्यादावपि लुप्तविभक्त्यनुसंधानं न स्यादिमात्रांवृत्ते न चैवं दधिपत्रपनी
ति एवं लुप्तविभक्तिस्मरणं विनैव निरूढलक्षणयैव निर्वाहे धत्त्वर्थे न दर्शनेन समंतस्य दधिकर्मककस्याभेदान्वयसंभवा
त् तत्रापि दधिपदोत्तरमपि लुप्तविभक्तिस्मरणं न कल्पनीयमित्यर्थः समाधत्ते दध्यादिपदस्येति यथा दधिकर्मक
पत्रपतिदधिकर्मकपत्रपनीत्यादिस्थलेऽपि दधिकर्मकाभिन्नदर्शनान्वयबोधो न भवतीति तद्वद्दध्यादिपदस्य दधिकर्मका
दौ लक्षणायत्र हेतोः तत्रापि उक्तस्थलेऽपि दधिपत्रपनीत्यत्रापि तस्य दध्यादिपदस्य द्वितीयेतरप्रथमान्तनीयरूपविभक्त्यं
तत्त्वभ्रमदशायां दधिकर्मकदर्शनबोधानुदयापत्तेः तथाभवन्मते दधिपत्रपनीति स्थलेऽपि लुप्तविभक्त्यनुसंधानक
र्त्ते मते द्वितीयेतरविभक्त्यंतत्वभ्रमदशायां कालेयादधिपत्रपनीत्यत्र दधिकर्मकदर्शनान्वयबोधानिवृत्तदधिपदोत्तर

व्यु.टी.

पश्यतिपदतद्रूपांशांशस्तातानघटितासामग्रीनस्याः द्वितीयेतरप्रथमाविभक्त्यंतत्वभ्रमदशायामपितत्वाद्दधिकर्मत्वदर्श
नान्वयस्यापत्तिरितिहेतोः द्वितीयांतदधिपदंपश्यतीतिपदसमभिव्याहृतमितिद्वितीयांतदधिपदत्वावच्छिन्नधर्मिकस्या
तांतदृशाधानुसमभिव्याहारज्ञानस्यतादृशान्वयबोधहेतुतायाः दधिकर्मत्वदर्शनान्वयबोधवारणतायाः श्चावश्यकत्व
त्वेन दधिपश्यतीत्यादौतुसद्द्वितीयास्मरणस्यावश्यकत्वादित्यर्थः ननुदधिपश्यतीत्यत्रइवराजपुरुषइत्यत्रापिषष्ठीत
रविभक्त्यंतत्वभ्रमदशायांतादृशबोधवारणायतुल्यषष्ठीविभक्त्यनुसंधानमावश्यकमेवेत्यतआह राजसंबंधीतिराज
पुरुषइत्यत्रराजपदस्यराजसंबंधिनिस्वारसिकलक्षणाइदशायामिवराज्ञः पुरुषइत्यत्रापिराजपदस्यराजसंबंधिनिल
क्षणायाइदशायांराजसंबंधाधुपस्थितिघटितराजपुरुषइतिस्थलीयसामग्रीबलाद्राजसंबंधिअभिन्नःपुरुषइतित्वान्वबो
धापत्तिस्तद्वारणायराजसंबंधिप्रकारकाभेदसंसर्गकपुरुषविशेष्यकबोधंप्रतिराजपदाव्यवहितोत्तरपुरुषपदत्वप्रकारक
ज्ञानस्यहेतुतायाःतुल्यषष्ठीविभक्त्यनुसंधानकर्तर्मतेप्यवश्यकल्पनीयतयाराजपुरुषइत्यादौनिरूढलक्षणायाइ
दशायांराजादिपदस्यतृतीयाद्यंतत्वभ्रमकालेतृतीयादिविभक्तिकृतव्यवधानेनराजपदाव्यवहितोत्तरपुरुषपदत्व
प्रकारकज्ञानस्योभयमतसिद्धकारणताकस्याभावादेवराजसंबंधाभेदान्वयासंभवात्राजपुरुषइत्यत्रतुल्यषष्ठीवि
भक्त्यनुसंधानंनिर्युक्तिकमेवेत्याशयः ननुदधिपश्यतीत्यत्रापिदधिपदाव्यवहितोत्तरपश्यतिपदत्वप्रकारकज्ञानस्य
दधिकर्मत्वदर्शनान्वयबोधकारणत्वस्यनादेवद्वितीयेतरविभक्त्यंतत्वभ्रमदशायांदधिकर्मत्वदर्शनान्वयबोधाय

६६॥

स्यसंभवेनदधिपश्यतीत्यत्रापितुल्यद्वितीयानुसंधानंनिर्युक्तिकमित्यतआह दधिपश्यतीत्यादाविति अकृतत्वा
त्तुल्यद्वितीयानुसंधानकर्तर्मतेतदनुसंधानकालेदधिपदाव्यवहितोत्तरपश्यतिपदत्वप्रकारकज्ञानस्यतादृ
शबोधहेतुतायाअसिद्धत्वेनतादृशहेतुतायाउभयमतसिद्धत्वाभावात् पश्यतिदधीतिदधिपदाव्यवहितोत्तर
पश्यतिपदत्वप्रकारकज्ञानाभावेपिपश्यतिदधिदधिपश्यतिचैत्रोदधीत्यादौदधिकर्मत्वदर्शनान्वयबोधदर्श
नाद्व्यभिचारेणतादृशहेतुतायाः दधिपदाव्यवहितोत्तरपश्यतिपदत्वप्रकारकज्ञानहेतुतायाअवश्यकल्प
नत्वाकल्पयितुमशक्यत्वादित्यर्थः अथतंडुलंपचतीत्यारभ्यइतितुचिंतनीयमित्यंतेनग्रंथेनतंडुलं
पचतीत्यादाविति ननुयदितंडुलादिपदस्यैवतंडुलादिकर्मत्वेलक्षणातर्हिविभक्तिप्रयोगोनिरर्थकः स्यादित्य
तआह विभक्तिः साधुत्वार्थमिति नकेवलाप्रकृतिः प्रयोक्तव्यानकेवलःप्रत्ययइत्यभियुक्तोक्तेः नापदंप्रयुंजी
तइत्यभियुक्तोक्तेश्चविभक्तिप्रयोगस्यसाधुत्वार्थकत्वेननिरर्थकत्वमितिभावः नन्वेकवचनमुत्सर्गतः करि
ष्यतइतिभाष्यात्प्रथमोपस्थितत्वरूपलाघवाच्च प्रथमैकवचनप्रयोगस्यैवसाधुत्वार्थत्वेनद्वितीयाविभक्तेः
प्रयोगेनिरर्थकत्वमेवेतिचेन्नद्वितीयाप्रयोगस्यातिप्रसंगनिरासार्थत्वादित्याह नचद्विभक्त्यंतेतिनातिप्रसंगइति
तंडुलंपचतीत्यत्रतंडुलकर्मकत्वप्रकारकाभेदसंसर्गकपाकविशेष्यकबोधेद्वितीयासमभिव्याहारोनियामकः राज्ञः
पुरुषइत्यत्रराजसंबंधिप्रकारकाभेदसंसर्गकपुरुषविशेष्यकबोधेषष्ठीसमभिव्याहारोनियामकइतिद्विती

व्यु.टी.

दिसमभिव्याहाराभावात्तंडुलराजादिपदलक्षणायाः पूर्वकत्वात्तत्राबोधापत्तिरूपो ऽतिप्रसंगो नेत्यर्थः ननु विभक्ते
रेव प्रकृत्यर्थविशेषितस्वार्थे लक्षणास्त्विति नोपपद्यत इत्याशंक्याह विभक्तेः क्वापीत्यादिरिति लक्षणायाः शा
क्तिपूर्वकत्वेन विभक्तिसामान्यस्य पदसाधुत्वार्थकत्ववादिमते विभक्तेः क्वापि शक्तेरसिद्धतया शक्यसंबंधरूपलक्षणा
याः संभवाभावादित्यर्थः ननु प्रकृतेरपि विभक्त्यर्थाविशेषितस्वार्थबोधकत्वं न दृष्टचरमिति प्रकृतेरपि केवलार्थे श
क्तेरसिद्धतया तस्यापि विभक्त्यर्थमिति प्रकृतेरपि केवलार्थे शक्तेरसिद्धतया अपि विभक्त्यर्थमिश्रितार्थे ऽजहत्स्वार्थल
क्षणा न संभवतीत्यत आह तंडुलः प्रमेय इत्यादाविति विभक्त्यर्थामिश्रितस्यैव केवलस्यैव प्रकृत्यर्थस्य तंडुलत्वाद्य
वच्छिन्नस्य भानानुभवविषयत्वात् प्रकृतेः तंडुलादिपदस्य स्वार्थे तंडुलत्वाद्यवच्छिन्ने शक्तेः क्लृप्ततया उभयमत
सिद्धतया तत्र प्रकृतौ तंडुलादिपदे विभक्त्यर्थमिश्रितस्वार्थलक्षणासंभवादित्यर्थः इदानीं विभक्तिसामान्यस्य पद
साधुत्वार्थकत्ववादिमतमचितत्वे हेतुं वदन् समाधत्ते राजादिपदस्येति यथा संबंधिनः पुरुषस्तत्र राजसंबंध्यभिन्न
ः पुरुष इति नान्वयबोधः एवं राजसंबंध्यभिन्नः पुरुष इत्यपि नान्वयबोधः राज्ञा संबंध्यभिन्नः पुरुषे ऽन्वयप्रयोक्तृत्वात्स
र्वभावादपि तु राजसंबंधिनिरूपितसंबंधवान् पुरुष इत्येवान्वयबोधः राजसंबंधिनिरूपितसंबंधवत्त्वेन पुरुषे वक्तृता
त्पर्यात् तथा राज्ञः पुरुष इत्यत्रापि राज्ञपदं राजसंबंधिनि शक्तमिति राजादिपदस्य राजसंबंध्यादौ शक्तत्वभ्रमद
शायामपि राजसंबंधवान् पुरुष इत्येवान्वयबोधः राज्ञः पुरुष इति वाक्यप्रयोक्तुस्तत्रैव तात्पर्यादिति शक्तत्वभ्रमदशा

८५॥

वाचकत्वमुचितमिति शंकाग्रंथाशयः अत्र वैयाकरणः प्रकृतीनां संख्यावाचकत्वे युक्तिमाह घटादिपदस्येति
घटादिपदादेकत्वबोधो भवति इति तात्पर्याधीनपरपदशक्यस्य एकत्वमिति लक्षणायाः सत्त्वे घटः प्रमेय इति वाक्यादे
कत्वं प्रमेयमिति बोधस्य पटवत्कुलत्वमिति वाक्यादेकत्ववत्कुलत्वमिति बोधस्य सर्ववादिसंमतत्वेन तादृशबोधप्र
ति घटादिपदवृत्तिज्ञानजन्यैकत्वोपस्थितेर्हेतुत्वं सर्ववादिसिद्धं तदा भवेत् यदि सर्वेषां घटादिपदानां सर्वदैकत्वादौ
लक्षणा सर्ववादिसंमता स्यात्तदेव न संभवति वक्तुरिच्छाधीनलक्षणायाः सर्वदाभावेऽनुमर्नेर्हत्वादित्याशयेनाने
व्यायिकः प्रकृतीनां संख्यावाचकत्वमते गौरवप्रदर्शनमुखेन विभक्तीनां संख्यावाचकत्वं व्यवस्थापयति यादृश्या
दृशेति तादृशेति एकत्वाद्यगृहीतलक्षणावृत्तिकानंतघटादिपदवृत्तिज्ञानजन्यैकत्वोपस्थितीनामेकत्वादिविषय
कशाब्दबोधहेतुत्वकल्पनं प्रकृतेः संख्यावाचकत्ववादिवैयाकरणानामधिकमिति एकत्वाद्यगृहीतलक्षणावृत्तिका
नंतघटादिपदवृत्तिज्ञानजन्यैकत्वाद्युपस्थितीनामेकत्वादिविषयकशाब्दबोधहेतुत्वकल्पनापेक्षया ऽल्पतरा
णामेकविंशतिसंख्याकानां दिविभक्तीनां वृत्तिज्ञानजन्याया एकत्वादिविषयकोपस्थितयस्तासामेकत्वादिविषय
कशाब्दबोधहेतुताकल्पना एव लाघवमित्यर्थः ननु विभक्तीनां संख्यावाचकत्ववादिमते एकत्वादिसंख्यायां
स्वादिपदवृत्तिज्ञानजन्यैकत्वोपस्थितेरेकत्वादिप्रकारकघटादिविशेष्यकबोधहेतुताकल्पनायाश्चावश्यकत्वेन

गौरवादेकत्वविशिष्टघटादौ लाघवेन घटादिपदानां लक्षणैवोचितेति कस्यचिन्मतं उपन्यस्य दूषयति एतेनेत्यादिना ए
तेन पूर्वोक्तेन वक्ष्यमाणेन च अन्वयश्चास्य परास्तमित्यन संख्याविशेषावच्छिन्नः एकत्वादिरूपसंख्यावि
शिष्टः संख्याविभक्त्यर्थो ननु तत्र हेतुमाह शाब्दे विभक्तिजन्येति नन्वेकत्वादौ संख्याविशिष्टघटविषयक
शाब्दबोधे घटादिपदवृत्तिज्ञानजन्यैकत्वविशिष्टघटविषयकोपस्थितेर्हेतुताकल्पनं तन्मते अधिकमित्याह
घटादिपदादेरिति तज्जन्येति घटादिपदजन्येत्यर्थः तथा च घटादिपदस्यैकत्वविशिष्टघटादौ लक्षणाग्रहद
शायामेकत्वविशिष्टघटादिविषयकशाब्दबोधं प्रति घटादिपदवृत्तिज्ञानजन्यैकत्वविशिष्टघटविषयकोपस्थि
तेर्हेतुताकल्पनस्य सर्वसंमतत्वेन तन्मते विशिष्टविषयकोपस्थितेर्विशिष्टविषयकशाब्दबोधहेतुताकल्प
नं नाधिकमिति भावः तथाविधोपस्थितिहेतुतायाः घटादिपदवृत्तिज्ञानजन्यैकत्वादिविशिष्टाद्युपस्थितिहेतुता
पारस्त्यर्थः न चैवं केवलादपि घटपदादेकत्वप्रकारकघटविशेष्यकबोधापत्तिः घटोऽस्तीत्यादौ एकत्वप्रकारकघटविशे
ष्यकबोधजनकघटपदवृत्तिज्ञानजन्यैकत्वविशिष्टघटोपस्थित्यादिसामग्र्याः तत्रापि सत्वादित्यत आह पदांत
रासमभिव्याहृतेति केवलघटपदस्थले एकत्वविशिष्टघटविषयकस्मरणमेवांगीक्रियते न तु तादृशशाब्द
बोध एकपदार्थे परपदार्थसंसर्गावगाहिज्ञानस्यैव शाब्दबोधत्वादिति भावः अत्र प्राचीनवैयाकरणसंमति

यां भोः यथा शाब्दबोधस्तथा राजादिपदस्य राजसंबंध्यादौ लक्षणाग्रहदशायामपि राजसंबंधिनिरूपितसंबंधवान् पुरुष इत्येवा
न्वयबोधस्तस्यैव सर्वसंमतत्वेन सिद्धत्वात् षष्ठ्यादिविभक्तीनां संबंधादिवाचकत्वमंतरा न तादृशबोधस्योपपादयितुमशक्यत्वा
च्च संबंधादिरूपार्थे षष्ठ्यादिविभक्तीनां संबंधादिवाचकत्वमंतरा लक्षणैव तादृशबोधोपपत्तिः विभक्तिसामान्यस्य निरर्थक
त्वादिमते षष्ठ्यादिविभक्तेः कुत्रापि शक्तेरकल्पतया शक्यसंबंधरूपलक्षणाया असंभवादिति संबंधादीनां षष्ठ्यादिवि
भक्तिशक्यत्वावश्यकत्वया विभक्तीनां निरर्थकत्ववादिमतं चिंत्यमित्यर्थः पचतीति चैत्र इत्यादावपि तिपचतीति चैत्र इत्यत्र कृतिसं
बंधेन धात्वर्थवांश्चैत्र इत्यन्वयबोधस्यैकत्वे प्रतियोग्यभावान्वयोस्तुल्ययोगक्षेमत्वमिति न्यायेन न पचतीति चैत्र इत्यादावपि कृतिसं
संसर्गावच्छिन्नप्रतियोगिताकधात्वर्थाभाववांश्चैत्र इत्येवान्वयबोधो वक्तव्यः स च कृतिसंबंधस्य वृत्त्यनियामकतया वृत्त्यनियामक
संसर्गावच्छिन्नप्रतियोगिताकाभावस्याप्रसिध्या नञा प्रत्यायनासंभवादनुपपन्नः इति न पचतीति चैत्र इत्यादिवाक्यादन्वयबो
धानुपपत्तिरपि विभक्तिसामान्यस्य निरर्थकत्ववादिमतं चिंत्यमिति चेत्यत्र हेतुत्वेन द्रष्टव्या इत्यर्थः अथैवं न पचति चैत्र इत्यादावन्वय
बोधानुपपत्तिभयेन तिङ्विभक्तेः कृत्यर्थकत्वसंभवेऽपि जानाति इत्यादावाख्यातस्य निरर्थकत्वमेवेति मणिकारमतमस्त्वि
त्याशंकते अथेत्यादि चेदित्यंतेन एवं कृतिसंबंधस्य वृत्त्यनियामकतया न पचति चैत्र इत्यत्र शाब्दबोधानुपपत्त्या ख्यात
स्य कृत्यर्थकत्वेन सार्थक्योपपादनेऽपि चैत्रो न जानातीत्यत्र वृत्तिनियामकाश्रयतासंसर्गावच्छिन्नप्रतियोगिताकज्ञानाभाव
वांश्चैत्र इति बोधसंभवादाख्यातस्याश्रयार्थकत्वं निर्युक्तिकमित्यर्थः आख्यातस्य सार्थकत्ववादिसिद्धांतिमध्ये चांकृते

नचधात्वर्थेति साक्षादिति आख्यातार्थाश्रयत्वमद्वारीकृत्य धात्वर्थज्ञानादेराश्रयतासंबंधेन चैत्रादावन्वयबोधापायसाम
ग्र्याः तस्याः पदार्थोपस्थितियोग्यताज्ञानादिरूपसामग्र्याः ज्ञानं चैत्र इत्यादावपि ज्ञानप्रकारकाश्रयत्वसंसर्गकचैत्रविशेष्य
कान्वयबोधापत्तिः स्यादिति धात्वर्थज्ञानादेः चैत्रादिरूपप्रातिपदिकार्थे आश्रयतासंबंधेन साक्षान्नान्वयः किंत्वाख्या
तार्थाश्रयत्वं द्वारीकृत्य धात्वर्थज्ञाननिरूपिताश्रयत्ववांश्चैत्र इत्येवान्वयबोधस्तथा चाख्यातस्याश्रयत्वार्थकत्वमावश्यकमि
तिभावः पुनरपि पूर्वपक्षी सिद्धांतिनाकृतामाशंकामुद्धरति तादृशान्वयबोध इति आश्रयतासंबंधेन ज्ञानवांश्चैत्र इति
ज्ञानप्रकारकाश्रयत्वसंसर्गकचैत्रविशेष्यकान्वयबोधे आख्यातैकवचनांतज्ञाधातुसमभिव्याहृततद्व्याहाराभावात् आश्रय
तासंबंधेन ज्ञानवांश्चैत्र इति बोधापत्तिरित्याख्यातस्याश्रयत्वार्थकत्वकल्पनं निर्युक्तिकमेवेति भावः ननु पूर्वपक्षिमते ता
दृशसमभिव्याहारज्ञानस्य कारणत्वकल्पनमेवाधिकमित्यत आह + हंत प्रथमैकवचनांतचैत्रादिपदविषयकसमभिव्याहार
ज्ञानस्य हेतुत्वात् तथा च ज्ञानं चैत्र इत्यत्राख्यातांतज्ञाधातुसमभिव्या + ॥ भवतोपीति आख्यातस्याश्रयत्वार्थ
कत्ववादिसिद्धांतिनोपि आश्रयताप्रकारकबोधे ज्ञाननिरूपिताश्रयतावांश्चैत्र इति बोधे तादृशसमभिव्याहारज्ञानहेतुतायाः
आख्यातैकवचनांतज्ञाधातुसमभिव्याहृतप्रथमैकवचनांतचैत्रपदज्ञानस्य कारणताया आवश्यकत्वात् अन्यथा ज्ञानाश्र
यत्वं चैत्र इत्यत्र ज्ञानं चैत्र इत्यत्र इति चैत्र इत्याकारकबोधे बहुवचनांतज्ञाधातुसमभिव्याहृतैकवचनांतचैत्रपदसमभिव्याह
रस्थले चाश्रयताप्रकारकशाब्दबोधापत्तेः पदजन्यपदार्थोपस्थितियोग्यताज्ञानादिघटितसामग्रीसत्त्वादिति समभि

व्याहारज्ञानकारणताया उभयमतसिद्धत्वात् पूर्वपक्षिमते तादृशसमभिव्याहारज्ञानकारणताकल्पनमधिकमिति भावः
इदानीमाख्यातस्य सार्थकत्वं व्यवस्थापयितुं कस्यचिदेकदेशिनो मतं प्रदर्शयति यत्त्वित्यादिना तदसदित्यंतेन तत्र पाका
कृतिमांश्चैत्र इत्याकारकबोधे आवश्यकं न पचति चैत्र इत्यादिस्थले तु अनुरोधेन पचति चैत्र इति स्थले द्वितीयपाकानुकूलकृतीति
प्रकारकसमवायसंसर्गकबोधं प्रति समवायेनैव आख्यातजन्यकृत्युपस्थितित्वेन कारणत्वस्योभयमतसिद्धत्वात् तादृ
शबोधे आख्यातजन्यकृत्युपस्थितेः कारणत्वकल्पनमावश्यकमित्यर्थः तत्तदर्थविशेषाश्रितेत्येव पचतीत्यत्र कृत्युप
स्थितित्वेन न तु पततीत्यत्र प्रतियोगित्वोपस्थितित्वेन जानातीत्यत्राश्रयत्वोपस्थितित्वेनात्मनिष्ठप्रत्यासत्त्या समवायेन कार
णतास्वीकारे शब्दत्वादिरूपसहस्रार्थभेदेनाख्यातजन्योपस्थितीनां कारणताबाहुल्यमिति हेतोरर्थविशेषानंतर्गतप्रति
योगित्वादिरूपाननिवेश्य पचतीत्यादौ धात्वर्थपाकनिष्ठप्रकारतानिरूपितविशेष्यतासंबंधेनान्वयबोधं प्रति शाब्दबोधवि
शेष्यतावच्छिन्नविशेष्यतासंबंधेनाख्यातरूपप्रत्ययजन्योपस्थितिः कारणमिति विषयतानिष्ठप्रत्यासत्त्यैव कार्यकारणभावस्वी
कारे लाघवमित्यर्थः अनुकूलतासंबंधेन पाकविशिष्टा कृतिरिति बोधात् विशेष्यतासंबंधेन शाब्दबोधप्रत्ययजन्योप
स्थित्योः कृतौ सत्त्वादिति भावः तादृशकारणबोधेनेति चैत्रो जानातीत्यत्र चैत्रविशेष्यतासंबंधेनाख्यातरूपप्रत्ययजन्यो
पस्थितिरूपकारणाभावेन चैत्रो ज्ञानवानिति बोधो न संभवतीत्यर्थः ननु धात्वर्थनिष्ठप्रकारतानिरूपितविशेष्यतासंबंधेन
शाब्दबोधं प्रति समानविशेष्यताप्रत्यासत्त्या प्रत्ययजन्योपस्थितेः हेतुत्वं न दोषपदेन यदि धातुत्वं प्रत्ययत्वं चानुगतं स्व

चं भवेत्तदेव तु न संभवति यतः भ्वादिगणपठितत्वे सति क्रियावाचकत्वं धातुत्वं तु न क्रियावाचकत्वे सति भ्वादिगणपठितत्वं धा
तुत्वं नोभयमपि विनिगमनाभावात् एवं प्रत्ययत्वमपि यथा दुर्वचं तथा विवेचितं अधस्तादित्याशयेनाह यदि च धातुत्वप्रत्य
यत्वादीनामिति तथा च धातुत्वप्रत्ययत्वादीनां दुर्वचतया धात्वर्थप्रकारकान्वयबोधे प्रत्ययजन्योपस्थितेः कारणत्वासंभवेन
जानाति चैत्र इत्यत्राश्रयतासंबंधेन ज्ञानवांश्चैत्र इति बोधे बाधकाभावेनाख्यातस्य निरर्थकत्वं तदवस्थमेवेति भावः एतद्दोषे
मतेऽप्याख्यातस्य सार्थकत्वमुपपादयति तदापीत्यादिना तदापि धातुत्वप्रत्ययत्वादीनां दुर्वचतया तत्समर्थकप्रकारकान्वय
बोधे प्रत्ययजन्योपस्थितेः कारणत्वेऽपि यत्र जानाति चैत्र इत्यत्र ज्ञाधातोरेव पाकादौ पाकगमनज्ञानादिषु लक्षणा तत्र जानाति
चैत्र इत्यत्र लक्षणाग्रहदशायां जानातिवाक्यात् पाकगमनाद्यनुकूलकृतिमान् इति प्रकारकबोधोऽसमाप्तधात्वर्थप्रकारकान्वयबो
धे ज्ञाधात्वर्थपाकगमनादिष्ठप्रकारतानिरूपितविशेष्यतासंबंधेन कृतौ जायमानान्वयबोधे अव्यवहितोत्तरत्वप्रकारकत्वनिष्ठ
पदत्वादिकं ज्ञाधातूत्तरत्वनिष्ठपदत्वमित्याकारकं तज्जन्यायाः कृत्युपस्थितेरस्याः समानविशेष्यतापन्नत्वासत्त्वाच्छाब्दबोधे विशेष्य
ताविशिष्टविशेष्यतासंबंधेन हेतुतायाः कारणतायाः कल्पनीयतया तत्र स्याविकरणीयतया तादृशकारणबाधात् ज्ञाधातूत्तरत्व
निष्ठपदजन्योपस्थितिरूपकारणस्य विशेष्यतासंबंधेन चैत्रे जानातीत्यत्राश्रयतासंबंधेन ज्ञानवांश्चैत्र इत्याकारकशाब्दबोधा
नुपपत्तिर्दुर्वारैवेत्यर्थः अत्र यद्यपि पाकप्रकारककृत्यादिविशेष्यकबोधो न स्यात् इत्येव वक्तुमुचितं ननु चैत्रविशेष्यकपाककृ
तिप्रकारकबोधो न स्यादिति तस्य फलवत्त्वात् धात्वर्थप्रकारकान्वयबोधे तदव्यवहितोत्तरत्वनिष्ठपदत्वज्ञानजन्यकृत्युपस्थितेर्विशे

ष्यतासंबंधेन हेतुत्वादिसूपसंहाराच्च तथापि जानाति चैत्र इत्यादौ पाकादिकृतिप्रकारकचैत्रादिविशेष्यक एव बोधो न तु धात्व
र्थप्रकारकाश्रयत्वसंसर्गकचैत्रादिविशेष्यकबोध इति वक्तुं तथोक्तमिति तत्त्वं अत्रायं निर्गलितोऽर्थः ज्ञाधातोः पाकगमनादि
लक्षणायां सत्यां समवायेन ज्ञाधात्वर्थविषयकान्वयबोधं प्रति ज्ञाधातुज्ञानजन्यार्थोपस्थितिः कारणमित्येव तन्निष्ठप्र
त्यासत्त्याकार्यकारणभावस्वीकारे ज्ञाधातुलक्षणाज्ञानजन्यपाकविषयकोपस्थितिदशायां ज्ञाधातुलक्ष्यार्थगमनविषयकशा
ब्दबोधापत्तिस्तत्कारणीभूतज्ञानजन्यार्थोपस्थितेः सत्त्वादिति समवायेन ज्ञाधात्वर्थपाकविषयकान्वयबोधं प्रति ज्ञाधातुज्ञा
नजन्यपाकविषयकोपस्थितिः समवायेन कारणमिति पूर्वोक्तरीत्या पाकगमनाद्यनेकार्थविशेषान्तर्भावेन तन्निष्ठप्रत्यासत्त्य
भनेककार्यकारणभावकल्पने गौरवं विषयनिष्ठप्रत्यासत्त्या कार्यकारणभावस्वीकारे तु लाघवं ज्ञाधातुज्ञानजन्योपस्थिति
विषयत्वेन पाकगमनज्ञानादिरूपज्ञानेऽनुधावनशक्यलक्ष्यार्थानामनुगमय्य ज्ञाधातुज्ञानजन्योपस्थितिविषयार्थनिष्ठ
प्रकारतानिरूपितविशेष्यतासंबंधेन कृतौ जायमानान्वयबोधं प्रति ज्ञाधातूत्तरत्वनिष्ठपदज्ञानजन्यकृत्याद्युपस्थितिर्वि
शेष्यतासंबंधेन कारणमित्येवंविधकार्यकारणभावस्यैव संभवात् तथा च जानाति चैत्र इत्यत्राश्रयतासंबंधेन चैत्रे नान्व
यबोधः चैत्रे ज्ञाधातूत्तरत्वनिष्ठपदज्ञानजन्यकृत्याद्युपपत्तेरभावात् किंतु निरूपितत्वसंसर्गावच्छिन्नज्ञाधात्वर्थज्ञाननिष्ठप्रका
रतानिरूपितविशेष्यतासंबंधेनाख्यातार्थाश्रयतायामेवान्वयबोधः तत्रैव ज्ञाधातूत्तरत्वनिष्ठपदज्ञानजन्योपस्थितेर्विशेष्यता
संबंधेन सत्त्वादित्थं च जानाति चैत्र इत्यत्र निरूपितत्वसंसर्गावच्छिन्नज्ञाधात्वर्थज्ञाननिष्ठप्रकारतानिरूपितविशेष्यता

त्वाभिन्नस्वरूपसंसर्गावच्छिन्नाख्याताऽर्थाश्रयनिष्ठप्रकारतानिरूपितचैत्रनिष्ठमुख्यविशेष्यतालिज्ञाननिरूपिताश्रयत्वविशिष्टप्र
(कारतानिरूपित) वांश्चैत्र इत्यनेनान्वयबोध इत्याख्यातस्य सार्थकत्वमक्षुण्णमेवेति इदानीं तादृशविषयनिष्ठप्रसाकारणाभा
वे व्यभिचारप्रदर्शनेनैव दोषान्तरं दूषयन् धात्वर्थप्रकारकचैत्रविशेष्यकान्वयबोधमुपपादयति तदप्यसदित्यादिना प्रस
यांतरार्थकविशेष्यकशाब्दबोधे घ्रा जानन्तु जानाति इत्यादौ नात्र त्वाध थर्थाश्रयज्ञाताधात्वर्थज्ञानप्रकारकान्वयबोधोनायत
तत्र तिप्त्वसादि आख्यातजन्योपस्थितेर्नतिप्त्वसाधारण्यात्प्रत्ययभिन्नत्वजादिप्रत्यया यार्थाश्रयविशेष्यकज्ञानप्रका
रकबोधे व्यभिचारस्तद्वारणाय तादृशोपस्थितिवैशिष्ट्यस्य ज्ञाधात्वंतरतिप्त्वसादितान्तजन्यकत्वोपस्थितिवैशिष्ट्य
स्य तादृशोपस्थितिजन्यतावच्छेदककोटौ तादृशतिप्त्वस्वज्ञानजन्यत्वस्योपस्थितिविशिष्टत्व) कार्यतावच्छेदककोटौ
टाववक्तव्यं निवेशनीयतया स्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वसंबंधेन ज्ञाधात्वंतरतिप्त्वसाधारण्यातजन्यकत्वोपस्थि
तिविशिष्टज्ञाधात्वर्थप्राप्त्यादिप्रकारकशाब्दबुद्धित्वावच्छिन्नं प्रति ज्ञाधात्वंतरतिप्त्वसाधारण्यातजन्यकत्वोपस्थितिः
कारणमिति कार्यकारणभावस्यावश्यं स्वीकरणीयतया तादृशाख्यातजन्यकत्वोपस्थितिसत्त्वेऽनंतरजायमानस्य जानातीत्या
नेत्यादिस्थलीयशाब्दबोधस्य तादृशसंबंधेन तादृशतिप्त्वसाधारण्यातजन्यकत्वोपस्थितिविरहेऽपि न व्यभिचार)
(इत्थं च तदुत्तरशाब्दबोधे) विशिष्टशाब्दबुद्धित्वरूपतादृशाख्यातजन्यकत्वोपस्थितिकार्यतावच्छेदकाक्रांत

तयात्राख्यातजन्यकत्वोपस्थितिविरहेऽपि न व्यभिचारः इत्थं च तदुत्तरशाब्दबोधे तादृशाख्यातजन्यकत्वोपस्थितेस्त
दुत्तरे जानाति चैत्र इति वाक्यजन्याश्रयत्वसंसर्गकज्ञाधात्वर्थज्ञानप्रकारकचैत्रविशेष्यकशाब्दबोधे तादृशकारणबाधस्यज्ञा
धात्वंतरतिवान्तिवादिरूपाख्यातजन्यकत्वोपस्थितिरूपकारणाभावस्याकिंचित्करत्वात् कारणतावच्छेदकावच्छिन्न
भावो हि कार्यतावच्छेदकावच्छिन्नाभावे नियामकः प्रकृते च ज्ञाधात्वंतराख्यातजन्यकत्वोपस्थित्युत्तरजा
यमाने ऽपरस्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वसंबंधेन ज्ञाधात्वंतरतिबाधाख्यातजन्यकत्वोपस्थितिविशि
ष्टशाब्दबुद्धित्वरूपतत्कार्यतावच्छेदकवत्तानात्राश्रयतासंसर्गकज्ञाधात्वर्थज्ञानप्रकारकचैत्रविशेष्यकशाब्दबोधं प्र
ति ज्ञाधात्वंतरतिबाधाख्यातजन्यकत्वोपस्थितेः कारणत्वाभावेन तादृशकत्वोपस्थित्यभावस्याश्रयतासंबंधेन ज्ञा
नवांश्चैत्र इति शाब्दबोधाभावानियामकत्वादित्यर्थः तथा च जानाति चैत्र इत्यत्राख्यातं निरर्थकमेवेति भावः ननु जानाति
चैत्र इति स्थलीयशाब्दबोधं प्रति तादृशकत्वोपस्थितेर्यदि न कारणं तदा ऽसत्त्वशाब्दबोध आपत्तिः स्यादित्याशंका या
माह तादृशानुपूर्वीति ज्ञाधात्वंतरश्चाविकरणकतिप्प्रचत्वादिरूपानुपूर्वीघटकेत्यर्थस्तथा चाश्रयतासंबंधेन ज्ञानवां
श्चैत्र इति बोधस्य नापत्तिरिति भावः एवमपि प्रकारतावादी नव्यमते गौरवमापादयति न च तन्मते इत्यादिना तन्मते
आश्रयत्वस्य संसर्गतावादिप्राचीनमते आश्रयतासंबंधेन ज्ञानप्रकारकचैत्रविशेष्यकशाब्दबोधे तादृशयोग्यताज्ञान
स्याश्रयत्वसंसर्गकज्ञानप्रकारकयोग्यताज्ञानस्य हेतुतांतरकल्पनाधिक्यकारणं तांतरकल्पनमधिकं इत्यर्थः ननु तन्मत
दाश्रयतासंबंधेन ज्ञानविशिष्टचैत्रस्य बोधो भवति तेन तात्पर्येण प्रयुक्तः सः सुंदर इति वाक्यघटकतन्मदाश्रयता

संबंधेन ज्ञानवांश्चैत्र इति बोधस्य सर्वमतसिद्धतया तादृशबोधं प्रति ज्ञानप्रकारकाश्रयत्वसंसर्गकयोग्यताज्ञानकारणत्वस्य
च सर्वमतसिद्धतया कथं संसर्गतावादिमते तादृशयोग्यताज्ञानकारणतायाः स्वनाधिक्यमतेभाव तात्पर्यकं सर्वनामत्वर
ति तदादिपदं आश्रयतासंबंधेन ज्ञानविशिष्टचैत्रबोधकं भवतीति तात्पर्यविषयात्सर्वनाम्नः सत्स्वेवं रूपात्तदादेः
संकेतितशब्दं न तद्ग्रहमदुच्चरितघटपदान्वयाश्रयतासंबंधेन सिद्धावपीत्यपि नाश्रयत्वसंसर्गकज्ञानप्रकारकयोग्य
ताज्ञानकारणत्वं समुच्चीयते तथा चाश्रयतासंबंधेन ज्ञानवांश्चैत्र इति बोधस्य तादृशबोधं प्रति ज्ञानप्रकारकाश्रयत्वसंस
र्गकयोग्यताज्ञानकारणत्वस्य च सर्वमतत्वमसिद्धावपीत्यर्थः परंतु तादृशशाब्दबोधे आश्रयतासंबंधेन ज्ञानविशिष्ट
एकश्चैत्र इति शाब्दबोधे पदार्थं तिरभानतेयसेन प्रथमेव वचनोपस्थापितैकत्वरूपसर्वनामसंकेतितत्वघटादिपदज
न्याश्रयतासंबंधेन ज्ञानवांश्चैत्र इति शाब्दबोधहेतुतायाः कारणतायाः आवश्यकत्वात् सर्वमतसिद्धत्वादित्यर्थः स
र्वनामसंकेतितघटादिपदजन्यज्ञानविशिष्टचैत्रोपस्थितिसहकृतैकत्वप्रकारकयोग्यताज्ञानसहकृतज्ञानप्रकारकाश्रय
त्वसंसर्गकयोग्यताज्ञानस्य कारणतायाः सर्वसंमतसिद्धत्वादिति यावत् ज्ञानप्रकारकाश्रयत्वसंसर्गकयोग्यताज्ञान
स्य सर्वनामसंकेतितघटादिपदे तदन्यत्र जन्यतादृशचैत्रोपस्थितिसहकृतस्यैकत्वादिप्रकारकयोग्यताज्ञानासहकृत
स्याश्रयतासंबंधेन ज्ञानवांश्चैत्र इति शाब्दबोधकारणतायाः कुत्राप्यकृप्तत्वात् कुत्रापि सर्वमतसिद्धताभावात् तादृश
शाब्दबोधं प्रति तादृशयोग्यताज्ञानस्य कारणत्वकल्पनं संसर्गतावादिमते ऽधिकमिति भावः आश्रयतायाः संसर्गता

वादी गौरवसाम्यं दर्शयति भवन्मतेपीति आश्रयताप्रकारकवादिनवीनमते ऽधिकमिति पि तथाविधयोग्यताज्ञानहेतुता
याः ज्ञानाश्रयत्वप्रकारकस्वरूपसंसर्गकयोग्यताज्ञानहेतुतायाः आधिक्यादित्यर्थः तथा च नवीनानंगीकृते आश्रयतासं
बंधेन ज्ञानवांश्चैत्र इति बोधे ज्ञानप्रकारकाश्रयत्वसंसर्गकयोग्यताज्ञानस्य कारणता यथा संसर्गतावादिप्राचीनमते ऽधिक
तथा प्राचीनानंगीकृते स्वरूपसंबंधेन ज्ञानाश्रयत्ववांश्चैत्र इति बोधे ज्ञानाश्रयत्वप्रकारकस्वरूपसंसर्गकयोग्यताज्ञान
स्य कारणता प्रकारतावादिनवीनस्याधिकेत्युभयमतसाम्येपि आश्रयत्वसंसर्गतामते परं लाघवमेवेत्याह आश्रय
तेति तदीयसंसर्गविषयताघटितप्रकारकज्ञानकारणतावच्छेदकापेक्षया आश्रयतासंसर्गकज्ञानीयकारणताव
च्छेदकस्य लघुशरीरत्वेति योजना तदीयः आश्रयत्वीयो ज्ञानाश्रयतानिरूपितो यः स्वरूपाख्यः संसर्गस्तन्निष्ठाया
संसर्गतायाविषयतायाः घटितं यत्प्रकारकं ज्ञानं स्वरूपसंबंधेन ज्ञाननिरूपिताश्रयत्ववांश्चैत्र इति शाब्दबोधरूपं त
न्निष्ठकार्यतानिरूपिता या ज्ञानाश्रयत्वप्रकारकस्वरूपसंसर्गकयोग्यताज्ञाननिष्ठकारणतावच्छेदकीभूतं यज्ज्ञानत्वं तन्नि
रूपिताश्रयत्वप्रकारकस्वरूपसंसर्गकयोग्यताज्ञानत्वं तदपेक्षया आश्रयतासंसर्गकत्वं यत् ज्ञानं आश्रयतासंबंधे
न ज्ञानवांश्चैत्र इति शाब्दबोधरूपं तदीयाया मतनिष्ठकार्यतानिरूपिता या ज्ञानप्रकारकाश्रयत्वसंसर्गकयोग्यताज्ञान
निष्ठाकारणतातदवच्छेदकस्य ज्ञानप्रकारकाश्रयत्वसंसर्गकयोग्यताज्ञानत्वस्य लघुशरीरत्वात् आश्रयत्वस्य
संसर्गतावादिप्राचीनमत एव लाघवमित्यर्थः तथापि ज्ञानाश्रयत्वप्रकारकशाब्दबोधं प्रति ज्ञानाश्रयत्वप्रकारकया

ग्यताज्ञानं कारणत्वस्योभयमतसिद्धत्वेन प्राचीनमते लाघवानवकाश इत्यभिप्रायेण तांदूत नच यत्रेति यत्रत्यादीना१
स्तत्र तत्र शक्तिभ्रमस्वारसिकलक्षणाग्रहस्थले तत्र ज्ञानाश्रयत्वप्रकारकस्वरूपसंसर्गकचैत्रविशेष्यकशाब्दबोध
तादृशयोग्यताज्ञानहेतुत्वं ज्ञानाश्रयत्वप्रकारकस्वरूपसंसर्गकचैत्रविशेष्यकशाब्दबोधे तादृशयोग्यताज्ञानहेतुत्वमि
त्यर्थः तथाच तल्लाघवमिति भावः आश्रयतायाः संसर्गतावादिप्राचीनः स्वप्रौढ्या समाधत्ते आश्रयतायामिति तत्रा
पि आख्यातस्य आश्रयत्वे शक्तिभ्रमलक्षणाग्रहस्थलेपि आश्रयताप्रकारकबोधस्य स्वरूपसंबंधेन ज्ञानाश्रयत्ववां
श्चैत्र इति बोधस्य संसर्गतावादिनानभ्युपगमात् किंत्वाश्रयतासंबंधेन ज्ञानवांश्चैत्र इत्याकारकज्ञानप्रकारकाश्रयत्वसं
सर्गकशाब्दबोधस्यैव स्वीकारात् चादित्यर्थः तत्रायमाशयः यथा कस्यचिन्मते ओदनं पचतीत्यत्र द्वितीयार्थोपि क
र्मत्वं संसर्ग एव तन्मते कर्मतासंबंधेनौदनविशिष्टकर्तृत्वविशिष्टः पाक इति बोधो गौरवात् यथा च राज्ञः पुरुष इत्यत्र षष्ठ्यर्थोपि स्व
त्वं संसर्ग इति तयोर्मते स्वत्वसंबंधेन राजविशिष्टः पुरुष इति शाब्दबोधेन नतु आश्रयतासंबंधेन राजस्वत्ववान् पुरुष इ
ति बोधो गौरवात् तथा जानातीत्यत्राख्यातार्थोप्याश्रयता संसर्ग एव पदोपस्थितस्यापि संसर्गत्वेन भाने बाधकाभावादि
ति अत एव मणिकारसम्मतिं दर्शयति एतदभिप्रायेणैवेति यथाश्रयत्वं संसर्गतयैव भासते तदाश्रयत्वे आख्यातस्य
लक्षणास्वीकारोपि व्यर्थ एवेत्यर्थः ननु यथाख्यातस्य निरर्थकत्वे आश्रयत्वं संसर्गत्वे च लाघवं तदा दीधितिकारक

तमाख्यातस्य सार्थकत्वकथनं तथाख्यातार्थाश्रयत्वप्रकारत्वकथनं चासंगतं स्यादित्याशंक्य दीधितिकारस्याशयमु
द्घाटयन् तन्मते लाघवं दर्शयति नचाश्रयत्व इत्यादिना कल्पनाविरहादित्यंतेन तत्र ज्ञाधातुसमभिव्याहृताख्यातेना
श्रयत्वं निरूपितनिरूढलक्षणामनादितात्पर्यविषयार्थनिष्ठलक्षणामभ्युपगच्छतां स्वीकरणमित्यर्थः यत्रजाना
तीत्यत्र तत्र ज्ञाधातोर्ज्ञानाश्रयत्वे शक्तिभ्रमकाले स्वारसिकलक्षणाग्रहकाले वा चैत्रो धनं चैत्रो विशेष्यो भवेधात्वर्थैकदेश
स्य ज्ञानादेः ज्ञाधातुलक्ष्यार्थज्ञानाश्रयत्वैकदेशस्य ज्ञानस्य अन्वयानुपपत्त्या एकत्र विशेषणत्वेनान्वितस्यान्यत्र वि
शेषणतयाऽन्वयासंभवात् मणिकृद्भिरपि तादृशस्थले स्वरूपसंबंधेन ज्ञानाश्रयत्ववांश्चैत्र इत्याकारक एव बोधः
स्वीकरणीय इत्यर्थः उपसंहरति तथा च तत्रेति तत्र ज्ञाधातोर्ज्ञानाश्रयत्वे शक्तिभ्रमस्वारसिकलक्षणाग्रहकाले
कजानातीति स्थलीयज्ञानाश्रयत्वप्रकारकशाब्दबोधे तत्प्रकारकस्य ज्ञानाश्रयत्वप्रकारकस्य योग्यताज्ञानस्य हेतु
तायाः कारणतायाः कृप्ततया उभयमतसिद्धतया नावच्छेदकाधिक्यं किंतु ज्ञानप्रकारकाश्रयत्वसंसर्गकबोधे तादृश
योग्यताज्ञानस्य ज्ञानप्रकारकाश्रयत्वसंसर्गकयोग्यताज्ञानस्य हेतुताकल्पनं मणिकृन्मतेऽधिकमेवेत्यर्थः नन्वेवम
पि घटादिरूपभिन्नविषयकप्रत्यक्षप्रतिबंधकीभूतशाब्दसामग्रीशरीरे आख्यातजन्याश्रयत्वोपस्थितिनिवेश
कृतं गौरवं दीधितिकृन्मतेप्यस्तीत्याशंक्य नच दीधितिकृन्मत इति तादृशेति ज्ञानप्रकारकाश्रयत्वसंसर्गकयोग्यता
ज्ञानहेतुताकल्पनलाघवेपि जानातीत्यादौ पर्वीरूपां कांक्षाज्ञानघटितायां च ज्ञाधातुशक्तिज्ञानजन्यज्ञानोपस्थिति

कु.टी.

घटितापत्यादिरूपभिन्नविषयकप्रत्यक्षादित्वं प्रति प्रतिबंधकीभूता ज्ञानाश्रयत्वप्रकारकयोग्यताज्ञानादिरूपा शाब्दसाम
ग्री तस्या आख्यातजन्याश्रयत्वोपस्थितिनिवेशात्र युक्तगौरवं दीधितिकृन्मते मणिकृन्मतेपि आख्यातस्य निरर्थकत्वमते
तत्र युक्तगौरवं नास्तीत्यर्थः समाधत्ते भवन्मते मणिकृन्मतेपि जानाति चैत्र इत्यानुपूर्वीज्ञानघटितशाब्दानुजन्यज्ञा
नोपस्थितिघटितज्ञानप्रकारकत्वाश्रयत्वसंसर्गकयोग्यताज्ञानरूपायाः आश्रयता संबंधेन ज्ञानवांश्चैत्र इति शाब्दसा
मग्र्याः ज्ञानाश्रयत्वाभाववांश्चैत्रः सुंदरः इत्यादिविशिष्टवैशिष्ट्यावगाहिप्रत्यक्षे प्रतिबंधकत्वं यदि क्येन गौरवा
दित्यर्थः तथाहि मणिकृन्मते हि जानाति चैत्र आश्रयता संबंधेन ज्ञानवांश्चैत्र इति शाब्दबोधस्तज्जनकीभूता च सा
मग्री जानातीत्यानुपूर्वीज्ञानघटितशाब्दानुजन्यज्ञानोपस्थितिघटिताश्रयत्वसंसर्गकज्ञानप्रकारकयोग्यताज्ञाना
दिरूपा सा चाश्रयता संबंधेन ज्ञानवांश्चैत्र इति बोधस्य ग्राह्याभावावगाहित्वेन प्रतिबंधकीभूतो य आश्रयता संबंधेन ज्ञानाभा
ववांश्चैत्र इति निश्चयात्मको बाधस्तदभावघटितैव वक्तव्या तथा च तादृशबाधाभावघटितशाब्दसामग्र्याः ग्राह्याभावाव
गाहितया ज्ञानाश्रयत्वाभाववांश्चैत्रः सुंदर इति विशिष्टवैशिष्ट्यावगाहिप्रत्यक्षे कारणीभूतं ज्ञानाश्रयत्वाभाववांश्चैत्र
इति विशेष्यतावच्छेदकप्रकारकनिर्णयप्रतिबंधकत्वासंभवेन तयोस्सामग्र्योर्युगपदवस्थानसंभवात् तथाविधशाब्द
सामग्र्याः तथाविधभिन्नविषयकप्रत्यक्षं प्रति प्रतिबंधकत्वं समधिकं कल्पनीयमिति गौरवमिति मन्मत इति दीधिति
कृन्मते तु जानाति चैत्र इति अत्र स्वरूपसंबंधेन ज्ञानाश्रयत्ववांश्चैत्र इति शाब्दबोधस्तज्जनकीभूता च सामग्री जानाती
ध

८४॥

त्यानुपूर्वीघटितशाब्दानुजन्यज्ञानोपस्थितिघटितास्या तज्जन्याश्रयत्वोपस्थितिघटितज्ञानाश्रयत्वप्रकारकयोग्यताज्ञा
नादिरूपा तस्याश्च सामग्र्याः स्वरूपसंबंधेन ज्ञानाश्रयत्वविशिष्टश्चैत्र इति शाब्दस्य प्रतिबंधकीभूताय: स्वरूपसंबं
धेन ज्ञानाश्रयत्वाभाववांश्चैत्र इति निश्चयात्मको बाधस्तदभावघटिततया तादृशविशिष्टवैशिष्ट्यावगाहिप्रत्यक्ष
जनकीभूतं ज्ञानाश्रयत्वाभाववांश्चैत्र इति विशेष्यतावच्छेदकप्रकारकनिर्णयं प्रति ग्राह्याभावावगाहित्वेन प्रतिबंधकत्व
यात तथाविधबाधाभावघटिततादृशशाब्दसामग्रीं प्रति च विशेष्यतावच्छेदकरूपनिर्णयरूपस्य ज्ञानाश्रयत्वाभाव
वांश्चैत्र इति निश्चयस्य च प्रतिबंधकत्वं तया तादृशज्ञानाश्रयत्वाभाववांश्चैत्र इति बाधात्मकनिश्चयाभावघटितशाब्दसा
मग्र्या समं तादृशविशिष्टवैशिष्ट्यावगाहिप्रत्यक्षजनकीभूतायाः ज्ञानाश्रयत्वाभाववांश्चैत्र इति विशेष्यतावच्छेदकनि
र्णयरूपसामग्र्याः युगपदवस्थानासंभवेन तादृशकारणाभावादेव तादृशप्रत्यक्षाभावस्योपपादयितुं शक्यतया
ज्ञानाश्रयत्वाभाववांश्चैत्रः सुंदर इति विशिष्टवैशिष्ट्यावगाहिप्रत्यक्षं प्रति जानाति शाब्दजनकसामग्र्याः प्रतिबंध
कत्वकल्पनाविरहात् लाघवमिति शेषं दर्शितदिशावसेयमिति यद्यपि प्राचीनमतेपि ज्ञानाभाववांश्चैत्रः सुंदर इति
विशिष्टवैशिष्ट्यावगाहिप्रत्यक्षे जानाति चैत्र इति स्थलीयाश्रयता संबंधेन ज्ञानवांश्चैत्र इति बोधसामग्र्याः ज्ञानप्र
कारकयोग्यताज्ञानादिरूपायाः तादृशप्रत्यक्षे विशेष्यतावच्छेदकप्रकारकनिर्णयविधया कारणीभूतो यो ज्ञानाभाववां
श्चैत्र इति निश्चयस्तस्य आश्रयता संबंधेन ज्ञानवांश्चैत्र इति शाब्दबोधे ग्राह्याभावावगाहितया बाधस्तदभावघटिता

ता:प्रतिबंधकत्वं न कल्प्यते ताद्दशबाधतदभावयोर्युगपदवस्थानासंभवेन ताद्दशबाधाभावघटितसामग्र्याः ताद्दशप्र
सक्तेप्रतिबंधकत्वासंभवादिति प्राचीनमतेलाघवं संभवति नवीनमतेतु आनाति चैत्र इति रुढ्यीय ज्ञानाश्रयत्ववांश्चै
त्र इति शाब्दबोधसामग्र्याः ज्ञानाश्रयत्वाभाववांश्चैत्र इति बाधाभावघटितायाः ज्ञानाभाववांश्चैत्र इति विशेष्यता
वच्छेदकत्व निर्णयरुपा या ताद्दशप्रत्यक्षसामग्र्या समं युगपदवस्थानसंभवेन ताद्दशप्रत्यक्षे ताद्दशशाब्दसामग्र्याः प्रति
बंधकत्वस्वीकारेण गौरवं तथापि ज्ञानाभाववदाश्रयत्वं प्रमेयमिति प्रत्यक्षे आश्रयत्वं ज्ञानाभाववदित्याकारकविशेष्य
तावच्छेदकप्रकारकनिर्णयो हेतुः स च निर्णयो ज्ञानाश्रयत्ववांश्चैत्र इति शाब्दस्य बाधस्तदभावघटितां च शाब्दसामग्रीं
बाधतदभावयोर्यौगपद्यासंभवात् शाब्दसामग्रीकाले प्रत्यक्षसामग्र्यभावादेव ज्ञानाभाववदाश्रयत्वं प्रमेयमिति प्रत्य
क्षानुत्पत्तौ नवीनमते ताद्दशशाब्दसामग्र्याः ताद्दशप्रत्यक्षं प्रति प्रतिबंधकत्वाकल्पने न लाघवं प्राचीनमतेतु आश्रयता
संबंधेन ज्ञानवांश्चैत्र इति शाब्दसामग्री आश्रयत्वं ज्ञानाभाववदिति निश्चयाभावघटिता न भवत्यपितु ज्ञानाभाववां
श्चैत्र इति निश्चयाभावघटितैवेति ताद्दशशाब्दसामग्री ताद्दशप्रत्यक्षसामग्र्योर्यौगपद्यसंभवात् ज्ञानाभाववदा
श्रयत्वं प्रमेयमिति प्रत्यक्षे आश्रयता संबंधेन ज्ञानवांश्चैत्र इति शाब्दसामग्र्याः आश्रयता संबंधेन ज्ञानाभाववांश्चै
त्र इति निश्चयाभावघटितायाः प्रतिबंधकत्वकल्पनेन गौरवमिति उभयमतसाम्यमपि ज्ञानाश्रयत्वाभाववांश्चैत्रः सुं
दर इत्यादि विशिष्टवैशिष्ट्यावगाहिप्रत्यक्षे आनाति चैत्र इत्याद्यानुपूर्वीज्ञानघटितशाब्दजन्यज्ञानोपस्थिति

घटितसामग्र्या आश्रयतासंबंधेन ज्ञानाभाववांश्चैत्र इति बाधाभावघटितायाः प्रतिबंधकत्वाधिक्येन गौरवं पूर्वो
क्तमधिकमेवेति भावः नञ्युक्ते अथेति एवं रीत्या आनातीत्यत्राख्यातार्थाश्रयत्वप्रकारकशाब्दबोधांगीकाररीत्या
न्वयश्चास्य समुचित इत्यनेन भूतले न घट इत्यादौ घटादिपदस्य घटप्रतियोगिकाद्यो लक्षणामुपेत्य स्वीक्रियते तत्र
तस्ले न घट इत्यत्र घटपदलक्ष्यार्थस्य घटप्रतियोगिकस्य नञर्थभावे अभेदेनान्वयमुपेत्य घटप्रतियोगिकाभाववद्भू
तलवत्तिरित्याकारको बोधः यथा तदुत्तरसुपिभक्तेः घटपदोत्तरप्रथमाविभक्तेः प्रतियोगितायां लक्षणामुपेत्य लक्षणा
याप्रथमाविभक्त्युपस्थापितप्रतियोगितायां घटपदार्थस्याधेयतासंबंधेनान्वयमभ्युपेत्य प्रथमार्थप्रतियो
गितायाः निरूपकत्वसंबंधेन नञर्थाभावे अन्वयं स्वीकृत्य घटनिष्ठप्रतियोगितानिरूपकाभाववद्भूतलवत्तिरि
ति प्रतियोगितप्रकारकत्वशाब्दबोधस्समुचित इत्यर्थः ननु घटपदलक्ष्यार्थस्य घटस्य प्रतियोगितासंबंधेन नञ
र्थाभावे अन्वयसंभवे नान्वयानुपपत्तिरूपलक्षणाबीजस्याभावेन लक्षणानुपपत्त्या घटादिपदस्य प्रतियोगितायां लक्ष
णामुपगम्य ताद्दशान्वयबोधोपगमो गौरवपराहत इत्यत आह तथासतीति घटादिपदस्य तदुत्तरविभक्तेर्वा घटप्रतियो
गिके प्रतियोगितायां वा लक्षणामुपगम्य प्रतियोगिताप्रकारकशाब्दबोधांगीकाररीत्या तथाविधसमभिव्याहारज्ञानघ
टितसामग्र्याः भूतले न घट इत्यादिसमभिव्याहारज्ञानाघटितशाब्दबोधसामग्र्या घटप्रतियोगिकत्वाभाववानभावः
प्रमेय इति प्रत्यक्षे प्रतिबंधकत्वाकल्पनेन लाघवं तत्र तथाहि विशिष्टवैशिष्ट्यरीत्या जायमानघटप्रतियोगिकत्वाभाववा

भानश्च प्रमेय इति प्रत्यक्षं प्रत्यभावो घटप्रतियोगिकत्वाभाववानिति विशेष्यतावच्छेदकप्रकारकनिर्णयः कारणं स एव च
भूतलेन घट इति वाक्यजन्ये घटप्रतियोगिकोऽभावो भूतलवृत्तिरिति शाब्दबोधे बाधस्तदभावघटितानां च घटप्रतियोगि
कत्वप्रकारकयोग्यताज्ञानादिरूपसामग्री तज्जनिका न तथा च बाधतदभावयोर्यौगपद्यासंभवेन नाहत्य शाब्दसामग्रीत्वाल्ले
प्रत्यक्षसामग्र्यभावादेव नाहत्य प्रत्यक्षानुत्पत्तिरिति न नाहत्य प्रत्यक्षे नाहत्य शाब्दसामग्र्याः प्रतिबंधकत्वं नवीनैः कृ
त्यनीयमिति लाघवादित्यर्थः प्राचीनमते तु भूतलेन घट इत्यत्र प्रतियोगितासंबंधेन घटवानभावो भूतलवृत्तिरिति शा
ब्दबोधस्तज्जनिका च सामग्री प्रतियोगितासंबंधेन घटाभाववानभाव इत्याकारकबाधघटितैव न तु घटप्रतियोगिकत्वाभाववा
नभाव इति बाधाभावघटिता तथा च नाहत्य शाब्दसामग्री नाहत्य प्रत्यक्षसामग्र्योर्मेलनसंभवान्नाहत्य प्रत्यक्षं प्रति नाहत्य शा
ब्दसामग्र्याः प्रतिबंधकत्वं कल्पनीयमिति गौरवमिति भावः ननु भूतलेन घट इत्यादौ घटादिपदस्य घटप्रतिप्रतियोगिकत्वादौ लक्ष
णायां बीजाभावः न च नामार्थयोरभेदेनैवान्वय इति व्युत्पत्तिविरोधेन घटपदार्थस्य प्रतियोगितात्मकभेदसंबंधेन नञर्थाभा
वेऽन्वयासंभवेनान्वयानुपपत्तिरेव लक्षणाकल्पकबीजमिति वाच्यं नाहत्यव्युत्पत्तौ नाम्नः निपातातिरिक्तेति विशेषणसत्त्वे
न निपातनञर्थाभावे घटपदार्थस्य प्रतियोगितासंबंधेनान्वयबोधकत्वसत्त्वेनान्वयानुपपत्तिरूपलक्षणाबीजाभावादित्य
त आह नियम इति भूतलेन घट इति वाक्यात् घटप्रतियोगिकाभावो भूतलवृत्तिरिति बोधो भवतीति तात्पर्यानुप
पत्तिरूपलक्षणाबीजस्य सत्त्वेन घटादिपदप्रतियोगिकत्वादौ लक्षणा। स्वीकृत्य घटप्रतियोगिकाभावो भूतलवृत्ति

रिति बोधो भवतीति तात्पर्यानुपपत्तिरूपलक्षणाबीजस्य सत्त्वेन घटादिपदस्य घटप्रतियोगिकत्वादौ लक्षणां स्वीकृत्य
घटप्रतियोगिकाभावो भूतलवृत्तिरिति बोधः स्वीकार्यः घटप्रतियोगिकत्वाभाववानभावः प्रमेय इति विशिष्टवैशिष्ट्याव
गाहिप्रत्यक्षं प्रति नाहत्य शाब्दसामग्र्याः प्रतिनाहत्य शाब्दसामग्र्याः प्रतिबंधकत्वाकल्पनप्रयुक्तलाघवात् निपा
तस्थलेऽपि नामार्थयोरभेदान्वय एव भवतीति नामार्थयोरिति नियमे निपातातिरिक्तत्वविशेषणवैयर्थ्यमित्य
र्थः यदि च प्रतियोगित्वेल्लक्षणया घटादिपदोत्तरसुब्विभक्त्यर्थस्तदा विभक्त्यर्थप्रतियोगित्वस्यैव नञर्थाभा
वेऽन्वयो न तु नामार्थस्येति निपातस्थले नामार्थयोः साक्षादन्वय एव नास्तीत्युक्तत्वेन निपातातिरिक्तत्व
विशेषणं निरर्थकमेवेति बोध्यं भूतलेन घट इत्यादौ यथा घटप्रतियोगिकाभावो भूतलवृत्तिरिति घटप्रतियोगि
काभावधर्मिकभूतलवृत्तित्वप्रकारकान्वयबोधोऽनुभवसिद्धस्तथा भूतलेन घट इति वाक्यात् भूतलवृत्तित्वाभ
ववान् घट इति बोधो भवतीति तात्पर्यादिवशात् भूतलवृत्तित्वाभावप्रकारकघटधर्मिकान्वयबोधोऽप्यनुभव
सिद्धस्तथा च भूतलवृत्तित्वाभावरूपनञर्थस्यानुयोगितात्मकभेदसंबंधेन घटरूपनामार्थेऽन्वयानुपपत्ति
र्नामार्थयोः संबंधेन घटपदार्थेऽन्वयबोधोपपन्नमेतन्निपातातिरिक्तविशेषणं नामार्थयोरिति
मूलतात्पर्यकं तथा च निपातातिरिक्तयोर्नामनीतदर्थयोरभेदातिरिक्तसंबंधेनान्वयबोधा

ऽत्यन्तः प्रकृते च निपातनञाद्यर्थेऽभावादौ नामार्थस्यान्वये निपातनञाद्यर्थस्य नामार्थे चान्व
यो निपातनञाद्यर्थस्य नामार्थे चान्वयो न विरुध्यत इति भावः सुनः शंकते न चेति उक्तस्थलेषु भू
तले न घटः न पचति चैत्रः चैत्रस्य न धनं घटो न पट इत्यादिषु नञोऽभाववत्त्वलक्षणामुपगम्य
अभाववत्त्वस्यानुयोगिनि नामार्थेऽभेदेनान्वयमुपगम्य भूतलवृत्तित्वाभाववान् घटः पाकानु
कूलकृत्यभाववांश्चैत्रः चैत्रस्वत्वाभाववद्धनं पटप्रतियोगिकाभाववान् घट इत्यभेदान्वय
बोध एव तेषु स्थलेषु उपेयते न तु भेदान्वयबोधोऽपि येनात्यन्तं निपातातिरिक्तविशेषणं
सफलं स्यादिति भावः समाधत्ते तथा सतीत्यादिना नञोऽभाववत्त्वलक्षणत्वे सति सर्वत्राघ
टो न पटोऽपटो घटो भूतले न पटः अघटं भूतलमित्यादिसमासस्थलेषु मुख्यार्थपरनञ इति अ
भावत्वावच्छिन्नपरनञो दुर्लभतापत्तेः तत्तदभावानां शक्यतावच्छेदकत्वे गौरवेणाखण्डोपाधिरूपा
भावत्वस्य शक्यतावच्छेदकत्वे लाघवादभावत्वावच्छिन्न एव एव नञो मुख्यार्थे यदि सर्वत्र न
ञोऽभाववत्त्वार्थकत्वमेव प्रयोगः तदा मुख्यार्थपरनञो दुर्लभतापत्तिः स्फुटैव किं चाभावरूपमुख्या
र्थे नञः प्रयोगादर्शनादभावे नञः शक्तेः प्रसिद्धत्वेन शक्यसंबंधरूपलक्षणाया अप्यसं

भावितत्वया नञोऽभाववत्त्वलक्षणाभेदान्वयबोधोपपादनस्यापि दुर्लभतापत्तिः स्फुटैवेति सर्व
त्र नञोऽभावपरत्वमभ्युपेयं तथा च नामार्थयोरिति व्युत्पत्तौ निपातातिरिक्तविशेषणमावश्यक
मेवेति भावः ननु घटो नेत्यनुयोगिसमभिव्याहृतनञ एवाभावपरत्वसंभवात् नञोऽभाववत्त्वल
क्षणाया अभेदान्वयबोधोपपत्तिः न च नञोऽनुयोगिविनिर्मोकेणाभावबोधकत्वाद्यात् अनुसन्धा
नाद् यथेत्यमेवेति वाच्यं भूतले न घट इति वाक्यं घटप्रतियोगिकाभावो भूतलवृत्तिरिति बोधपरमि
ति तात्पर्यदशायां नञोऽभावबोधकत्वस्य भूतले न घट इत्यत्र सर्वसिद्धत्वेन नञोऽभाववत्त्वल
क्ष्यसंबंधरूपलक्षणायास्संभावितत्वया नञोऽभाववत्त्वलक्षणयाऽभेदान्वयबोधोपपत्ति
रत आह अभावस्येति भूतले न घट इत्यत्र भूतलवृत्त्यभावप्रकारकस्वरूपात्मकभेदसंसर्गकघ
टविशेष्यकबोधस्याव्यापकस्याधिककार्यकारणभावकल्पनाविरहेणाभाववत्त्वलक्षणाकक्षयाभूतलवृत्तित्वा
भावप्रकारकाभेदसंसर्गकघटविशेष्यकान्वयबोधस्यौचित्यात् स्यादित्यर्थः ननु भूतलवृत्तित्वा
भावप्रकारकभेदसंसर्गकयोग्यताज्ञानस्य हेतुत्वकल्पनमाधिक्यमेवेत्यत आह अभावयत्यादि

भूतले घट इति वाक्यजन्यभूतलवृत्तित्वप्रकारकान्वयबोधे संसर्गतया घटविशेष्यत्वस्य अन्वयबोधे सं भूतले
न घट इति वाक्यजन्यस्य भूतलवृत्तित्वाभावप्रकारकाभेदसंसर्गक घटविशेष्यकान्वयबोधस्य वि
रोधितानुपपत्तेरित्यर्थः एतदेवोपपादयति लाघवादिति यद्धाभावाश्रयप्रकारकत्वमिति भूतले घट
स्त्वभूतलवृत्तिर्घट इति बोधात् भूतलवृत्तित्वं याद्धं तदभावो भूतलवृत्तित्वाभाव तत्प्रकारकनिश्चय
स्यैव भूतलवृत्तित्वप्रकारकनिश्चयं प्रतिविरोधित्वं लाघवात् ननु यद्धाभावाश्रयप्रकारकत्वमभेद
संबंधेन भूतलवृत्तित्वाभावाश्रयप्रकारकनिश्चयस्य विरोधित्वं न तु गौरवात् तथा च लो किं कस्
निवृत्तिजन्यदोषविशेषाजन्यतद्धर्मिकतत्प्रकारकज्ञानमात्रं तद्धर्मिकतदभावप्रकारकनिश्चयो वि
रोधीति नियमात् भूतलवृत्तित्वप्रकारक घटविशेष्यकनिश्चयं प्रति भूतले न घट इति वाक्यजन्य
बोधस्य विरोधित्वानुपपत्त्या भूतले न घट इत्यत्र भूतलवृत्तित्वाभावप्रकारक घटविशेष्यकनिश्चयं
प्रति भूतले न घट इति वाक्यजन्यबोधस्य विरोधित्वानुपपत्त्या भूतले न घट इत्यत्र भूतलवृत्तित्वा
भावप्रकारक घटविशेष्यकबोध एव सर्वैरङ्गीकर्तुमुचितो न तु भाववत्त्वलक्षणयाभेदसंसर्गक भूतल
वृत्तित्वाभावाश्रयप्रकारक घटविशेष्यकबोधोपीति न ञर्थप्रकारकभेदसंसर्गसंबंधयोग्यताज्ञानहे

तुत्वस्योभयमतसिद्धत्वेन घटमात्रियोगिकत्वाभाववान्भावसंदर इति विशिष्टवैशिष्ट्यावगाहिप्रम
संभवति तादृशशाब्दसामग्र्याः प्रतिबंधकत्वस्योभयमतसिद्धत्वेन न नार्थमात्रयोगित्वमुक्तमेतोनिष
नागरिक त्वविशेषणरकं नं निर्युक्तिकमेवेति भावः नीलघट इत्यादौ विशेषणविभक्तेरभेदार्थक
त्वेन यस्याभेदाभावमाह नीलघट इत्यादाविव्युत्पत्त्या उक्तयुक्तमिति यथाप्रकारत्वार्थकत्वेति नव्य
मते राजस्वत्वाभाववान् पुरुष इति संदर इति प्रत्यक्षं प्रति राजपुरुष इति शाब्दसामग्र्याः प्रतिबंधकत्वं
नवृत्त्यनेराजस्वत्वाभाववान्पुरुष इति विशेष्यतावच्छेदकप्रकारकनिर्णयस्तादृशप्रत्यक्षे कारणं स
एव निर्णयः नव्यमते सिद्धराजस्वत्ववान्पुरुष इति बाधबाधस्ता दृशबाधाभावः शाब्दबोधे कारणं त
था च बाधतदभावयोर्युगपदवस्थानासंभवात् सामग्र्योर्मेलनं संभवतीति न शाब्दसामग्री प्रत्यक्षप्र
ति बंधिका तथा नीलाभेदाभाववान्घटः प्रमेय इति प्रत्यक्षेपि नीलाभेदाभाववान्घट इति विशेष्यताव
च्छेदकप्रकारनिर्णयः कारणं स एव च नीलो घट इति वाक्यजन्ये नीलाभेदवान्घट इति शाब्दबोधे बाध
तस्याभावः शाब्दबोधे कारणमिति प्रत्यक्षशाब्दसामग्र्योर्बाधतदभावघटितयोर्यौगपद्यासंभवा
च्छाब्दसामग्र्याः प्रतिबंधकत्वमनुचितमित्यर्थः लाघवमिति विशेषणविभक्तेरभेदार्थकत्वमते पि ला

एवं संभवतीति योजना तथापि प्रतिबंधप्रतिबंधकभावस्थले उक्तरीत्या लाघवसंभवेपि तत्रापि प्र
तिबंधकत्वात्ताघवलभ्यविशेषणविभक्त्यर्थभेदार्थकत्वेपि नामार्थाभेदस्य संसर्गतावादिनामस्माकं
युक्तिबलादृष्टस्तु स नविशेषो नास्त्येवेति भावः इति । इति व्युत्पत्तिवादे नामार्थान्वयबोधविवरणं ।अथ
प्रत्ययार्थं निरूपयितुमाह प्रत्ययाश्चेति नाधिनादीनामादिना क्यच्काम्यच्सनादिपरिग्रहः तत्रै
षु सत्स्वविभक्तिषु मध्ये प्रकृत्यर्थविशेषणविधयान्वयिनी संख्यैव प्रथमार्थ इति योजना नीलो घ
टो नास्ति स्यादौ नीलाभिन्नैकघटप्रतियोगिकाभाव इति बोधात् नीलादिपदसमभिव्याहृतपटादिरूप
प्रकृत्यर्थविशेषणविधयान्वययोग्या संख्यैव प्रथमार्थ इत्यर्थः एवकारेण संख्यातिरिक्तार्थव्यव
च्छेदः अन्यथा तंडुलं पचतीत्यत्र यथा द्वितीयार्थ एकत्वं कर्मत्वं च तत्रैकत्वं च तत्रैव तद्विशिष्ट
तंडुलनिष्ठकर्मतानिरूपकबोध एकत्वं प्रकारस्तत्र तु विशेष्यं कर्मत्वं तु विशेष्यं तथा प्रथमाविभक्तेः सं
ख्यातिरिक्तार्थकत्वे स्वीकारे संख्यातिरिक्तार्थस्यैव नीलो घटो नास्तीति वाक्यजन्यबोधे विशेष्यत
या भानं स्यादिति भावः ननु यदि प्रथमाविभक्त्यर्थसंख्याया एकत्वादिरूपायाः प्रकृत्यर्थविशेष
णतयैवान्वयः स्वीक्रियते तदा घट इत्यत्र घटत्वविशिष्टमिति बोधा एकत्वस्य विशेष्यतया भानं

२९॥

न स्यात् यदि च घट इत्यत्रापि एको घट इत्येकत्वरूपप्रथमार्थप्रकारकप्रकृत्यर्थघटविशेष्यक एवान्वयबोधोभिमतो
भवेत्तदा प्रकृत्यर्थतावच्छेदकसमनियतैकत्वं प्रकृत्यर्थ एव स्यात् प्रथमा निरर्थिकैव स्यादिति वैय्याकरणमतप्रवेशाप
त्तिरित्याशंक्य प्रथमार्थस्य विशेष्यतयावभासकसामग्रीं दर्शयन् विवेचयति अत एवेति प्रथमांतार्थस्येति प्रथमां
तार्थघटादिनिष्ठविशेष्यता प्रथमांतार्थघटादिनिरूपितविशेष्यतेन तदन्यतरप्रयोजकत्वं समानविभक्तिकनीलादि
पदसमभिव्याहाररूपनिपातपदाख्यातपदसमभिव्याहाररूपाकांक्षाज्ञानघटितसामग्र्यभावात् असौ प्रथमा
मार्थः मुख्यविशेष्यतयैवभासत इत्यर्थः तथार्थं च प्रकृत्यर्थघटादौ विशेषणतया प्रथमार्थसंख्यान्वयबोधे समा
नविभक्तिकनीलादिपदनिपातपदाख्यातपदे तदन्यतमसमभिव्याहाररूपाकांक्षाज्ञानं कारणं प्रकृत्यर्थप्रकार
कप्रथमार्थसंख्याविशेष्यकान्वयबोधे समानविभक्तिकनीलादिपदनिपातादिपदासमभिव्याहृतकेवलघटपद
जन्योपस्थितिसहकृतप्रथमाविभक्तिजन्यसंख्योपस्थितिरूपसामग्री कारणमिति विवेकः संख्यायाः प्रकृत्यर्थे
तु प्रकृत्यर्थतावच्छेदकवत् (circled) घटत्वादिवदेकत्वरूपसंख्यापि सर्वत्र विशेषणतयैवभासते नतु विशेष्यतयापीत
थाच नीलादिपदसमभिव्याहृतत्वाद्घट इत्यत्रापि घटत्वस्यैकत्ववन्नीलबोधा न स्यादितिभावः नन्वस्तु संख्या
एकत्वादिरूपा प्रथमाविभक्त्यर्थस्तथापि तस्याः केन रूपेण शक्यतावच्छेदकत्वमित्यपेक्षायामाह शक्यता च सुप्त्वौजस्त्वादि
नेति ननु सुब्विभक्तिस्थले सुप्त्वौजस्त्वादिना तिङ्विभक्तिस्थले तिप्त्वझित्वादिना शक्तता स्वीकारे गौरवाल्लाघ
वेन सुप्तिङादिसाधारणैकवचनत्वादिनैव शक्तता किमिति न स्वीक्रियते इत्यत आह नतु सुप्तिङादीति तत्रैक तु

माह एकवचनत्वादेरिति नन्वेकत्ववाचकत्वादिना एकवचनत्वस्य सुवचत्वया दुर्वचत्वानुपपत्तिरित्याशंक्यैकवचनत्व
स्य दुर्वचत्वमुपपादयति नचैकत्वादिवाचकत्वं तदिस्यारभ्य शक्यतावच्छेदकत्वप्रसंगइत्यंतेन यथैकत्ववाचकत्वमेकत्वश क्त
क्यतारूपं तदात्माश्रयात् शक्यताज्ञाने शक्यतावच्छेदकज्ञानं कारणं शक्यतावच्छेदकं चैकवचनत्वं तच्चैकत्वशक्यतारूप
मेवेति एकत्वशक्यताज्ञाने एकत्वशक्यताज्ञानापेक्षेत्यात्माश्रयप्रसंगादित्यर्थः नन्वेकवचनत्वं नैकत्ववाचकत्वं येनात्माश्र
यः स्यादपि त्वेकत्वबोधकत्वमित्याशंक्याह बोधकता रूपत्वे इति यच्चैकवचनत्वमेकत्वबोधकत्वं तदात्माश्रयदोषाभा
वेपि घटावित्यादावेकत्वे द्विवचनस्य शक्तिभ्रमवत्त्वे लक्षणायत्वत्त्वे वा द्विवचनादीनामप्येकत्वबोधकतया एक
त्वे बोधकतायाः द्विवचनेपि सत्त्वेन तत्रैकत्वशक्यताया अभावेनैकत्वबोधकत्वस्यातिप्रसक्ततयाऽतिप्रसंगाद्धि धर्मि
णोवच्छेदकत्व इत्यभियुक्तोक्तेः एकत्वबोधकत्वमेकत्वशक्यतावच्छेदकं न संभवतीति भावः नन्वेकवचनत्वं जातिवि
शेषस्तदेवैकत्वशक्यतावच्छेदकमिति नात्माश्रयो नाप्यतिप्रसंगः सकलदोषइत्याशंक्याह नचैकवचनत्वादिक
मिति शंकते प्रसंगइति सुरभिपदघटकत्वसुत्वं वर्तते तत्रैकवचनत्वं नास्ति एकवचनत्वं च घटमित्यत्र घटपदोत्तर
द्वितीयैकवचने वर्तते तत्र सुत्वं नास्ति सुत्वमेकवचनत्वं चेत्युभयं रामइत्यत्र रामपदोत्तरसुन्येकवचने
वर्तत इति सांकर्यादित्यर्थः यस्मिन्पदोच्चरिते सति नियमेन यस्यार्थस्योपस्थितिर्भवति तत्र तस्य पदस्य शक्तिरिति
नियमेनोच्चरितैकवचनपदप्रयोज्योपस्थितिविषयस्यैकत्वस्य प्रमूत्यादिष्वेकवचनपदशक्यत्वं तया शक्तिसंबं

धेन एकवचनपदवत्त्वमेकवचनत्वं तदेवैकत्वशक्यतावच्छेदकमिति चेन्नेत्येवं दोष इत्याशयवानाशंक्य न च शक्तिसंबंध
नेति नदशानदशायां स्वमृत्यादिकं शक्तिसंबंधेनैकवचनपदवदिति भ्रमात्मकज्ञानाभावदशायां शक्तिभ्रमादेव सुपद
मेकत्वशक्तमिति भ्रमात्मकशक्तिज्ञानादेव शाब्दबोधोपपत्तिरित्यर्थः एकवचनादिशब्दस्येति पदद्वयात्मकसमु
दायरूपस्यैकत्वत्वावच्छिन्नवाचकपदविषयकशाब्दबोधजनकस्यैकवचनादिशब्दस्य वाच्यस्य तेन शक्तेरवाप्रसि
द्धेरिति शक्तिसंबंधेनैकवचनपदवत्त्वमेकवचनत्वमिति न संभवतीति तु नाशंक्यमित्यर्थः कुतो नाशंक्य
मित्याकांक्षायामाह एकवचनमित्यादीति एकवचनमेकवचनमिति व्युत्पत्त्या एकवचनादिशब्दस्यैकत्वत्वावच्छिन्नवाच
कत्वं मृत्यादिविषयकबोधजनकत्वेस्वीकृते एकादिशब्देप्येकवचनशब्दप्रयोगापत्तेः एकत्वत्वावच्छिन्नवाचकत्वा
दिविषयबोधजनकत्ववदेकत्वत्वावच्छिन्नवाचकैकशब्दविषयशाब्दबोधजनकत्वस्याप्येकवचनशब्दे सत्त्वादित्येक
वचनशब्दोच्चारणे कृते सति स्वादीनामेवोपस्थितेः एवं शब्दानुपस्थितिर्यस्मिन्शब्दे उच्चरिते सति नियमे
न यस्यार्थस्योपस्थितिर्भवति तत्र तच्छब्दस्य रूढिशक्तिरिति नियमेन पंकजशब्दस्य पद्मएवैकवचनशब्दस्य
स्वादौ रूढिः स्वीकारस्यावश्यकत्वात् तथाच शक्तिसंबंधेनैकवचनपदवत्त्वरूपैकवचनत्वं सुवचमेवेति भावः
समाधत्ते येथकारीयसंबंधेनेति एकवचनपदात्स्वादिबोधयत्वितीच्छाविशेषरूपः पाणिन्यादिमुनीनां संके

तएकवचनपदेऽस्तिन चेश्वरेच्छारूपा शक्तिः शक्तौ प्रमाणाभावात् ननु शक्तिग्रहे व्याकरणशास्त्रमेवैकवचनप
देईश्वरेच्छारूपशक्तिसत्वे प्रमाणमित्यत आह तस्येकवचनद्विवचने स्वादिगिति तदीयसंकेतग्रहपरतया एकव
चनपदेन स्वमूरादिकं बोध्यं द्विवचनपदेन औभ्यामादिकं बोध्यमिति पाणिनीयसंकेतग्रहपरतयाप्युपपत्ते
न चेश्वरेच्छारूपशक्तिग्रहपरतया मानाभावादित्यर्थः तत्रोपष्टंभकमाह नहि यू स्त्र्याख्यौ नदीति स्त्र्याख्ये
स्त्रीवाचके यूकारांतेकारांतशब्देन घादिशब्दस्य यू स्त्र्याख्यौ नदीति सूत्राच्छक्तिर्न हि सिध्यत्यपि तु तादृशशब्दे
न घादिशब्दस्य (शक्त्यभावादेव) पाणिनीयसंकेत एवेत्यर्थः अत्र संमतिमाह अत एवेति ईकारांतोकारां
तशब्देन घादिशब्दस्य शक्त्यभावादेवेत्यर्थः ध्वनिकसंकेतशालित्वात् घिघुभ्यादिसंज्ञा इव नघादिसंज्ञा अपि
पारिभाषिक्याः पाणिन्यादीच्छाकृतः सांकेतिक्य न चोपाधिकृता इति जात्युपाधी नैमित्तिकसंज्ञे ते इति
सूत्रात् जात्यवच्छिन्नवाचकत्वमुपाध्यवच्छिन्नवाचकत्वं नैमित्तिकसंज्ञात्वमित्यर्थकात् इति घिघुभ्यादिन
घादिसंज्ञासु जात्युपाध्यवच्छिन्नवाचकत्वरूपनैमित्तिकसंज्ञात्वाभावात् नैमित्तिकसंज्ञात्वरूपसोपाधिकत्वं
नास्तीति भावः तथा च घिघुनघादिसंज्ञाबोध्येषु जात्युपाध्योरभावात् घिघुनघादिसंज्ञास्वीश्वरेच्छारूपशक्ति
सत्वे मानाभावात् घिघुनघादिसंज्ञा न चोपाधिक्य इत्यर्थः शंकते अथैवमपीति एकवचनपदशक्तेरभावेऽपि

कत्वेऽपि तादृशपदवत्त्वमेवेति पाणिनीयसंकेतसंबंधेनैकवचनपदवत्त्वमेवैकत्वशक्ततावच्छेदकमस्त्वित्यर्थः
समाधत्ते तादृशसंकेतस्येति पाणिनीयसंकेतस्य संकेतत्वेन संबंधतया पाणिनीयसंकेतत्वेन वेत्ति विक
ल्प्याद्ये दोषमाह अतिप्रसक्तिर्दुर्वारैवेति एकवचनपदोऽजसादिर्बोध्य इति पुरुषांतरकृतसंकेतसंबंधेनै
कवचनपदवत्त्वरूपैकवचनत्वरूपैकवचनस्य जसादावपि सत्त्वेन तत्रैकत्वेन तत्रैकत्वशक्ततायाः अभावाद
तिप्रसक्तत्वेनातिप्रसक्तो हि धर्मो नावच्छेदक इति नियमादेकवचनत्वमेकत्वशक्ततावच्छेदकं न संभवतीत्य
र्थः द्वितीयविकल्पमुत्थाप्य दूषयति पाणिनीयसंकेतत्वेनेत्यादिना तथेति पाणिनीयसंकेतत्वेन संकेत एकव
चनपदस्य स्वादौ संबंध इत्यर्थस्तथा च पाणिनीयसंकेतत्वेनेत्यादिना तथेति पाणिनीयसंकेतत्वेन संकेत एव
एकवचनपदस्य स्वादौ संबंध इत्यर्थस्तथा च पाणिनिसंकेतसंबंधेनैकवचनपदवत्त्वमेवैकत्वशक्ततावच्छे
दकमिति चेन्नेति व्याकरणप्रणेतृपाणिनिभिन्नपुरुषकर्तृकसंकेतस्यापि पाणिनीयसंकेततुल्यस्य संभवे
न पाणिनीयसंकेतसंबंधेनैकवचनपदवत्त्वस्य तद्व्याकरणप्रणेतृपुरुषांतरीयसंकेतसंबंधेनैकवचनपदव
त्त्वस्यैकत्वशक्ततावच्छेदकत्वमित्यत्र विनिगमनाविरहेण गौरवात् एवं संकेतभेदेन गौरवं प्रदर्श्य शक्त
तावच्छेदकभेदेनापि गौरवं प्रदर्शयति डित्थादिपदादिति पाणिनीयसंकेतसंबंधेनैकवचनपदवत्त्वस्यातडि
त्थादिपदात्स्वादिर्बोध्य इति पुरुषविशेषीयसंकेतसंबंधेन डित्थादिपदवत्त्वस्यैवैकत्वशक्ततावच्छेदक

त्वमित्त्रयोर्विनिगमनाविरहेण गौरवं तथा च पदानां मत्वशक्ततावच्छेदकत्वप्रसंगश्च स्यादित्यत आनुपूर्वीवि
शेषरूपाणां सुऔजसत्वादीनामेवैकत्वबहुत्वादिशक्ततावच्छेदकत्वमुपगंतव्यमित्यर्थः यदि त्वादिविभक्तीनामेकत्वा
दिसंख्यावाचकत्वं स्यात्तदैकवचनत्वादिना शक्ततावच्छेदकं स्यात्त्वादित्वमिति विकल्पपर्यवसानं एकत्वादिशक्ततावच्छेद
कनिर्णयोपि शोभामावहेत्तदेव न संभवति प्रकृतीनामेवैकत्वादिसंख्यावाचकत्वसंभवादिति वैयाकरणमतं द
र्शयति यत्त्विमदिना इति वैयाकरणमतमिदं तेन घटादिरूपार्थवत्संख्यापि प्रकृतेरर्थस्तु नत्वेकवचनादिकं व्यर्थः
स्यादित्यत आह एकवचनादिकं त्विति एकत्वाद्यर्थे तात्पर्यग्राहकमेकवचनादिकमिति न वैयर्थ्यमित्यर्थः नैयायिकः शं
कते नचैवमिति एवं संख्याया अपि प्रकृत्यर्थत्वे एकपदोपस्थाप्ययोः घटादिरूपप्रातिपदिकजन्योपस्थितिविषय
योः अर्थयोः घटैकत्वयोः परस्परान्वये एकत्वाश्रयो घट इत्याधाराधेयभावेनान्वये आकांक्षाघटितसामग्र्यभावात्
एको घटः सत्ताश्रयः इति शाब्दबोधानुपपत्तिरित्यर्थः अन्यथेति एकपदोपस्थाप्ययोरप्यर्थयोरन्वयबोधप्रयोज
काकांक्षाविरहेपि परस्परान्वयोपगमे हर्यादिपदादिति हरिपदजन्योपस्थितिविषययोरश्वसूर्ययोरश्वारूढः सूर्य
इत्याधाराधेयभावेनान्वयबोधापत्तेरित्यर्थः ननु घटादिरूपप्रकृते घटे संख्यायां च पृथक्शक्तिर्न स्वीक्रियते येन प
रस्परान्वयप्रयोजकाकांक्षाविरहात्परस्परान्वयबोधो न स्यादपि तु एकत्वादिरूपसंख्याविशिष्टघटादौ घटपदादिरूप
प्रकृतेः शक्तिः स्वीक्रियते तथा च यादृशविशेष्यविशेषणभावापन्नयोः शक्तिज्ञानजन्योपस्थितिविषयता तादृ

१२॥

शविशेष्यविशेषणभावापन्नयोः शाब्दबोधे भानमिति नियमान्नैको घटः सत्ताश्रय इति शाब्दबोधानुपपत्तिरित्य
त आह घटादिपदस्येति एकत्वादिविशिष्टघटादौ घटादिपदस्य शक्तिसंभवो न घटरूपं पदार्थमुपसंक्रम्यैकत्वविशिष्टघ
टसंबंधिरूपकर्मकदर्शनाश्रयत्वमिति बाधाभावो घटरूपकर्मकदर्शनाश्रयत्वमिति संख्यानवच्छिन्नघटादेरेव
शाब्दबोधादित्यर्थः वैयाकरणः समाधत्ते आकांक्षावैचित्र्यादिति हरिरित्यत्राश्वारूढः सूर्य इत्यनुभवभा
वेन हरिपदघटितसमभिव्याहाररूपाकांक्षायाः एकपदार्थयोरश्वसूर्ययोः परस्परान्वयबोधप्रयोजकत्वाकल्प
नेपि घटोस्तीत्यत्रैको घटः सत्ताश्रय इति अनुभवात् घटादिपदघटितसमभिव्याहाररूपाकांक्षायाः घटपदोपस्था
पितयोर्घटैकत्वयोः परस्परान्वयबोधप्रयोजकत्वं कल्प्यत इत्येकप्रकृतिजन्योपस्थितिविषययोरपि घटैकत्वयोः
परस्परान्वयसंभवादित्यर्थः अत्र संमतिमाह अत एवेति एकपदोपस्थाप्ययोरप्यर्थयोः परस्परान्वयबो
धप्रयोजकाकांक्षासत्त्वादेव पार्थ एव धनुर्धर इत्यादौ खंडशक्त्या पार्थपदजन्योपस्थितिविषययोरन्ययोगव्यवच्छे
दयोः परस्परसमन्वयबोधस्तथाहि आश्रयो भेदः प्रतियोगितावच्छेदकत्वं च खंडशक्त्या एवकारार्थस्तत्र पार्थस्य
स्वनिष्ठप्रतियोगितावच्छेदकत्वसंबंधेन भेदे भेदस्य निरूपितत्वसंबंधेन आश्रयत्वे आश्रयत्वावच्छिन्नस्याधेयता
संबंधेन भेदस्य निरूपितत्वसंबंधेन प्रतियोगितावच्छेदकत्वे एकदेशे प्रतियोगित्वे प्रतियोगितावच्छेदकत्वस्याश्र
यतासंबंधेन धनुर्धरपदार्थैकदेशे धनुर्धरपदार्थस्याभेदसंबंधेन पार्थपदार्थे तथा च पार्थप्रतियोगिकभे

शाश्रयनिष्ठभेदप्रतियोगितावच्छेदकधधनुर्धरत्वावच्छिन्नाभिन्नः पार्थ इति शाब्दबोधः इत्यर्थः । यदि विभक्त्यर्थसं-
ख्यायाः प्रकृत्यर्थत्वं चेत्तदा कर्मत्वादीनामपि प्रकृत्यर्थत्वमेवास्तु कर्मत्वादौ द्वितीयाविभक्तेः शक्तिकल्पने स्यानिरर्थक-
त्वादित्यभिप्रायेण तार्किकः शंकते नचैवमिति एवं विभक्त्यर्थसंख्याया अपि प्रकृत्यर्थत्वांगीकारे वैयाकरणः समा-
धत्ते नामार्थधात्वर्थयोरिति नेन समं नामार्थेन समं नामार्थधात्वर्थयोः साक्षाद्भेदेनान्वयबोधो ऽव्युत्पन्न इति व्युत्पत्ति-
निर्वाहके नामार्थनिष्ठभेदसंसर्गावच्छिन्नप्रकारतानिरूपितविशेष्यतासंबंधेनान्वयबोधे विशेष्यतासंबंधेन
विभक्तिजन्योपस्थितिः कारणमिति कार्यकारणभावे धात्वर्थविशेष्यतासंबंधे न विभक्तिजन्योपस्थित्यभावेन व्य-
भिचारात् प्रकृतीभूतनामार्थकर्मत्वादीनां धात्वर्थे भेदेन साक्षादन्वयासंभवेन कर्मत्वादीनां द्वितीयादिविभक्त्यर्थत्व-
मावश्यकमिति भावः पुनः शंकते नच संख्याया इति द्विवचनस्यैव शक्तिभ्रमवत्त्वे लक्षणाग्रहवत्त्वे वा द्विवचना-
र्थं नपदाद्देकत्वबोधे इष्टापत्तेराह विनैव शक्तिभ्रमं लक्षणाग्रहं चेति तथा च द्विवचनान्तघटज्ञानस्यैकत्वबोधे
प्रतिबंधकत्वकल्पने गौरवेण द्विवचनबहुवचनान्तस्थलेऽप्येकत्ववाचकप्रकृतेः सत्त्वेनैकत्वबोधसंभवात् एकत्वबोधत-
त्पर्येणैकवचनान्तपदप्रयोगवद्द्विवचनान्तस्यापि पदस्य स्वारसिकप्रयोगापत्तिरिति न संख्यायाः प्रकृत्यर्थत्वमित्यर्थः
अत्र वैयाकरणः समाधत्ते अनादितात्पर्यवेति सकलजनाधसाधारणः स्वारसिकप्रयोगस्तस्मिन्ननादितात्पर्यस्य प्रयोगः
व प्रयोजकत्वात् नियामकत्वात् तथा च द्विवचनान्तपदस्यैकत्वादावनादितात्पर्यविरहेणैकवचनान्तपदस्यैव तत्रानादि-

तात्पर्यस्यैव स्वारसिकप्रयोगमूलत्वे स्वारसिकप्रयोगमूलीभूतशक्तिग्रहप्रयोजकः सत्त्वेनैकत्ववाचकप्रकृतेस-
त्त्वेऽपि द्विवचनान्तपदादेकत्वबोधासंभवेनैकत्वबोधतात्पर्येण द्विवचनान्तपदस्य स्वारसिकप्रयोगरूपातिप्रसंगविरह-
दित्यर्थः नच तदितात्पर्यस्यैव स्वारसिकप्रयोगमूलत्वे स्वारसिकप्रयोगमूलीभूतशक्तिग्रहप्रयोजकव्याकरणस्य
सार्थकत्वानुपपत्तिरत आह ह्येकयोर्द्विवचनैकवचने इति ह्येकयोरिति भावप्रधाननिर्देशः कृचकत्वं सप्तम्यर्थस्त-
था च द्वित्वेकत्ववाचके द्विवचनबहुवचने भवत इत्येवंरीत्या स्वारसिकप्रयोगमूलशक्तिग्राहकत्वेन व्याकरणस्य प्रा-
माण्यं येनानादितात्पर्यस्य प्रयोगमूलत्वे तत्प्रामाण्यानुपपत्त्या सार्थकत्वं न भवेत् किंतु द्वित्वयोः प्रकृतितात्पर्ये सति
द्विवचनैकवचने भवत इत्येवंरीत्या एकत्वे एकवचनान्तप्रकृतेर्द्वित्वे द्विवचनान्तप्रकृतेरनादितात्पर्यग्राहकत्वेनैव
ह्येकयोरित्यादिव्याकरणस्य प्रामाण्यमिति न तस्य सार्थकत्वानुपपत्तिरित्यर्थः इदानीं वैयाकरणमतं दूषय-
ति तदसदित्यादिना अनंतानामशक्तिनाना घटपटादिरूपप्रकृत्यानुपूर्वीणां शक्यतावच्छेदकत्वं स्वीक्रियते येन गौ-
रवं स्यात् किंतु प्रातिपदिकत्वस्यैव तच्छक्यतां नेप्रयुक्तगौरवावकाश इत्यभिप्रायवान्वैयाकरणः शंकते नच प्राति-
पदिकत्वादिकमिति तत्र तार्किकः समाधत्ते प्रातिपदिकत्वस्य दुर्वचत्वादिति तथाहि अर्थवदधातुरप्रत्ययः प्राति-
पदिकमिति सूत्रानुरोधात् धातुप्रत्ययप्रत्ययान्तभिन्नत्वे सत्यर्थवत्त्वं प्रातिपदिकत्वं वाच्यं तदा धात्वादिप्रत्ये-
कं भिन्नत्वे सत्यर्थवत्त्वरूपं प्रातिपदिकत्वं विवक्षितं चेत्तदा धात्वादौ परस्परमतिव्याप्तिः यदि च धातुभिन्नत्वे

व्यु.टी.

सति प्रत्ययविभिन्नत्वे सति प्रत्ययांतभिन्नत्वे सति अर्थवत्वरूपं तद्धि विवक्षितं तदा धातुप्रत्ययप्रत्ययांतसमुदा
येऽतिव्याप्तिः धातुप्रत्ययप्रत्ययांतसमुदायेऽतिव्याप्तिः धातुप्रत्ययप्रत्ययांतसमुदायस्य तादृशभेदवत्वे सत्यर्थ
वत्वात् यदि चैकाश्रयकतादृशभेदवत्वे सत्यर्थवत्वं तद्धि विवक्षितं धात्वादिसमुदायवृत्तितादृशभेदसमुदायस्यैका
श्रयकत्वाभावेन न तादृशसमुदायेऽतिव्याप्तिः तदा धात्वादिसमुदायेष्वेकत्वसत्वेन तादृशसमुदायवृत्तितादृशभे
दसमुदायस्यैकाश्रयकत्वाबाधेन धात्वादिसमुदायेऽतिव्याप्तिर्दुर्वारैव यदि चद्वित्वासमानाधिकरणतादृशभेदसमु
दायवत्वे सत्यर्थवत्वं तद्धि विवक्षितं तदा धात्वादिसमुदायस्य शब्दात्मकत्वेन गुणत्वानुगुणे गुणानंगीकारेण तत्र संख्या
रूपद्वित्वासंभवेन द्वित्वासमानाधिकरणतादृशभेदसमुदायवत्वे सत्यर्थवत्वस्य सत्वेन धात्वादिसमुदाये पुन
रपि दुर्वारैवातिव्याप्तिः यदि च संख्यारूपद्वित्वस्य गुणात्मकत्वाच्छब्देऽसंभवेपि अपेक्षाबुद्धिविशेषविषयत्वरूपद्वि
त्वस्य तत्र सत्वेन द्वित्वासमानाधिकरणतादृशभेदसमुदायवत्वे सत्यर्थवत्वस्याप्यभावेनातिव्याप्तिरित्युच्यते त
दा घटादिशब्देपि घटपटादिशब्दगततादृशद्वित्वस्य सत्वेन द्वित्वासमानाधिकरणतादृशभेदसमुदायवत्वे सत्य
र्थवत्वासंभवेनासंभव एव स्यादिति किंच प्रातिपदिकत्वज्ञानं अर्थवद्धातुरिति लक्षणवाक्यार्थज्ञानाधीनं त
दा लक्षणवाक्यार्थज्ञानं हि प्रातिपदिकपदजन्योपस्थितिद्वारा प्रातिपदिकत्वज्ञानाधीनमित्यन्योन्याश्रयेण दु

९४

र्वचत्वमित्यादिकं ननु धात्वादिसमुदायवत्वे सत्यर्थवत्वमेव प्रातिपदिकत्वमस्तु धातुप्रत्ययप्रत्ययांतसमुदायनिष्ठश
क्तिनिरूपकपदार्थस्याप्रसिद्धतया तादृशसमुदायस्य तादृशभेदसमुदायवत्वेप्यर्थवत्वाभावेनातिव्याप्तिविरहादित्य
त आह तद्ज्ञाने चेति यदि प्रातिपदिकत्वमेकत्वशक्ततावच्छेदकं तदा प्रातिपदिकत्वज्ञानशून्यस्य पुंसः शक्ततावच्छे
दकज्ञानाभावेन शक्ततावच्छेदकज्ञानाधीनशक्तिग्रहाभावात्तदधीनपदार्थोपस्थितेरसंभवेनानुभवसिद्ध एकत्वादिवि
षयकः शाब्दबोधो न स्यादिति प्रातिपदिकत्वं नैकत्वादिशक्ततावच्छेदकमित्यर्थः नन्वेवं प्रातिपदिकत्वस्य शक्तता
वच्छेदकत्वासंभवेपि पदत्वं वर्णत्वं वैकत्वादिशक्ततावच्छेदकमस्त्विति चेत् पदत्वेन वर्णत्वेन वेति यदि पदत्वेनेत्यु
वा घटादिपदानामेकत्वादौ शक्तिः स्यात्तदा शक्ततावच्छेदकस्य पदत्वस्य वर्णत्वस्य च विभक्तावपि सत्वेन तेन रूपेण
विभक्तीनामपि वाचकत्वसिद्धौ विभक्तिसामान्ये एकत्वबोधकत्वाभावसाधनाय प्रवृत्तस्य वैय्याकरणस्यार्थांतरता
दोषः स्यादित्यर्थः। तत्र दोषांतरमप्याह एकत्वादिशाब्दबोधादिति पदत्ववर्णत्वाद्युपस्थितिशून्यस्याप्येकत्वादिशा
ब्दबोधोदयात् एकत्वादिविषयकशाब्दबोधात्पूर्वं घोन रसरूपानुपूर्वीज्ञानस्य तादृशशाब्दबोधजनकस्यावश्यक
त्वेपि तदाकारणीभूतपदत्ववर्णत्वाद्युपस्थितेरावश्यकत्वाभावात् न तु पदत्वं वर्णत्वाद्युपस्थितिमतामपि तादृशशा
ब्दबोधोदयात् एकत्वादिविषयकशाब्दबोधं प्रति पदत्ववर्णत्वाद्युपस्थितेरपि कारणत्वं सिद्धं तथा च यत्र पदत्ववर्णत्वा
द्युपस्थितिं विनापि तादृशबोधस्तत्राप्येकत्वादिशाब्दबोधात्पूर्वं पदत्ववर्णत्वाद्युपस्थितिकल्पनमावश्यकमित्यत आह त

स्तन्त्रानुरोधेनैकत्वादिविषयकशाब्दबोधरूपफलानुरोधेन तत्कल्पने घोत्तरटत्वरूपानुपूर्वीज्ञानेनैव सर्वत्रैकत्वादिबोध
संभवेपि एकत्वशाब्दबोधात्पूर्वं पदत्ववर्णत्वाद्युपस्थितिकल्पनागौरवमित्यर्थः तत्र दोषान्तरमप्याह एवमानुपूर्वीभिन्नधर्म
स्येति पदत्ववर्णत्वादिरूपस्येकत्ववाचकतावच्छेदकत्वे घटपदं न संख्यावाचकं सुपदं च न संख्यावाचकमिति बाधनि
श्चयकालेपि तादृशधर्मावच्छिन्नस्य पदत्वावच्छिन्नस्य वर्णत्वाद्यवच्छिन्नस्य वाचकताग्रहसंभवात् घटपदं सुपदं च न सं
ख्यावाचकमिति बाधज्ञानं हि घटपदं सुपदं च संख्यावाचकमिति ज्ञानं विरुणद्धि न तु पदं वर्णादिकं च संख्यावाचकमिति
ज्ञानं विरुणद्धि ग्राह्याभावानवगाहित्वात् तथा च घटपदं न संख्यावाचकमिति बाधज्ञानकाले तादृशवाचकताग्रहसंभ
वात् इदं घटः इत्यत्र संख्याबोधो न जायते स स्यादित्यर्थः तथा च वैय्याकरणमते ऽनायत्या बहूनां प्रकृत्यानुपूर्वीणामेवैक
त्वादिशक्ततावच्छेदकत्वस्यावश्यकत्वेन गौरवमिति भावः। अत्र वैय्याकरणः शंकते अथ विभक्तीनां संख्यार्थकत्वमते प्र
ति स्वादिविभक्तिः स्वार्थान्वयित्वेन तात्पर्यविषयार्थकघटादिप्रकृतिसमभिव्याहृतेत्येवंरूपस्य प्रकृतिविभक्त्यो
रेकवाक्यताविरहनिश्चयस्य काले विभक्त्यर्थस्यैकत्वादेः प्रकृत्यर्थघटादौ अन्वयबोधवारणाय तयोः प्रकृतिवि
भक्त्योः समभिहारज्ञानस्य स्वादिविभक्तिः स्वार्थान्वयित्वेन तात्पर्यविषयार्थकघटादिप्रकृतिसमभिव्याहृते
त्येवंरूपस्यैव घटः इत्येकत्वप्रकारकघटविशेष्यकान्वयबोधं प्रति कारणत्वमवश्यं कल्पनीयमित्यर्थः ननु भवन्म
तेपि तादृशसमभिव्याहारज्ञानस्य कारणत्वं किं ति न कल्पनीयमित्यत आह एकपदार्थस्थाप्ययेरिति एवकारापच्छा

र्थयोरन्ययोगव्यवच्छेदार्थः परस्परान्वयबोध इव घटादिरूपैकप्रकृत्युपस्थापितयोर्घटैकत्वयोरेकत्वप्रकारकघटविशेष्य
कान्वयबोधे न प्रकृतिविभक्तिसमभिव्याहारज्ञानस्य हेतुताकल्पने प्रयोजनाभावादिति लाघवेन प्रकृत्यानुपूर्वीणामे
वैकत्वादिसंख्यावाचकतावच्छेदकत्वमुपेयत इत्यर्थः नैय्यायिकः समाधत्ते आकांक्षाविचार इति यत्पदार्थेन स
यत्पदार्थस्यान्वयस्तात्पर्यविषयस्तयोः पदयोः परस्परसमभिव्याहारः आकांक्षा इति तात्पर्यगर्भाकांक्षा तथाकां
क्षाघटकतात्पर्यज्ञानकारणतयैव शाब्दबोधनिर्वाहे घट इत्यादौ घटपदोत्तरसुत्वरूपसमभिव्याहारात्मकाकांक्षाज्ञा
नस्य हेतुता न स्वीकर्तव्या प्रयोजनाभावादित्येवं रीत्या निराकृतत्वादित्यर्थः एवं च विभक्तीनां संख्यार्थकत्वमतेस
मभिहारकारणताकल्पनं नास्तीति नाधिक्यमिति भावः नन्वेवमपि विभक्तेः संख्यार्थकत्ववादिमते स्वादि
विभक्तिपदं स्वप्रकृत्यर्थान्वितस्वार्थैकत्वादिबोधपरमित्याकारकविभक्तिधर्मिकतात्पर्यज्ञानहेतुतायाः अप्यावश्य
कतया तादृशशाब्दबोधं प्रति तात्पर्यज्ञानहेतुताद्वयकल्पनाप्रयुक्तगौरवमित्यभिप्रायेण शंकते अथैवमपि विभक्ते
रिति विभक्तिधर्मिकस्य विभक्तिः संख्याप्रकारकान्वयबोधपरेत्येवंरूपस्य प्रकृतिधर्मिकस्य प्रकृतिः संख्याप्रकारकान्वय
बोधपरेत्येवंरूपस्य च संख्याप्रकारकान्वयबोधपरत्वज्ञानस्य विनिगमनाविरहेण हेतुता कल्पनीयेति कार्यकारणभा
वद्वयकल्पनया गौरवं विभक्तेर्द्योतकतामते निरर्थकत्वेन विभक्तौ तात्पर्यविरहात्प्रकृतिः संख्याप्रकारकान्वयबोधपरेत्ये
कविधमेव तात्पर्यज्ञानं संख्याप्रकारकान्वयबोधे हेतुरित्येकविधकार्यकारणभावकल्पनया लाघवमित्यर्थः तत्र

तार्किकः समाधत्ते॥ विभक्तेरिति विभक्तेर्निरर्थकत्वमतेऽपि निर्विभक्तिकघटादिपदज्ञानात्संख्याप्रकारकान्वयबोधवा
रणाय घटादिविशेष्यकसंख्याप्रकारकान्वयबोधं प्रति घटादिपदाव्यवहितोत्तरत्वादिपदत्वप्रकारकज्ञानरूपं प्रकृतिविभ
क्त्योरानुपूर्वीज्ञानं जन्यजनकभूमिमेवंविधकार्यकारणभावस्यावश्यकल्पनीयतया संख्यावाचकविभक्तेरपि संख्याप्रकारक
अन्वयबोधजनकत्वप्रकारकेच्छाविषयत्वरूपसंख्यान्वयबोधपरत्वसंभवेन विभक्तिधर्मिकसंख्यान्वयबोधपरत्वज्ञानहे
तुतायामपि विनिगमनाविरहेणावश्यकत्वादित्यर्थः तथा च सामान्यादवच्छेदकलाघवेन विभक्तीनामेव संख्यावाचकत्वमुचि
तमिति भावः। ननु प्रकृतित्ववाचकतावच्छेदकापेक्षयातिरिक्तसंख्यावाचकतावच्छेदकस्य न्यूनाधिकमेव विभक्तेः संख्या
र्थकत्ववादिमतरत्नाशयेनाशंकते अथैतादिमैवमितिसंगेन तत्र संख्यायां लक्षणैवोचितेति घटादिरूपप्रकृतिशक्यकं
बुग्रीवादिमत्त्वसंबन्धस्य संख्यायां संभवादित्यर्थः न चैकप्रकृत्युपस्थापितयोः परस्परान्वयबोधानुपगमात् घटैक
त्वाद्योः परस्परान्वयबोध एव न स्यादित्यत आह शक्यलक्ष्ययोरिति शक्यार्थैकप्रकृत्युपस्थापितयोः परस्परान्व
यबोधानुपगमेऽपि शक्यलक्ष्ययोः परस्परान्वयबोधस्वीकारे बाधकाभावादित्यर्थः यद्यपि युगपद्वृत्तिद्वयविरोध इति
प्राचीनगाथाविरोधात् शक्यलक्ष्ययोरपि परस्परान्वयबोधो न भवति तथापि सकृदुच्चरितः शब्दः सकृदर्थं गमयतीति
सर्वसम्मतव्युत्पत्तिविरोधेन शक्यार्थैकप्रकृत्युपस्थापितयोः परस्परान्वयबोधोऽनुचितः शक्यलक्ष्ययोश्चैकप्रक
त्युपस्थापितयोः परस्परान्वयबोधे गंगायां घोषमत्स्यौ स्त इति प्रामाणिकप्रयोगदर्शनेन युगपद्वृत्तिद्वयविरोध इति

प्राचीनगाथाया निर्युक्तिकत्वेनाश्रेयतया निर्युक्तिकबाधकाभाव एवेति भावः ननु विभक्तेरेव संख्यायां लक्षणास्त्विति
तिन स्त्री क्रियत इत्यत आह प्रथमाविभक्तेरिति तस्याः प्रथमाया इत्यर्थः ननमास्तु मास्तु प्रथमायाः शक्यार्थसिध्या शक्य
संबन्धरूपा लक्षणा द्वितीयायास्तु कर्मत्वरूपशक्यस्य प्रसिध्यात् स्याः शक्यसंबन्धरूपलक्षणा संख्यायामस्त्वित्यत आ
ह कर्मत्वादाविति तादृशविभक्तेः द्वितीयाविभक्तेः द्वितीयासमभिव्याहृतप्रकृतेर्वा संख्यायां लक्षणे तत्र विनिगमकं दुर्ल
भमिति प्रसिद्धशक्यक प्रथमासमभिव्याहृतप्रकृतिलक्षणाया एव द्वितीयादिसमभिव्याहारस्थलेऽपि सर्वत्र प्रकृतिलक्ष
णाया एव स्वीकार उचित इत्यर्थः अत्र विभक्तेः संख्यावाचकत्ववादिनैय्यायिकः शंकते न चेति एकत्वादिप्रकारकघटादि
विशेष्यकशाब्दबोधं घटादिपदज्ञानजन्यैकत्वोपस्थितित्वेनापरिगणितहेतुताकल्पनमपेक्ष्य घटादिपदापेक्षया स्वल्प
तरत्वादिपदज्ञानजन्यैकत्वोपस्थितित्वेन परिगणितहेतुताकल्पनायां लाघवात् स्वल्पतरविभक्तिभेदेन कल्पनीयशक्तिक
ल्पने गौरवमपि किंचित्करमिति स्वादिविभक्तीनां संख्यावाचकत्वमित्यर्थः विभक्तीनां द्योतकत्ववादि वैयाकरणः समाध
त्ते सामान्यत इति पदत्वेन पदवृत्तिज्ञानजन्यैकत्वोपस्थितित्वेनैकत्वादिविषयकशाब्दबोधे हेतुताकल्पने तत्तद्घटा
दिपदज्ञानजन्यैकत्वोपस्थितित्वेनानंतहेतुताकल्पनं येन गौरवं स्यात् पदत्वं शक्तत्वं न तु घटादिपदेष्वकमेव लाघवादिति सं
ख्याप्रकारकत्वे स्वार्थ इति सम्यगित्यर्थः विभक्तीनां संख्यार्थकत्ववादीनां मते संख्यार्थकत्वं साधयितुं पुनराह निर्विभक्तिकेति वि
भक्तिशून्यकुंभादिपदतो लक्षणया संख्योपस्थितौ तद्गृहीतशक्तिकघटपदेन तस्याः संख्यायां तत्त्वावृत्तिः शक्तिलक्षणान्य

व्यु.गा.टी.

तररूपायस्य तस्मिन्घटादिपदेषु अमुकादिरूपतत्तद्भिन्नत्वं तत्तज्ज्ञानवत्त्वं पुंसः संख्याप्रकारकान्वयबोधप्रसंगात्तन्नि
र्विभक्तिकत्वकुंभादिपदवृत्तिज्ञानजन्यैकत्वोपस्थितेः घटादिपदाव्यवहितोत्तरत्वरूपानुपूर्वीज्ञानस्य हेतुतया) च तादृशबो
धवारणस्य सत्वादिति पदवृत्तिज्ञानजन्यैकत्वोपस्थिति घटितभवदुक्तसामग्रीबलात् घटपदवृत्तिज्ञानजन्यैकत्वोपस्थिति
(घटादिपदाव्यवहितोत्तरत्व) विरहदशायां घटविशेष्यकैकत्वप्रकारकशाब्दबोधापत्तिस्तद्वारणाय घटादिपदवृत्तिज्ञानजन्य
एकत्वोपस्थितीनां घटादिविशेष्यकैकत्वादिप्रकारकशाब्दबोधहेतुत्वं कल्पयित्वा घटादिपदवृत्तिज्ञानजन्यैकत्वोपस्थितीनां
(घटादिविशेष्यकैकत्वादिप्रकारक)त्वे घटादिपदाव्यवहितोत्तरत्वपदत्वरूपानुपूर्वीज्ञानयोः परस्परसहकारेणैक
त्वप्रकारकघटविशेष्यकशाब्दबोधरूपफलजनकतायाः अवश्यमभ्युपेयत्वात् तथा च घटाद्यनंतपदनिवेशप्रयुक्तगौर
वापेक्षया लाघवाद्विभक्तेरेव संख्यावाचकत्वमुचितमिति तांत्रिकग्रंथाशयः अत्र वैयाकरणाः प्रकृतीनां संख्यावाचक
त्वे युक्तिमाहुः घटादिपदस्येति घटादिपदादेकत्वबोधो भवत्विति तात्पर्याधीन घटपदशक्यसंबंधी एकत्वमिति लक्ष
णायां सत्यां घटः प्रमेयत्वमिति वाक्यादेकत्वं प्रमेयमिति बोधस्य घटवद्भूतलमिति वाक्यादेकत्ववद्भूतलमिति बोधस्य
सर्ववादिसंमततत्वेन तादृशबोधं प्रति घटादिपदवृत्तिज्ञानजन्यैकत्वोपस्थितेर्हेतुत्वं सर्ववादिसंमतं यथा तथा घ
टपदस्यैकत्वादौ शक्तिग्रहस्थले एकत्वविषयकशाब्दबोधं प्रति घटादिपदवृत्तिजन्यैकत्वोपस्थितित्वेन हेतुत्वस्यो
पकारे गौरवाभावेन तादृशतुल्यतायाः सर्वसंमततया प्रकृतेरेव संख्यावाचकत्वमुपेयमित्यर्थः। नन्वेवं प्रकृतीनां संख्या

९०॥

दर्शयति तथा चोक्तमिति हि यतः सर्वं वाक्यं क्रियया परिसमाप्यते क्रियासमभिव्याहार एव शाब्दबोधमुत्साधीनि
राकांक्षं भवतीत्यर्थः एतेन तस्यार्थस्य प्रकाशयितिया दृशेति पदांतरसमभिव्याहृतानां नैयादृशापदानां लक्ष
णयैकत्वविशिष्टघटादिविषयकशाब्दबोधहेतुत्वं नो भवत्वदिति सिद्धं एकत्वविशिष्टघटाद्यवगाहीतल्लक्षणाद
निकतादृशानंतपदवृत्तिज्ञानजन्यविशिष्टविषयकोपस्थितीनां तादृशशाब्दधीहेतुताकल्पनमपेक्ष्य स्वादिवि
भक्तिपदवृत्तिज्ञानजन्यैकत्वादिसंख्योपस्थितीनां एकविंशतिसंख्याकानां तादृशशाब्दबोधहेतुत्वकल्पने लाघव
दिति अथ वैयाकरणाः प्रातिपदिकस्यैव संख्यावाचकत्वं व्यवस्थापयितुमाह इदं पुनरिहावधेयमिति शाब्द
सामग्रीसमानविषयकानुमितिसामग्र्याः यौगपद्यस्थले अनुमित्यनुदयादनुमितिं प्रति शाब्दसामग्र्याः
प्रतिबंधकत्वं कल्पनीयमिति (सामग्र्याः) प्रतिबंधकीभूतशाब्दसामग्र्यां प्रातिपदिकजन्यघटाद्युपस्थिति
र्विभक्तिजन्यसंख्योपस्थितिश्च प्रवेश्या तथा च तयोः प्रातिपदिकजन्यघटाद्युपस्थितिर्विभक्तिजन्य
संख्योपस्थित्योः विशेष्यविशेषणतायां विनिगमनाविरहेण समानविषयकानुमित्यादिकं प्रतिप्रातिपदि
कजन्यघटाद्युपस्थितिविशिष्टविभक्तिजन्यसंख्योपस्थितिघटितसामग्री अथवा विभक्तिजन्यसं
ख्योपस्थितिविशिष्टप्रातिपदिकजन्यघटाद्युपस्थितिघटितसामग्री प्रतिबंधकेति प्रतिबध्यप्रतिबंध

वभाववाहुल्यं प्रवृत्तेः घटादिपदरूपायाः एवं च विशिष्टघटत्वलक्षणस्वीकारे तदुभयस्थलीयप्रातिपदिक
जन्यघटाद्युपस्थितिविभक्तिजन्यसंख्योपस्थिति एतदुभयस्थलीयविशिष्टत्वलक्षणिकघटाद्युपस्थि
तिरेवैवप्रतिबंधकसामग्र्यामंतर्भवतीत्युक्तवादिति भावः अत्रैनेयायिकाः शंकंते नचविशिष्टविष
यकेति एवं चादिप्रकारकं तन्निरूपितघटादिविशेष्यताशालित्वेन घटादिविशेष्यतानिरूपितएवंचा
दिप्रकारताशालित्वेन वा एकत्वविशिष्टघटादिविषयकोपस्थितेः प्रतिबंधकसामग्र्यं घ्यां प्रवेशस्तत्रा
पि विनिगमनाविरहेण प्रतिबध्यप्रतिबंधकबाहुल्यात्साम्यमित्यर्थः समानविषयकानुमितिं प्रति घटविशे
ष्यतानिरूपितैकत्वप्रकारताशालि[illegible]त्वघटपदजन्यविशिष्टविशिष्टविषयकोपस्थितिघटितसामग्रीप्र
तिबंधिका अथ च एकत्वप्रकारतानिरूपितघटविशेष्यताशालितादृशोपस्थितिघटितसामग्रीप्रतिबंधि
केति प्रतिबध्यप्रतिबंधकबाहुल्यमत्रबोध्यं अत्रैनेवैयाकरणाः समाधत्ते यत्राभवन्मूलताविवक्षमत्वेयोग्य
ताज्ञानघटोपस्थित्येकत्वोपस्थितीनामतास्तिसृणां मिथोविशेष्यविशेषणभावविनिगमनाविर
हेण यत्र तादृशस्थले एवं च त्वप्रकारकयोग्यताज्ञानविशिष्टघटपदजन्योपस्थितिविशिष्टविभक्तिज
न्यैकत्वोपस्थितिघटितसामग्रीप्रतिबंधिका अथ च विभक्तिजन्यैकत्वोपस्थितिविशिष्टघटपदजन्यघट र

द्युपस्थितिघटितसामग्रीप्रतिबंधिका (अ) द्युपस्थितिविशिष्टैकत्वप्रकारकयोग्यताज्ञानघटितसामग्रीस
मानविषयकानुमितिं प्रति प्रतिबंधिका अथ च घटपदजन्यघटाद्युपस्थितिविशिष्टैकत्वप्रकारकयोग्यताज्ञा
नविशिष्टविभक्तिजन्यैकत्वोपस्थितिघटितसामग्री अथ च घटपदजन्यघटोपस्थितिविशिष्टविभक्तिजन्यै
कत्वोपस्थितिविशिष्टैकत्वप्रकारकयोग्यताज्ञानघटितसामग्री अथ च विभक्तिजन्यैकत्वोपस्थितिविशि
ष्टैकत्वप्रकारकयोग्यताज्ञानविशिष्टघटपदजन्यघटोपस्थितिघटितसामग्री ५ अथ चैकत्वप्रकारकयोग्यता
ज्ञानविशिष्टविभक्तिजन्यैकत्वोपस्थितिविशिष्टघटपदजन्यघटोपस्थितिघटितसामग्री समानविषयकानु
मितिं प्रति प्रतिबंधिकेति प्रतिबध्यप्रतिबंधकभावषट्कं तत्र तादृशस्थले मतेवैयाकरणमते दर्शितोभय
रूपेण घटविशेष्यतानिरूपितैकत्वप्रकारताशाल्युपस्थितित्वेन एकत्वप्रकारतानिरूपितघटविशेष्यताशालि
उपस्थितित्वात्मकोभयरूपेणविशिष्टविषयकोपस्थितेः एकत्वविशिष्टघटादिविषयकोपस्थितेः प्रवेशेऽपि वै
शिष्ट्यं योग्यताज्ञाने निवेश्य तदुभयं समानविषयकानुमितिं प्रति घटादिविशेष्यतानिरूपितैकत्वप्रकारता
शाल्युपस्थितिविशिष्टैकत्वप्रकारकयोग्यताज्ञानघटितसामग्रीप्रतिबंधिका अथ चैकत्वप्रकारतानिरूपि
तघटादिविशेष्यताशाल्युपस्थितिविशिष्टैकत्वप्रकारकयोग्यताज्ञानघटितसामग्रीप्रतिबंधिकेत्येवंरीत्या
प्रतिबंधकाभावद्वयं कल्पनीयं मन्मते तादृशरूपद्वयावच्छिन्नायां घटादिविशेष्यतानिरूपितैकत्वप्रकारताशा

स्युपस्थितिविशिष्टैकत्वप्रकारकयोग्यताज्ञानघटितसामग्रीप्रतिबंधिका अथ चैकत्वप्रकारतानिरूपितघटादिवि
शेष्यताशाल्युपस्थितिविशिष्टैकत्वप्रकारकयोग्यताज्ञानघटितसामग्रीप्रतिबंधिकेत्येवं रीत्या प्रतिबंधकाभाव
द्वयं कल्पनीयं प्रत्येकं तादृशरूपद्वयावच्छिन्नायां घटादिविशेष्यतानिरूपितैकत्वप्रकारताशाल्युपस्थितावेकत्वप
कारतानिरूपितघटादिविशिष्टघटाद्युपस्थितौ योग्यताज्ञानस्य एकत्वप्रकारकयोग्यताज्ञानस्य च वैशिष्ट्यं निवे
श्यं च द्वयं एकत्वप्रकारकयोग्यताज्ञानविशिष्टघटादिविशेष्यतानिरूपितैकत्वप्रकारताशाल्युपस्थितिघटि
तशाब्दसामग्री समानविषयकानुमितिं प्रति प्रतिबंधिका ऽथ च तादृशानुमितिं प्रति एकत्वप्रकारकयोग्यता
ज्ञानविशिष्टैकत्वप्रकारतानिरूपितघटादिविशेष्यताशाल्युपस्थितिघटितशाब्दसामग्री प्रतिबंधिकेति प्र
तिबध्यप्रतिबंधकभावद्वयं कल्पनीयमिति तच्चतुष्टयमात्रमिति प्रतिबध्यप्रतिबंधकभावचतुष्टयमात्रमि
तिरीत्या ऽस्माकं वैयाकरणानां तत्स्थले प्रतिबध्यप्रतिबंधकभावकल्पने महालाघवमिति घटादिरूपप्रकृतेरेव संख्या
वाचकत्वमुचितमिति वैयाकरणमतपरिष्कार इति अथ प्रादुपसर्गाणां द्योतकत्वं व्यवस्थापयति ईदृशरीत्यैवेति स्वा
दिविभक्तिस्थले चरितरीत्यैवेत्यर्थः तथाहि समानविषयकानुमित्यादिकं प्रति शाब्दसामग्री प्रतिबंधिकेत्युभयमतसि
द्धं तत्र च प्रतिबंधकीभूतशाब्दसामग्र्यां प्रादीनां वाचकत्वे चादिना प्रणमतीत्यादौ नमधातुजन्यप्रकर्षान्नमस्कारो
पस्थितिर्निर्विशेषा एव परा च प्राद्युपसर्गजन्यप्रकर्षोपस्थितिश्च निवेश्या तयोरुपस्थित्योः परस्परविशेष्यवि

शेषणभावेनोपस्थितिर्वेति विनिगमनाविरहात् नम्यादिधातुजन्यनमस्कारोपस्थितिः प्राद्युपस्थितिविशिष्टप्राद्यु
पसर्गजन्यप्रकर्षोपस्थितित्वेन समानविषयकानुमित्यादिकं प्रतिबंधकता प्राद्युपसर्गजन्यप्रकर्षोपस्थिति
विशिष्टनम्यादिधातुजन्यनमनोपस्थितित्वेन प्रतिबंधकतेति प्रतिबंधकभावद्वयं कल्पनीयमिति गौरवात्प्रक
र्षविशिष्टनम्यादिधातूनामेवार्थः तथा च नम्यादिधातुजन्यप्रकर्षविशिष्टनमोपस्थितित्वेन समानविषय
क अनुमित्यादिकं प्रति प्रतिबंधकतेति लाघवात् प्रादयो द्योतका एव न प्रकर्षादिवाचका इत्यर्थः । अथेति समानवि
षयकानुमितिं प्रति शाब्दसामग्री प्रतिबंधकतायां धातुजन्यप्रकर्षविशिष्टनमोपस्थितित्वेन प्रवेशापेक्षया लाघवान्नमो
कारेत्यर्थः अनंतधातुजन्यत्वेन [illegible] णमत्वादिधातुजन्यप्रकर्षविशिष्टनमनभववैनादिरूपार्थोपस्थितीनां प्रकर्षवि
शिष्टनमननमनादिविषयकशाब्दबोधजनकतामपेक्ष्य कतिपयोपसर्गाधीनप्रकर्षाद्युपस्थितीनां प्रकर्षादिविशिष्ट
नमनादिविषयकशाब्दबोधजनकतामपेक्ष्य कतिपयोपसर्गाधीनप्रकर्षाद्युपस्थितीनां प्रकर्षादिविशिष्टनमनादि
विषयकशाब्दधीजनकता कल्पने लाघवात्स्वादीनामिव प्रादीनामपि वाचकतासिद्धिर्निर्बाधैव स्यादित्यर्थ इति स्वा
दिविभक्त्यर्थनिरूपणं अथ स्वादिविभक्त्यर्थान्निरूपयति संख्यायाश्चेति एकत्वसंख्याभिन्नद्वित्वबहुत्वादिसं
ख्यायाः प्रकृत्यर्थे घटादौ पर्याप्तिसंबंधेनैव सत्त्वेन प्रकारत्वमवच्छेदकमाह न तु समवायादिनेति तथा सति समवाय
संबंधेन द्वित्वादिसंख्या घटादिरूपप्रकृत्यर्थे विशेषणात्वस्वीकारे सति एकव्यक्तिमात्रबोधपरात् [illegible]कारात्वावच्छि
न्नैकव्यक्तिमात्रविषयकबोधतात्पर्यवादाकाशशब्दादपि द्विवचनबहुवचनप्रयोगापत्तिरित्यर्थः । नत्वेतदुपाहत

दर्थयोरिति द्विवचनबहुवचनार्थयोः घटाकाशादिगतद्वित्वबहुत्वयोः समवायेनाकाशेऽपि सत्त्वादित्यर्थः ननु प्रत्येकं वृत्ति
धर्मस्य समुदायावृत्तित्वनियमात् यदि प्रत्येकमाकाशादौ पर्याप्तिर्नास्ति तदा घटाकाशोभययस्मिन्नपि द्वित्वपर्याप्तिर्नि
रूप्येवेति चेत् घटाकाशोभयस्मिन् द्वित्वपर्याप्तिसत्वेऽप्यस्य प्रत्येकमाकाशादावपि द्वित्वपर्याप्तिरस्त्येव प्रत्येकस्योभयानतिरिक्तत्वा
दिति विलक्षणापर्याप्तिस्वीकारादाकाशादौ द्वित्वप्रयोगापत्तिस्तदवस्थैवेत्याशंकते। नच पर्याप्तेरिति समाधत्ते उद्देश्य
तावच्छेदकव्याप्तिविशिष्टेति नहि वयं केवलायाः पर्याप्तेर्द्वित्वादिसंसर्गत्वं स्वीकुर्मो येनाकाशावित्यादिप्रयोगः स्या [पत्तिः]
त् अपितु उद्देश्यतावच्छेदकव्याप्तिविशिष्टायाः पर्याप्तेः तथा च घटावित्यादौ घटत्वविशिष्टे द्वित्ववत्ताविति बोधात् घटत्वमुद्दे
श्यतावच्छेदकं तद्व्याप्यद्वित्वपर्याप्तिरित्युद्देश्यतावच्छेदकीभूतघटत्वव्याप्तिविशिष्टपर्याप्तिरभावात् संबंधेन द्वित्वं
घटद्वयेऽस्तीति घटाविति प्रयोगः घटाकाशोभयगतद्वित्वपर्याप्तिराकाशत्ववदन्यघटवृत्तित्वेनाकाशत्वाव्याप्यत्वाभावे
नाकाशे आकाशत्वव्याप्तिविशिष्टपर्याप्तिरभावात् आकाशावि प्रयोगापत्तिरूपातिप्रसंग इत्यर्थः यथाकाशद्वयं स्यात्तदा
काशाविति प्रयोग इति भावः ननु उद्देश्यतावच्छेदकव्याप्यत्वविशिष्टपर्याप्तिसंबंधेन द्वित्वान्वयबोधस्वीकारे आकाशौ [श]
व्याप्यत्वविशिष्टपर्याप्तेरप्रसिद्धेरप्रसिध्या द्वित्ववानाकाश इत्यादियोग्यताभ्रमादाकाशावित्यत्र द्वित्वप्रकारकाकाशबो
धानुपपत्तिरत आह वैशिष्ट्यं च वैज्ञानिकं ज्ञानिकं ज्ञानकृतं वैशिष्ट्यं न तु वास्तवमित्यर्थः तेनोद्देश्यतावच्छे
दकस्य द्वित्वपर्याप्तौ वैज्ञानिकवैशिष्ट्यांगीकारे न क्षतिरिति संबंधः तथा चोद्देश्यतावच्छेदकव्याप्यत्वेन ज्ञायमानायाः

पर्याप्तेः संसर्गतोपगमादाकाशौ द्वित्ववदिति योग्यताभ्रमजन्य आकाशावित्यादिवाक्यजन्यद्वित्वप्रकारकाकाशबो
धे तत्राकाशावितिवाक्ये विशिष्टसंसर्गाप्रसिद्धावपि आकाशत्वव्याप्यत्वविशिष्टपर्याप्तिरूपसंसर्गाप्रसिद्धाव
पि न क्षतिः द्वित्वादिप्रकारकाकाशादिबोधानुपपत्तिरित्यर्थः द्वित्वादिपर्याप्त्यादिति तत्र द्वित्वपर्याप्तावन्यत्राप्रसि
द्धस्याकाशत्वव्याप्यत्वस्य भ्रान्तेरुपगमादिति योजना तत्राकाशद्वावित्यादावाशंक्य स्थले अन्यत्राप्रसिधस्य शब्देऽप्यन्यत्रैव
चाप्रसिधस्य सर्वसंमतत्वात् आकाशत्वव्याप्यत्वस्यारोपासंभवेन क्वचित्प्रसिद्धस्यैवारोपसंभवादिति भावः तथा चाका
शाव्याप्य + अंकारात्वत्वदन्यावृत्तित्वस्य द्वित्वपर्याप्तौ घटत्वव्याप्यायां भ्रान्तेरुपगमादित्यर्थः अप्रसिद्धस्य + शाव्या
प्यत्वेन गृह्यमाणपर्याप्तिसंबंधेन द्वित्वस्याकाशे भ्रमात्मकबोध इति यावत् नन्वाकाशावित्यत्राकाशे द्वित्वप्रकार
कतयाभासते पर्याप्तिश्चोक्तसंबंधतया भासते तत्र पर्याप्तावाकाशत्वव्याप्यत्वमसदिति भासतां वृत्तित्वसंबंधतावच्छे
दकांशे भ्रमत्वं तथा च संबंधतावच्छेदकांशे तदभाववद्विशेष्यकतत्प्रकारकानुभवत्वरूपप्रकारविशेष्यघटितभ्र
मत्वस्य + तदधीनमेव द्वित्वरूपप्रकारांशे भ्रमत्वं न तु वस्तुतो द्वित्वरूपप्रकारांशे भ्रमत्वं + संबंधघटकप्रकारवि
शेष्ययोरभावेनानंगीकारात् कथमित्यत आह संबंधतावच्छेदकांशे इति अन्यत्र प्रमेयं नास्ति कंबुग्रीवादिमान्नास्ति
त्यादि स्थलीय शाब्दबोधस्य भ्रमत्वं परस्परविशेषणभावापन्नेषु प्रमेयत्वावच्छिन्नप्रतियोगितासंसर्गेषु संसर्गतास्वी
कारात् प्रमेयत्वावच्छिन्नत्वरूपसंबंधतावच्छेदकांश एव संभवति न तु प्रमेयत्वावच्छिन्नप्रतियोगितासंबंधेन प्रमेयस्य
क्वचिदप्यसत्त्वेन अभावे तादृशसंबंधेन तदारोपासंभवात् केवलप्रतियोगितासंबंधेन घटत्वावच्छिन्नप्रतियोगितास

बंधेनवाप्रमेयस्याभावेसत्त्वेनतदंशेभ्रमत्वासंभवादिति प्रमेयत्वावच्छिन्नप्रतियोगितासंबंधेनप्रमेयवानभावाव
र्तमानवृत्तित्ववृत्तित्वाश्रयइति शाब्दबोधस्यप्रतियोगित्ववृत्तिप्रमेयपदशक्यत्वप्रसिद्धसिंधप्रमेयत्वावच्छिन्नत्वप्र
तियोगित्वेप्रकारतयावगाहित्वेनतदंशेभ्रमत्वोपपादनस्याशक्यत्वमितितदीत्याप्रमेयं नास्तीत्यादिस्थलेसंसर्गप्रकारसाधा
रणप्रकारत्वमादायसंसर्गावच्छेदकांशेभ्रमत्वस्योपपादितत्वात् इत्यन्यत्रविस्तरः ननुयथाद्वित्वपर्याप्त्यवच्छेद
तावच्छेदकाकाशत्वाद्व्याप्यत्वाभावादाकाशाविति प्रयोगवारणंभवति तथाप्रकृत्यर्थतावच्छेदकाकाशत्वादौद्वित्वव्याप
कत्वाभावादप्याकाशाविति प्रयोगवारणभवतीति विनिगमकाभावात् व्यापकतासंबंधेनप्रकृत्यर्थतावच्छेदकघटत्वा
दावेवद्वित्वान्वयधीः किंनोपेयतेइत्याशंकतेनचप्रकृत्यर्थतावच्छेदकइति व्यापकतासंबंधेनद्वित्ववद्घटत्वावच्छि
न्नोघटाविति धीरित्यर्थः इत्थंनीलंइतिवाक्यान्नीलाभिन्नोघटइति शाब्दबोधनिवारणायान्वयितावच्छेदकरू
पेणान्वयिनः उपस्थितेः शाब्दबोधकारणस्यतत्रअभावत्वपकृतया घटादिरूपप्रत्ययार्थतावच्छेदकघटत्वादीनांस्व
रूपतएवोपस्थिततयान्वयितावच्छेदकरूपेणानुपस्थितेः प्रकृत्यर्थतावच्छेदकेप्रत्ययार्थद्विवचनार्थद्वित्वान्वयान
संभवमत्वेवेत्याशयेनसमाधत्ते घटावित्यादाविति नन्वेवंप्रकृत्यर्थेघटादौपरंपरासंबंधेनान्वयः स्यादित्य
तआह स्वव्यापकीभूतेति घटादित्यत्र स्वंद्वित्वंतद्व्यापकीभूतयदुद्देश्यतावच्छेदकंघटत्वंघटत्वेतिपरंपरासंबंध
नप्रकृत्यर्थेघटेद्वित्वान्वयः एवंचात्राकाशाविति भ्रमात्मकशाब्दस्थलेद्वित्वव्यापकत्वाघटत्वादौप्रसिद्धानत्वा
काशत्वेइति द्वित्वव्यापकतारूपसंबंधतावच्छेदकांशे भ्रमत्वंभवत्यंस्वीकार्यंतथाचस्वव्यापकतया ज्ञायमानंभ्र

मविषयीभूतमाकाशत्वाकाशेइति भवभवत्याकाशाविति प्रयोगः एवंउद्देश्यतावच्छेदकाकाशत्वव्याप्यतया
ज्ञायमानाभ्रमविषयीभूतापर्याप्तिरपि आकाशेइति आकाशाविति प्रयोगइतिप्रवेशितरकृत्ययोसंबंधता
वच्छेदकांशेभ्रमत्वस्वीकारे समानेपिउद्देश्यतावच्छेदकव्याप्तिप्रविशिष्टपर्याप्तिः संसर्गतयासागकारणाभा
वात्प्रथमोक्तायाः पर्याप्तिरपि संसर्गतोचितेत्यर्थः इदानींपर्याप्तिपर्याप्ति स्वसंसर्गतापेक्षायांबीजमाहद्वते
अथात्रेति व्यापकसामानाधिकरण्यरूपेवेति द्वित्वपर्याप्तिमन्निष्ठात्यंताभावप्रतियोगितानवच्छेदकधर्मवत्सा
मानाधिकरण्यरूपैवव्याप्तिर्वाच्येत्यर्थः द्वघटावित्यत्रद्वित्वपर्याप्तिमात्पदस्त्विष्ठात्यंताभावः पटत्वात्यंताभावप्र
तियोगित्वंपटत्वेनतदवच्छेदकीभूतंपटत्वंतमनवच्छेदकीभूतंघटत्वंतनद्वत्त्वसंतद्वृत्तित्वंद्वित्वपर्याप्ति
विप्तेवंरूपाव्याप्तिर्वाच्येतियावत् एवकारव्यवच्छेद्यमाह ननुतद्वदन्यत्यादिउद्देश्यतावच्छेदकवदन्यावृत्तित्वरूपा
व्याप्तिर्नवाच्याप्रमेयत्ववदन्याप्रसिध्याशाब्दबोधानुपपत्तेः एवंचव्यापकसामानाधिकरण्यरूपव्याप्तिनिवेशे
चद्वित्वपर्याप्तिसमानाधिकरणात्यंताभावप्रतियोगितानवच्छेदकधर्मवद्वृत्त्यादिरूपोद्देश्यतावच्छेदकवद्वृत्ति
त्वरूपव्याप्तिविशिष्टपर्याप्त्यपेक्षयालघोः स्वव्यापकतादृशधर्मवत्त्वस्य स्वद्वित्वंतद्व्यापकत्वतत्समानाधि
करणात्यंताभावप्रतियोगितानवच्छेदकधर्मवान् तादृशोद्देश्यतावच्छेदकोघटत्वादिरूपोधर्मस्तद्वत्त्वस्ये
व संबंधत्वमित्यर्थः व्यापकसामानाधिकरण्यरूपव्याप्तौव्यापकाधिकरणवृत्तित्वमधिकमितिगौरवमिति

तद्धटितपर्य्याप्तिसंबंधोपि गुरुः स्वव्यापकतादृशधर्मवत्त्वसंबंधस्य व्यापकताधिकरणत्वनिवेशघटितत्वाल्लघुरिति
भावः घटावच्छेदकव्याप्तिविशिष्टपर्य्याप्त्युपेक्षाबीजमिति शंकाग्रंथाशयः समाधत्ते तर्हीत्यकाशो न द्वावित्यतो देवो
पपादयति तथाहीत्यादिना आकाशो न द्वावित्यादिवाक्यात् द्वित्वावच्छिन्नभेदवानाकाश इति शाब्दबोधदशायां
द्वित्वावच्छिन्नप्रतियोगिताकभेदस्य च तादृशबोधविषयत्वप्रतीयते सम्भेवादौ न स्वव्यापकाकाशत्वावच्छिन्नप्रति
योगितावच्छेदकः स्वद्वित्वं न व्यापकीभूतं आकाशत्वं तद्वत्त्वसंसर्गावच्छिन्नप्रतियोगितावच्छेदकतायस्य स स्वव्याप
ककाशत्ववत्त्वसंसर्गावच्छिन्नप्रतियोगितावच्छेदकताको भेदो न भवतीत्यर्थः तत्र हेतुमाह तादृशसंबंधेनेति आ
काशत्वं हि द्वित्वसमानाधिकरणात्यंताभावप्रतियोगित्वाद्द्वित्वव्यापकं न भवत्यतः स्वव्यापकाकाशत्वं क्वचिदपि
नास्तीति द्वित्वस्य तत्प्रसिद्धेरित्यर्थः न चैवमाकाशो न द्वावितिवाक्यजन्यबोधस्य निर्विषयत्वापात इत्यत आह अपि
तु पर्याप्तिसंबंधेनेति पर्याप्तिसंबंधेन द्वित्वं घटद्वये घटाकाशोभयस्मिंश्च प्रसिद्धं आकाशे च पर्य्याप्तिसंबंधे
न द्वित्वाभावात् धर्मिभेदधर्मात्यंताभावयोः समनियतत्वात् पर्याप्तिसंबंधावच्छिन्नद्वित्वनिष्ठावच्छेदकताकद्वि
त्वादिमन्निष्ठप्रतियोगिताकभेदस्य वाकाशो न द्वावितिवाक्यजन्यशाब्दबोधविषयत्वेन प्रतीयत इति मं
तव्यं इत्थं च पर्य्याप्तिसंबंधावच्छिन्नद्वित्वनिष्ठावच्छेदकताकद्वित्वादिमन्निष्ठप्रतियोगिताकभेदविषयकत्वेनाका
शो न द्वाविति वाक्यजन्यशाब्दबोधेन पर्य्याप्तिसंबंधेन द्वित्ववानाकाश इत्येवंरूपाद्वित्वविशिष्टबुद्धिरेव प्रतिब

ध्यते न तु स्वव्यापकाकाशत्वसंबंधेन द्वित्वविशिष्टबुद्धिरपि तेन संबंधेन तद्धर्मनिष्ठावच्छेदकताकप्रतियो
गिताकभेदवत्ताज्ञानस्य तेन संबंधेन तद्धर्मवत्ताज्ञानं प्रत्येव विरोधित्वादिति आकाशो न द्वाविति वाक्यजन्यशा
ब्दबोधदशायामित्यादि वाक्याद्द्वित्वबोधापत्तिवारणाय पर्य्याप्त्याख्यसंबंधस्वीकार आवश्यक इत्यर्थः अथ पर्याप्त्या
ख्यसंबंधस्य पर्याप्तित्वेन संबंधता उद्देश्यतावच्छेदकव्याप्तिविशिष्टपर्य्याप्तित्वेन वेति विकल्प्य दूषयितुं शंक
ते अथेति ननु घटाकाशोभयस्मिन् द्वित्वपर्य्याप्तिसत्त्वेपि केवलाकाशे द्वित्वपर्य्याप्त्यसत्त्वेन पर्य्याप्तिसंबंधेन द्वि
त्वाभावादाकाशो न द्वावित्यत्र पर्य्याप्तिसंबंधावच्छिन्नद्वित्वनिष्ठावच्छेदकताकद्वित्वादिमन्निष्ठप्रतियोगिता
कभेदो न त्वाकथं बाधयितुं न शक्यत इत्यत आह आकाशेपि इति उभयत्वस्येति प्रत्येकस्योभयानतिरेकात् प्रत्
येकवृत्तिधर्मस्य समुदायावृत्तित्वादित्युभयत्वस्येत्यर्थः तत्राकाशे तेन संबंधेन शुद्धपर्य्याप्तिसंबंधेन तद्वत्त्वस्य
द्वित्ववद्भेदस्य च कुमराद्यादित्यर्थः आद्यं दूषयित्वा द्वितीयं दूषयति आकाशत्वव्याप्यति तथा चोभय
थापि पर्य्याप्तिसंबंधावच्छिन्नद्वित्वनिष्ठावच्छेदकताकद्वित्वादिमन्निष्ठप्रतिप्रतियोगिताकभेदबोधा
संभवादाकाशो न द्वाविति वाक्यमलकत्वमेवेति शंकितुराशयः अत्र यदि द्वित्वव्यापकघटत्ववत्त्वसंबंधे
न द्वित्ववतो घटादिकस्य प्रसिद्धत्वात् द्वित्वव्यापकघटत्वसंबंधेन द्वित्वावच्छिन्नभेदविषयकबोधजनकत्वमाका
शो न द्वाविति वाक्यमिति तदा द्वित्वव्यापकघटत्ववत्त्वसंबंधेन द्वित्वावच्छिन्नभेदविषयकत्वाकाश

इति भेदस्य द्वित्वव्यापकत्वाकाशत्वसंबंधेन द्वित्ववान्नाकाशादिति बोधं प्रति अथ च पर्याप्तिसंबंधेन द्वित्ववान्ना
काशादिति बोधं प्रति द्वित्वव्यापकत्वाकाशत्वसंबंधेन ॥ प्रसक्तिविरहेण तयाः काशानद्वे इति वाक्यजन्य
बोधदशायामाकाशाविति वाक्याद्द्वित्वबाधापत्तिर्दुर्वारेति वेतिवाच्यं अत्र समाधत्ते द्वित्वपर्याप्तौ गगनोभयादिवृत्ति
धर्मउभयत्वं तेनैव द्वित्वपर्याप्तिरवच्छिद्यते न तु एकमात्रवृत्तिधर्मेण तथा च तदनवच्छेदकैकमात्रवृत्तिधर्मावच्छे
देन तस्याः पर्याप्तेरनवच्छेदकत्वाय आकाशत्वादिरूप एकमात्रवृत्तिधर्मस्तदवच्छेदेन तद्भेदस्य उभयादि
वृत्तिधर्मावच्छिन्नपर्याप्तिमद्भेदस्य तेन संबंधेन उभयादिवृत्तिधर्मावच्छिन्नपर्याप्तिसंबंधेन द्वित्वादिम
तो द्वित्वावच्छिन्नस्य घटाकाशादेर्भेदस्य तद्वृत्तिपर्याप्त्यनवच्छेदकाकाशत्ववृत्तित्वेनाबाधकत्वाभावादित्यर्थः
तथा चोभयादिवृत्तिधर्मावच्छिन्नपर्याप्तिसंसर्गावच्छिन्नद्वित्वनिष्ठावच्छेदकतानिरूपितद्वित्वादिमन्निष्ठप्रतियो
गिताकभेदविषयकाबाधितबोधजनकत्वादाकाशानद्वे इति प्रयोगोपपत्तिः आकाशत्वावच्छेदेनोभयवृत्ति
धर्मावच्छिन्नपर्याप्त्यभावात्तेन संबंधेन द्वित्वाभावाच्चोभयवृत्तिधर्मावच्छिन्नद्वित्वनिष्ठावच्छेदकतानिरूपितप्र
तियोगिताकभेदसत्त्वादिति भावः ॥ ननु तेन च एवमपि एवं पर्याप्तिरुभयवृत्तिधर्माविच्छेदस्य स्वीकारे घटपटौ
नद्वाविति प्रयोगः स्यात् घटपटोभयस्मिन्नुभयत्वावच्छिन्नपर्याप्तिसत्त्वेपि प्रत्येकं घटपटयोरुभयवृत्ति
धर्मावच्छिन्नपर्याप्त्यभावेन तादृशपर्याप्तिसंबंधेन द्वित्वाभावसत्त्वेनोभयवृत्तिधर्मावच्छिन्नपर्याप्तिसंबं

बंधेन द्वित्वावच्छिन्नभेदसत्त्वादित्यर्थः समाधत्ते द्विवचनाद्युपस्थाप्येति घटपटौ नद्वाविति वाक्ये नद्वंद्वोत्तरविहित
द्विवचनोपस्थापितद्वित्वावच्छेदेनैव द्वित्वावच्छिन्नभेदो बोधनीयस्तद्वाक्यघटकेन नञा व्यासज्यवृत्तिधर्मावच्छि
न्नप्रतियोगिताकभेदे स्वोद्देश्यतावच्छेदकावच्छेदेनैव बोधनीयत्वात् द्वित्वावच्छेदेन द्वित्वावच्छिन्नप्रतियोगि
ताकभेदस्य बाधेन घटपटौ नद्वाविति प्रयोगाभावोपपत्तेरित्यर्थः ननु नञा तादृशभेदे उद्देश्यतावच्छेदकाव
च्छेदेनैव बोध्यत्वे तन्न उद्देश्यतावच्छेदकसामानाधिकरण्येनेत्यत्र किं विनिगमकमित्यत आह नञा व्यासज्यवृत्ति
ति व्यासज्यवृत्तिधर्मः द्वित्वत्वादिरुभयत्वादिकमेव तदवच्छिन्नप्रतियोगिता यस्य सो भेदः उद्देश्यतावच्छेदका
वच्छेदेनैव यदुद्देश्यतादृशभेदोऽभिधीयते तद्वृत्तिउद्देश्यतात्म्यैनानतिरिक्तवृत्तिधर्मावच्छेदेनैव बोध्यत इ
ति व्याप्तेरित्यर्थः द्वित्वसामानाधिकरण्ये न घटपटौ नद्वाविति व्यासज्यवृत्तिद्वित्वावच्छिन्नप्रतियोगिताकभे
दसत्त्वस्य अकिंचित्करत्वात् घटपटौ नद्वाविति प्रयोगानापादकत्वादित्यर्थः शंकते न च घटत्वादौ रीतिर्घटप
टौ स्त इत्यत्र द्वित्वपर्याप्तिर्घटद्वयवृत्तिः घटत्वं तु बहुषु घटान्तरेषु अस्तीति द्वित्वपर्याप्त्यपेक्षया अधिकदेशवृ
त्तित्वात् एवं घटत्वसमनियतत्वसमनियतधर्मस्यानवच्छेदकत्वान्न द्वित्वं तत्पर्याप्त्यवच्छेदकमिति द्वित्वपर
र्याप्त्यनवच्छेदकघटत्वावच्छेदेन पर्याप्तिमद्भेदस्य पर्याप्तिसंबंधेन द्वित्ववद्भेदस्य भवतां सिद्धान्ते नामपि प्रसक्ष
न स्यात् अनुमत्वात् घटौ न द्वाविति प्रयोगापत्तिः यद्भेदे दीयप्रतियोगितानवच्छेदकं तन्न तद्भेदावच्छेदकमि

व्यु.टी.

ति नियमात् घटत्वं द्वित्वावच्छेदकीयप्रतियोगितावच्छेदकस्य द्वित्वस्यावच्छेदकं न भवतीति द्वि न घटत्वं द्वित्ववद्भेद-
स्यावच्छेदकं भवतीति नियमवाक्यार्थः ननु तादृशनियमानंगीकारे घटभेदप्रतियोगितावच्छेदकघटत्वान-
वच्छेदकपटत्वस्य घटत्ववत् घटभेदाधिकरणतावच्छेदकत्वे मानाभावेन घटत्वाघटत्वावच्छेदेन घटभेदाधि-
करणतावगाहिबोधजनकस्य पटो न घट इति वाक्यस्याप्रामाण्यापत्तिरत आह अस्तु वेति तथा च घटत्वादेर्द्वित्व-
घवच्छेदकत्वात् द्वित्वादिमद्भेदावच्छेदकत्वं संभवतीति न तादृशनियमानंगीकारो न वा घटगतैकत्वविवक्षायां
घटो न द्वाविति प्रयोगापत्तिरित्यर्थः। वस्तुतस्त्विति। प्रत्येकं द्वित्वपर्याप्त्यनवच्छेदकत्वेऽपि न ह्युद्दपय-
ति न तन्निद्वित्वपर्याप्त्यनधिकरणघटत्वमिति नयातिप्रसक्तत्वे न घटत्वादिस्तद्घटगततन्निद्वित्वपर्याप्त्यनवच्छे-
दकत्वेऽपि यत्र यत्र घटत्वं तत्र सर्वत्र तन्निद्वित्वपर्याप्तिः रितिरीत्या द्वित्वपर्याप्तितावच्छिन्नावच्छेदकसमव्याप्त-
मेव तथा च द्वित्वपर्याप्तेनेतिप्रसक्तत्वान्निरुक्तनितया तदवच्छिन्नावच्छेदकघटत्वावच्छेदेन द्वित्ववद्भेद(?)सं-
द्वित्वपर्याप्ति[illegible]तावच्छिन्नावच्छेदकसमव्याप्तमेव तथा च द्वित्वपर्याप्तितावच्छिन्नावच्छेदकघटत्वावच्छे-
देन द्वित्ववद्भेदाभावात् घटो न द्वाविति प्रयोगापत्तिर्न संभवतीत्यर्थः। अथ घटौ न द्वाविति प्रतीतिरु समवायसं-
बंधावच्छिन्नद्वित्वनिष्ठप्रतियोगितावच्छेदकतायास्तादृशोऽपि द्वित्ववद्भेदस्तद्विषये वा घटौ न द्वाविति प्रती

[OrderDescription]
,CREATED=19.07.19 15:55
,TRANSFERRED=2019/07/19 at 16:12:59
,PAGES=67
,TYPE=STD
,NAME=S0001035
,Book Name=M-1984-VYUTPVITTVADTIKA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF

FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF

FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,